Contents and sequence differ in manuscripts of '*Prakāśavarṣa*'

Preparing a reasonable vulgate edition of *laghuṭīkā* is a very difficult task as well as highly complicated as the available transmission of manuscript through the tradition is fully divided, seems to be unrelated in every instance except the name of '*Prakāśavarṣa*' and ; I could not observe any unquestionable similarity in the texts of the commentary at any given instance. Except the manuscript no 29969 and the other from Amber, very rarely we did find the interpretations on grammatic points in other manuscripts and wherever they are found they differ intrinsically. The analysis of compound or peculiar word-formation is also very rare in other manuscripts. The explanatory words for each of *lemmata* are also fully different in majority of manuscripts. Some times synonyms were used in place of words found in other manuscripts.

Three types of commentarial structure in the *ṭīkā* of Jonarājā

It is observed that commentator follows three types of structures in this commentary writing. (a) Simple explanatory sentences without original words or grammatical discussion even though there is necessity of compound analysis.

(b) Word by word citation with noting of synonyms in sentence. There may be pushing of some extra circumstantial explanations. (c) Detailed discussion with exhaustive explanations and grammatical view points. The available transmission of manuscript through the tradition is fully uniform and ; I could observe, absolute and unquestionable similarity in the texts of the commentary at any given instance from beginning to end. The explanatory lines for each *śloka* are like a sentence or syntactic sequence. Some times synonyms are used in place of original word order without giving *mūla* words.

The cogent and question answer type structure in the text of Nṛsiṃha

The commentary by Nṛsiṃha in the *Anvayadīpikā* is very simple and largely follows Mallinatha for content part; however it follows *Kathaṃbhuti* style of sequence which can be observed on the perusal of the commentary.

Conclusion

The above discussions prove that the Jōnarāja was a great poet, commentator and chronicler of outstanding merit. Since all the original writings were in *śāradā* script, the transmission of JR commentary was very limited in other regions: there by textual interpolation was also very very less. However, cross checking the reading of *dēvanāgarī manuscripts* would definitely give evidence of unsubstantiated readings if any or it may show the source of interpolations. The whole mass of readings of *śāradā* script, collated with other manuscripts' readings as well as readings in Devnagari would give decisive text-readings which can be ascribed to the pen of Jōnarāja. It is acsertained that JR was popular palace poet, teacher of par excellence. Therefore, the commentary is also in a style of a teacher conveying essence of *ślokas* to his pupils in a *gurukula* situation. Hence the stylistic divergencies or syntactic or sequential variations in the commentary are due to direct method used in a particular situation. These can not be branded as interpolations of later origin.

***

References

1.The first one is published from many places particularly from Nirṇayasāgar in 1922 and thereafter, second from Trivandrum under Sanskrit Series no.63 and the third one edited by Kshitishchandra Sastri, Calcutta. For details see *History of Classical Sanskrit Literature* p.153 & 988 (index).

Commentators on KA excluding Mallinatha.

1. Vidyāmādhavaḥ, 2. Maṅgalaḥ, 3. Dēvarājabhaṭṭaḥ, 4. Rāmacandraḥ, 5. Kṣitipālamallaḥ, 6. Prakāśavarṣaḥ,7. Kūṣṇakaviḥ, 8. Ēkanāthaḥ, 9. Jōnarājaḥ, 10. Harikāntaḥ, 11. Bharatasēnaḥ, 12. Bhāgīrathamiśraḥ, 13. Pēddabhaṭṭaḥ 14. Allāndanaraahariḥ, 15. Haridāsaḥ, 16. Kāśīnāḥ, 17. Dharmavijayajñāni, 18. Rājakuṇḍa , 19. Gadasiṃhaḥ 20. Dāmōdaramiśraḥ, 21. Manōharaśarman , 22.Mādhavaḥ, 23. Lōkānandaḥ, 24. Vaṅkidāsaḥ, 25. Vijayarāmaḥ 26. Śabdārthadīpikāvyākhyākāraḥ,27. Prasannasāhityacandrikāvyākhyākāraḥ, 28. Nūsiṃhaḥ, 29. Ravikīrtiḥ 30. Śrīraṅgadēvaḥ, 31. Śrīkāntaḥ, 32. Vallabhadēvaḥ 33. Vidyāsāgaraḥ, 34. Gaṅgādharamiśraḥ.

2. New Catalogues Catalogarum (NCC) Vol.IV. p.157 onwards.

3. Refer to NCC IV p.167, and also *Indian Antiquary* 42;p.204

4. See the appendix at the end for details

5. The *Subhāṣitāvaliḥ* of Vallabhadēva, *Introduction*, p.59, (Reference sl.no.153) second edition, re-edited by RDKarmarkar,BORI,Poona1961

6. *sandēhaviṣauṣadhi* commentary on the verse no. iv.55 of *śiśupālavadha*,edited by RCKak and HBSastry,Srinagar,1941. 'Prakāśavarṣa as a contemporary of his own from whom he received instruction in the meaning of the poem' op.cit. *Introduction*, p.59: For the interpretation of *śiśupālavadha* verses in *sandēhaviṣauṣadhi* commentary, particularly on grammatical points, VD referred to *Prakāśavarṣa* at i.35, iv.55, x.20, xvi.17 and xx.71 and cited him reverentially as '*upādhyāya Prakāśavarṣa*'[7].

7. Mallinātha, while commenting upon the *kirātārjunīya iv.10* refers to Prakāśavarṣa by name-प्रकाशवर्षस्तु एकदेशिसमासमङ्गीकृत्य समासान्तमाह - तन्मृग्यम्।. At other places of sañjīvinī commentary पूर्वे त्वस्मिन्नेव पदान्वये वाक्यार्थमित्थं वर्णयन्ति - स रामानुजीव्यादीनिव दर्शयते

.... निष्ठा इति भूतार्थे क्तः, न तु मतिबुद्धि इत्यादिना वर्तमानार्थे I. 22 without referring to the name, *Mallinātha* seems to refer to *Prakāśavarṣa* as the available wordings of *laghuvūtti* contain similar sentences. ; *kirātārjunīya* sañjīvinī commentary, Nirnayasagar edition,1921

8. Unpublished manuscript of Subodhini on *kirātārjunīya* and Gadasimha commentary. At the outset of respective commentariesin Mangalacarana, *Dēvarāja Bhaṭṭa* and *Gadasiṃha* are also referring to *Prakāśavarṣa,* as the earliest known commentator on the *kirātārjunīya.*

9. '*rasārṇavālaṅkāra*' of Prakāśavarṣa by MMAggarwal, Choukambha, Delhi 2002; See for detils on the research on Prakāśavarṣa.

10. Catalogue of Manuscripts , pg. no. 55 preserved in Jaiṣalmer Bhandars by CDDalal, Research Institute, Baroda,1921

11. *A Catalogue of Manuscripts in Jaisalmere Jain Bhandars,* Compiled by Muni Sri Jambuvijay Ji, Jain Trust, Jaisalmere, 2000.

12. Refer to *Prācīna Bhāratīya Lipimāla,* Hirachand Ojha, Plate no.XXVII, Munshiram, Delhi.

13. Manuscript no. 29969,RORI, folio no 1 'A'

14. *Jōnarāja commentary on the kirātārjunīya:* introductory verse no 3

15. *Jōnarāja commentary on the Srikanthacarita:* introductory verse no2

16. *Jōnarāja commentary on the* Prthvirajavijayamahakavya :at the end of first sarga

17. *Jōnarāja commentary on the* Prthvirajavijayamahakavya :at the end of eleventh sarga

18. Srikanthacarita, end colophon of 25th sarga. Kavyamala edition.MLBD,Rpt.1983, Delhi

19. Unpublished Jōnarājatika manuscripts and each sarga colophons.


20. श्रीजेनोल्लाभदेनस्य साम्राज्ये जोनको द्विजः from introductory sloka in unpublished manuscript

21. *Jainarajatargini* I.7-8. (Edt) Rajnath Singh, Chaukhambha Amara Bharati, Varanasi,1977

22. *Rajatarangini*-ii (Jōnarāja), Sloka no. 749 and 751 and also see explanation on pg no 428,432 therein by (Edtr) Rajnath Singh, Chaukhambha Amara Bharati, Varanasi,1972


23. *ibid.* sloka no.7
24. Unpublished *Kiratarjuniyatika* by Jōnarāja: introductory verse no.3.
25. *Jainarajatargini* I.6
26. श्रीजैनोल्लाभदीनाख्यो मूर्तो धर्मः कलावपि।
    राजापि योगिराजोऽयं राजचूडामणेः प्रियः।। *Rajatarangini*-ii (Jōnarāja), Sloka no. 579
27. Colophon in the commentary of *Prthvirajavijayamahakavyavyakhya:* at the end of 8, 9,10 and11sargas. Edited by Sir Gourishankar Hirachand Ojha, Rajasthani Granthagar,Jodhpur,1941
28. Manuscriptoogy secion. Gist of Proceedings of 44th AIOC Session at Kuruksetra university: article by Dharmendra Kumar Bhatt.
29. दर्पग्लानिभवां राजपान्थानां ताप-सन्ततिम्।
    हर्तुं संरोपितः काव्यद्रुमो भाविफलोदयः।। *Rajatarangini*-ii (Jōnarāja), Sloka no. 8
30. *Rajatarangini*-ii (Jōnarāja), Sloka nos. 575, 666 and 669.
31. *Rajavali or Rajatarngini by Srivarapandita*, I.4 (Edtr) Rajnath Singh, Chaukhambha Amara Bharati, Varanasi,1977
32. 'श्रीनोनराजतनयः कुरुजिच्चरित्रे पर्यायमात्रमभिधास्यति जोनराजः' Introductory verse no.2 in Jonarājā commentary.
33. Stein catalogue under Kiratarjuniya and NCC entry on Tikas on Kiratarjuniya

***




Kirātārjunīyaṭīkā Anvayadīpikā by Nṛsiṃha

Ms. Acc. No. 365 - Raghunātha Temple Library - Jammu&Kashmir




Kirātārjunīyaṭīkā Anvayadīpikā by Nṛsiṃha

Ms. Acc. No. 365 - Raghunātha Temple Library - Jammu&Kashmir



Kirātārjunīyavyākhyā Laghuṭīkā by Prakāśavarṣa
Ms. Acc. No. 29969 - RORI - Jodhpur



Kirātārjunīyavyākhyā by Jōnarāja
Ms. Acc. no. 2291, Iq. Lib. - Srinagar - J&K, IGNCA - DSO000017344

विषयसूची

[प्रथमः सर्गः]

श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।
स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः।।१।।

[प्रकाशवर्षविरचिता लघुटीका]

गुणगर्वितगीर्वाणगणगौरवगोचरः।
भूयाद्भवो जगत्पातुं प्रभविष्णुर्विभूतये।।१।।
भट्टनरसिंहसूनोर्गौडस्य कवेर्मुखाम्बुजाच्छ्रुत्वा ।
वृत्तिं लघुं विधास्ये क्वचित्किरातार्जुनीयस्य।।२।।
यत्र विशेषस्तमलं कथयित्वा ज्ञास्यतेऽसकृद्वैनम् ।
नावश्यमेव लोके भवति हि वचनं यथावस्तु<त्तु> ।। ३।।
व्याख्यानमनेकविधं लिङ्गमबोधस्य धूम इव वह्नेः।
मौलं मार्गमजानन् स्पृशत्यनेकान्पथो मुह्यन्।।४।।
लुम्पन् गुणं गुणवतो दुर्जन एव प्रकाशयत्यधिकम् ।
सूत्रार्थप्रतिपत्तिर्भवतितरां प्रत्युदाहरणात् ।। ५।।

इह हि सर्वेषामेव प्रेक्षापूर्वकारिणां भगवद्व्यासप्रभृतीनां सकलकाव्यारम्भोऽभिमतदेवतानमस्कारपुरस्सरो विविधविघ्नविनायकोपशमनार्थः सदाचारानुचरणार्थश्च दृश्यते। यथा-

---

[श्रीजोनराजविरचिता टीका]

प्रसादगाम्भीर्यमनोरमश्री रसप्रवाहं मधुरं स्रवन्ती।
सरस्वती वाऽस्त्वतिपुण्यलभ्या सरस्वती वो मलशोधनाय।।१।।
श्रीनोनराजतनयः कुरुजिच्चरित्रे पर्यायमात्रमभिधास्यति जोनराजः।
किं नाम नामलमणिप्रगुणांस्तटाको व्याकोशयत्युदधिवत् तरलांस्तरङ्गान्।।२।।

लघुटीका

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम्।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत्।। ५।

इत्यादिविशिष्टदेवतानमस्कारस्य च पारम्पर्येण विघ्नाद्युपशान्तिफलं वर्णयन्ति। न च साक्षान्नमस्कारे कृते हि धर्मोपचयात् विरोध्यधर्मनिवृत्तौ सत्यां तत्कार्याणां विघ्नादीनाम् अभावात्। एतदेव चेतसि विनिवेश्य सर्वे एव च शास्त्रकारा विवरणकृतये विघ्नाद्युपशमनार्थं नमस्कारं वर्णयांबभूवुः। नमस्कारवन्मङ्गलविशिष्टपुरुषोद्देशविशेषकथाप्रसङ्गादीनाम् अभ्युदयत्वं मन्यन्ते। यदत्र अस्य कवेर्नमस्काररहितकाव्यारम्भे प्रवृत्तिस्तत्रेदमाकूतं लक्ष्यते। श्रीशब्दोऽत्र मङ्गलाभ्युदयहेतुर्विशिष्टयुधिष्ठिरादिपुरुषोद्देशकथाप्रसङ्गश्च अस्त्येव। नमस्कारमन्तरेणापि न कश्चिद्दोषो भवति। यतः काव्यारम्भः कीत्यर्थः प्रीत्यर्थश्च। कीर्तिः स्वर्गफला हि श्रूयते । यथोक्तं

रुणद्धि रोदसी चास्य यावत्कीर्तिरनश्वरी।
तावत् किलायमध्यास्ते सुकृती वैबुधं पदम्।। ।६।

सा सुकृतिनः सम्बन्धिनी कीर्तिरनश्वरी शाश्वतमासनीया च रोदसी रुणद्धि द्यावापृथिव्योरन्तरालं वाश्नुते तावदयं सुकृती वैबुधं पदमध्यास्ते स्वर्गलोकमधितिष्ठति इति किल वृद्धेभ्य आगमः। अत्र इन्द्रद्युम्नोपाख्यानम् उदाहरणम्। इन्द्रद्युम्नो नाम राजा किल विविधबहुसुकृतसम्भारसमुपार्जितकीर्त्यतिशयसारः कालरिष्टालयनिवासोऽपि कालपरिणतेरपचितकीर्तिः सन् त्रिदिवात्प्रच्युतोऽपि चिरजीविनः कच्छपाद्भूयः कीर्तिप्राप्तौ

जोनराजटीका

श्रीजैनोल्लावदेनस्य साम्राज्ये जोनको द्विजः।
खर्षिविश्वमिते* शाके यथामति यतिष्यते।।३।। *[0713 = 1370 Saka = 1479AD]

स वनेचरो द्वैतवने द्वैतवनाख्ये वने निवासिनं युधिष्ठिरं समाययौ प्राप। वनेचरस्य राजसमीपगमने किं प्रयोजनमित्याहविदितः ज्ञातशत्रुवृत्तान्तः। स कथं वैरिणो वृत्तान्तं ज्ञातवान् इत्याह-वर्णिनः ब्रह्मचारिणः लिङ्गानि लक्षणानि अक्षमालाजिनादीनि विद्यन्ते यस्य सः। लिङ्गग्रहणमाचारव्यवच्छेदार्थम्। ब्रह्मचारिवेशग्रहणाद्धि गूढपुरुषतया ज्ञातेषु विश्वासांन्महाजनो निपुणतया पृष्टः सन् न किञ्चिद्गोपयति। वनेचरस्यब्रह्मचारिवेषम् अभिनीय

लघुटीका

स्वर्गलोकमाससादेति श्रूयते। सा च कीर्तिः प्रीतिश्च शोभनकाव्यादिप्रणयनात् भवतः, न तु काव्यमात्रकारणात्। यथोक्तं

न कवित्वमधर्माय मृतये दण्डनाय वा।
कुकवित्वं पुनः साक्षात् मृतिमाहुर्मनीषिणः। ७। इति।

इदं च अशेषविद्वज्जनहृदयावर्जनकारित्वात् अतीव शोभनम्। महाकाव्यञ्चैतत्। मन्त्रदूतप्रयाणाजिनायकाभ्युदयगिरिनगरसागरसरित्सरोवरकमलकैरववसन्तोत्सवमलयानिल-पुष्पावचयजलक्रीडासूर्योदयास्तमयान्धकारप्रदोषचन्द्रोदयसुरतप्रत्यूषसभासङ्ग्रामषड्ऋतुवर्णन-संयोगवियोगतपश्चरणादिवर्णनलक्षणमहाकाव्यलक्षणयुक्तत्वात्। नायकश्चात्र भगवाननेकावदा-तविवक्षितविवर्तनप्रथितजगत्त्रयवितानकीर्तिप्रथिमार्जुनः तस्य च विबुधोत्तमविरिञ्चिप्रमुख-विविधवृन्दारकवृन्दवेदितचरणारविन्दपरागपावितचराचरगुरुः भवभीतिभेददक्षत्र्यक्षालोकजगात्र-संसर्गाखिलजगद्ग्रासघस्मरस्मरातिदुरवापपाशुपतदिव्यास्त्रलाभलक्षणोऽभ्युदयोऽभिमतः अभिमन्तव्यः। **श्लोक इदानीं लक्ष्यते।**

कुरूणाम् अधिपस्य श्रियं पालयतः प्रजाविषयां वृत्तिं ज्ञातुं यो विसर्जित आसीत् स चरो द्वैतवनाख्ये तपोवने स्थितं युधिष्ठिरं प्रतीहारेणाख्यातः सन् समागतः।

स चरो युधिष्ठिरं समाययौ । स चरः प्रणिधिः युधिष्ठिरम् अजातशत्रुं समाययौ संप्राप्तवान् आजगाम इत्यर्थः। [स कः ?] यं चरम् अयुङ्क्त । यं चरं स पार्थः प्रायुङ्क्त प्राहिणोत्। [क्व समाययौ ?] वने कानने । [कस्मिन् वने ?] द्वैतवने । ननु च द्वैतवनं नाम सरः प्रसिद्धम्। तत्कथं वनमपि द्वैतवनं भविष्यति। नैष दोषो द्वैतवनसरःसन्निधानाद्वनमपि

जोनराजटीका

राजवृत्तान्ततुलने किं कारणमित्याह- कुरूणामधिपस्य दुर्योधनस्य सम्बन्धिनीं तत्कर्तृकां वा प्रजासु पालनीं वृत्तिं युक्तदण्डरूपां वेदितुं तुलयितुं युधिष्ठिरो यमयुङ्क्त प्रेषितवान्। यतः श्रियः पालनीं युक्तदण्डतया प्रजानुरागात्, लक्ष्म्याश्च तन्मूलत्वात्। यद्वा द्वैतवने तिष्ठन्तं राजानं युधिष्ठरं चरः प्रापत्। तत्र केन हेतुनातिष्ठदित्याह-अवनेवैरिभ्यो रक्षके गहनत्वादिति हेतुः। यदि वैरिभ्यो राजा भीतस्तद्राज्ञाऽस्य प्रवेशः किं न निषिद्ध इत्याह-

वर्णिलिङ्गी विदितः अस्मदीयएवास्मत्कार्यसिद्ध्यर्थं ब्रह्मचारिलक्षणानि बिभ्रत्प्रत्यागत इति ज्ञातः। यद्वा विदितो निवेदितः। लक्षेर्धातोस्स्वरितेत्त्वकारणादनित्यण्यन्तस्य विद-

लघुटीका

द्वैतवनम् इति। गङ्गायां घोष इतिवत् समीप्याधिकरणे सप्तमी द्रष्टव्या। तेनायमर्थः। द्वैतवनं नाम सरः। तस्य समीपे यद्वनं काननं तस्मिन् द्वैतवने। वने व्यवस्थितं युधिष्ठिरं स चरः समाययौ। अथवा अयमर्थः - स वने वने चरः काननगोचरो युधिष्ठिरं द्वैतवने व्यवस्थितं समाययौ। अथवा द्वैतवने अवनेचरः इत्यत्र अवनशब्दो द्रष्टव्यः। संहितायास्तुल्यत्वात्। अवने इति वनविशेषणमेव। तत्र च अयमर्थः। द्वैतवने वर्तमानं युधिष्ठिरं चरः समाययौ। [कीदृशि द्वैतवने ?] अवने परित्रायके। सकललोकरमणीयत्वात्फलकन्दबहुलत्वेन। तत्रत्यानां वृत्तिकरणत्वाद्वा। [किमर्थमयुङ्क्त?]। वेदितुं ज्ञातुम् । [किं ज्ञातुं?] कुरूणाम् अधिपस्य प्रजासु वृत्तिं वेदितुम्। कुरवो जनपदविशेषाः। तेषामधिपस्य स्वामिनः। अपेक्षितुः सुयोधनस्य प्रजासु प्रजाविषये या वृत्तिर्व्यवहृतिः श्रेष्ठता ताम्। कथं सुयोधनः सप्ताङ्गराज्ये वर्तते इति ज्ञातुम्। प्रजाग्रहणेन अत्र सप्ताङ्गराज्यम् उच्यते। तथा च उक्तम्-

मित्रामात्यौ पुरं राष्ट्रं कोशदण्डौ महीपतिः।
सप्ताङ्गं चक्रसङ्घातो राज्यमित्युच्यते बुधैः।।

बुधैः तत्त्वविद्भिः। यद्यपि स चतुरुदधिमालामेखलाया भुवो भर्ता न तु कुरूणामेव। तथापि कुरुग्रहणं छत्रिणो यान्तीतिवत्। कीदृशीं वृत्तिं पालनीं त्राणकारिणीम् । कस्याः श्रियो लक्ष्म्या रक्षित्रीम्। कीदृक् चरः ? वर्णिलिङ्गी। वर्णी ब्रह्मचारी। वर्णिनो लिङ्गम् तदस्यास्तीति वर्णिलिङ्गी । ब्रह्मचारिनेपथ्यधारी अजिनाषाढधरः। अर्थस्तु समान एव। तथा कीदृशः विदितः। देव! द्वारि चरो वर्तते इति प्रतीहारेण निवेदितः। अनेन वनवर्तिनो राज्ञो राजचिह्नानपभ्रंशं दर्शयति। अथवा दोऽवखण्डने इत्येतस्माद्दातं दितम् इति नपुंसके निष्ठां कृत्वा दितं खण्डनमुच्यते । विगतं दितं खण्डनमस्मात्। विदितोऽखण्डितः। किल

जोनराजटीका

चेतनाख्याने इत्यस्य विदित इति कर्मणि क्तप्रत्यये रूपम्। निवेदने हेतुमाह यतो वर्णिलिङ्गी धृतब्रह्मचारिमुद्रः। युधिष्ठिरनिवासेऽपि वर्णिलिङ्गानामत्यजनं मन्त्रभेदभयात् स्वामिभक्त्यतिशयाद्वा ज्ञेयम्। सत्स्वप्यन्येषु विस्रष्टव्येषु वनेचरविसर्जनं नागरिकैरपरिज्ञेयत्वार्थम्।

सरस्वतीप्रसादेननिरायासं लक्ष्मीप्राप्तिदर्शनाल्लक्ष्म्याः सरस्वतीदासत्वावगमे दासद्वारेणैव च महतां सेवासिद्धौ ग्रन्थारम्भे श्रीशब्दप्रयोगं कुर्वता कविना सरस्वतीप्रसादान्निर्विघ्नत्वेऽवसिते पृथङ्नमस्कारश्लोको न कृतः। यद्वा श्रियो न शिवादिदेवताभिन्नतया व्यापकत्वेन सर्वत्र

लघुटीका

कदाचित् कुत्रचित्। राज्यान्तरगतं चरं दृष्ट्वा खण्डयेयुरपि राजानः। स पुनरपगतखण्डनः। अथवा वेत्तीति वित्। ताम् इतः प्राप्तो विदितः ज्ञातवान्, सम्यक्परिज्ञातसुयोधनराजनीतिव्यवहारः। यतोऽसौ विदितः सम्यक् ज्ञातकार्यसारः। अतः समाययौ । श्रिय इति द्वितीयाबहुवचनान्तं विज्ञेयम्। चशब्दमन्तरेणापि चशब्दसमुच्चयार्थप्रतिपत्तिर्दृष्टा। यथा -

अहरहः नयमानोऽपि गामश्वं पुरुषं पशुम्।

वैवस्वतो न तृप्येत सुराया इव दुर्म्मदी।। इति

अत्र केषामधिपस्येति अज्ञानेऽपि सन्निधानात् कुरूणामेवेति मन्तव्यं तत्त्वविद्भिः। कीदृशी भरतानां स्फूर्तिः ? कीदृशी वाऽधिपस्य प्रजाविषये पालनी वृत्तिरिति<ज्ञातुं>नियुक्तः। कीदृशीं तां ? कुरूणाम् अधिपस्य श्रियः पालनीम्। यदा हि प्रजाः उत्साहाभिसम्पन्ना भवन्ति तदा स्वामिनोऽस्मादभिभवात् श्रीः पालिता भवति। अथवा श्रिय इति न षष्ठी नापि द्वितीया। किं तर्हि ? पञ्चमी। कुरूणाम् अधिपस्य प्रजासु वृत्तिं वेदितुम्। कस्य पालनीं ? प्रजानामेव।श्रियः पालनीम् । श्रीतो रक्षित्रीम् इति यावत् । यया वृत्त्या श्रीसकाशात् प्रजा रक्षति तां वेदितुमित्यर्थः। कुपुरुषस्य हि श्रीर्वर्धमाना प्रजाः पीडयति इति श्रीतः प्रजाः पालयितव्या महता यत्नेन । श्रीसकाशात् पालनीम्।

कुरूणामधिपस्य प्रजासु वृत्तिं वेदितुं यमयुङ्क्त स समाययौ। अथवा प्रजानां असुवृत्तिः। प्राणव्यासस्तं विदितुं कियता प्राणबलेन प्रजा वर्तन्ते इति । अथवा पञ्चम्याः पक्षे एवायम् । अथवान्योऽर्थः। कुरूणामधिपस्य पालनीं वृत्तिं वेदितुं यमयुङ्क्त स समाययाविति। (विधाय रक्षानित्यादि)। कुतो वेदितुं, श्रिय एव। श्रियः सकाशात्

जोनराजटीका

स्थितत्वात् अभिमतदेवतानमस्कारो न कृतः। योजनस्य च समायनस्य च द्वयोरपि परोक्षत्वेन लिट एव प्रयोगे कर्तव्ये लङ्लिटोः प्रयोगो न दोषावहः पदसंस्कारपक्षाश्रयणात्। अत एव युजः पौर्वकालिकस्य लङः प्रयोगो न दुष्टः। समायातेश्चौत्तरकालिकस्य लिट्-प्रयोगो न दुष्टः पदसंस्कारपक्षश्च कविभिरादृतः। तदुदाहरणोपन्यासश्च ग्रन्थगौरवभयात् न कृतः। अत एव अलङ्कारचर्चा परित्यक्ता। कुत्रापि तु उपयोगित्वात् उपन्यस्यते। उत्तमनायकपार्थवस्तूपक्षेपपरं काव्यमुखम्, यदुक्तमन्यत्र आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' इति। मन्मण्डलं दुर्योधने विरक्तम्, किमनुरक्तं न वेति तुलयितुं युधिष्ठिरश्चरं विसृष्टवान्।।१।।

कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः।
न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषणः।।२।।

लघुटीका

तदीयाऽनुवृत्तिर्ज्ञायते। अधिपो हि यदा सम्यक् पालनेन प्रजासु विषये वर्तते तदा तासु पालिता सुश्रीर्वर्धते। अन्यथा तु न इत्यर्थः। अथवा वर्णिलिङ्गमपास्य नागरिकवेषेण तत्र प्रवेशे दोष एव इति सर्वं सुघटम्।।१।।

सपत्नेन शत्रुणा सुयोधनेन मही जिता आत्मीकृता इत्येवमप्रियं महीभुजे युधिष्ठिराय निवेदयिष्यतः विज्ञापयितुकामस्य सतः तस्य वनेचरस्य मनो न विव्यथे। किं तर्हि व्यथितमेव। इतरमपि जनं किञ्चिदप्रियं श्रावयतस्त्रास उत्पद्यते, किं पुना राजानम् ? नहि कथं प्रियमेव न आचष्टे इत्याह। कीदृशस्य। कृतप्रणामस्य। कृतः प्रणामो येन स कृतप्रणामः। तस्य राज्ञे कृतप्रणामस्य। हि यस्मात्। ये हितैषिणः स्वामिन आत्मनश्च हितकामास्ते मृषा अलीकं प्रियं प्रवक्तुं न इच्छन्ति। किं तु ये अहितैषिणः ते मृषा अलीकं प्रियं वक्तुमिच्छन्ति। हि शब्दो यस्मादर्थे। विव्यथे इति व्यथो लिटीत्यभ्यासस्य सम्प्रसारणम्। "क्रियया यमभिप्रैति स सम्प्रदानम्" इति महीभुजे सम्प्रदानसंज्ञा। यथा "किं पुनः कारणं व्याकरणमधिजिगांसमानेभ्यः प्रयोजनमेव व्याख्यायते" इति। २।

जोनराजटीका

स पुनः दुयाधनेन सकलां भूमिं वशीकृतां दृष्ट्वा वर्णयितुं महाराजसमीपे समर्थः कथमभूदित्याह- तस्य वनेचरस्य मनो न विव्यथे न अचलत् असत्यं नावदत् इत्यर्थः। चलने हेतुमाह- महीभुजे महीं सपत्नेन दुर्योधनेन जितां निवेदयिष्यतः। यो हि महीं भुक्तवांस्तस्याग्रे शत्रुणा भूमेर्वशीकरणवर्णनमनुजीविनां दुर्वचम्। स चरः कदाचित् महावाक् स्यात्। तत्कथं व्यथेत इत्याह- कृतप्रणामस्य। एतेन तस्यानुजीवित्वं दर्शितम्। अथवा राज्यं तवैव भविष्यतीति सूचनार्थं प्रणामस्तेन कृतः। यद्वाहं त्वद्दास एवेति प्रतिपादनार्थम्। दासत्वं प्रतिपादयतो हि तस्य वक्ष्यमाणोक्तिषु सह्यसम्भावनया प्रतिक्षेपः न भवति। यन्नाचलत्तद्युक्तम्। यतो ये हि तमिच्छन्ति ते मृषा कपटमसत्यं प्रियं वर्णयितुं नेच्छन्ति। यद्वा न निवेदयिष्यतः गोपयतः मनो न विव्यथे अपि तु विव्यथे यद्यप्यप्रियनिवेदने सति स्वामिभ्यो भीतिः

द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः।
स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे।।३।।

लघुटीका

धृतराष्ट्रसुतस्य वर्ण्यतां वृत्तम् इति युधिष्ठरराजादेशं प्राप्य स वनेचर इतीदृशीं वक्ष्यमाणां वाचम् आददे। अभिधास्यमानतया मनसाऽध्यवसायो वाचो ग्रहणम्। कथं भूताम्? विनिश्चितार्थाम्। विनिश्चितं प्रमाणपरिच्छिन्नोऽर्थो यस्याः सा तथा तां विनिश्चितार्थाम्। अवितथाभिधेयाम्। पुनः कथं भूताम्? सौष्ठवौदार्यविशेषशालिनीम्। सौष्ठवं शब्दचारुता, अदीनता च। औदार्यं महार्थता। विशेषा अश्लिष्टतादयः प्रेक्ष्या गुणास्तैः शालते श्लाघते तच्छीला। तां सौष्ठवौदार्यविशेषशालिनीम्। कथं भूतान् भूभृतः। विघाताय विधातुमिच्छतः। द्विषो विहन्तुं विधित्सतः। शत्रून् विहन्तुं विधानमिच्छतः इत्यर्थः। कथमेवं द्विषामिति कर्मणि षष्ठी। विघातायेति क्रियायाम् उपपदे 'भाववाचिन'श्चेति घञ्। विधानक्रिया विघातक्रियार्था उपपदम्। तदन्तार्था'त्तुमर्थाच्च भाववाचिन' इति चतुर्थी। विधातुमिच्छत इति इच्छार्थे उपपदे समानकर्तृकेषु तुमिनिति तुमुन्। तेन द्विषो विहन्तुं विधित्सतः इत्ययमर्थोऽवतिष्ठते। केचित्तु द्विषां विघातार्थं विधातुमिच्छतः इति व्याचक्षते। एवं च यथोक्तलक्षणे परित्यागः कृतो

जोनराजटीका

सम्भाव्यते, तदा यदेव प्रियं तदेव तेषां चराः किं न वर्णयन्तीत्याशङ्क्याह- अहितैषिणो ये न हितम् इच्छन्ति। ते प्रियमसत्यं वक्तुम् इच्छन्ति। स पुनर्हितपरः प्रियम् असत्यं कथं वदेत्? व्यथभयचलनयोः इत्यस्य लिटि रूपम्।।२।।

वनवासित्वेन मूढत्वात् तस्य चित्तं निर्व्यथं न त्वन्यस्माद्धेतोरित्याह - सः चरः इतीदृशीं वाचमादधे[दे]ऽभिधास्यमानतया मनसा जग्राह। [आदधे]। आधानं ह्युत्पादनमिति पाठे अपूर्वोक्तियुक्तां वाचमभ्यधात्। सौष्ठवं शब्दचारुता। औदार्यम् अदीनता। ताभ्यां वा विशेषेण शालते शोभते ताम्। यद्वा सौष्ठवम् औदार्यं विशेषा अश्लिष्टत्वादयस्तैः शालते ताम् तथाऽसन्दिग्धाभिधेयाम्। भूभृतः सकाशात् रहस्यनुज्ञां प्राप्य मन्त्रभेदभयात् इति शेषः। यतो विधातुं विधानम् इच्छतः। किमर्थं ? द्विषां विघाताय शत्रूणां नाशार्थम्। विधातुम् इति समानकर्तृकेष्विति तुमुन्। इच्छतेः कर्माकाङ्क्षायां सकर्मकत्वे विधातुम् इत्यस्मात् कर्मणोऽन्यस्य कर्मणः प्रयोगाभावात् विधातुम् इत्येतदेव कर्म प्रयुक्तम्। 'धातोर्वा कर्मण' इत्यत्र सूत्रे

क्रियासु युक्तैर्नृप ! चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः।।४।।

लघुटीका

भवति। विशेषलक्षणं च अलङ्करणमिच्छति। यथा -

स्मरस्यदो दाशरथिर्भवन्न वा न मुञ्च नान्ताध्वनि तापहारिणम्।
पयोधिमाविद्धचलज्जलाविलं विलङ्घ्य लङ्कां निकषा हनिष्यति।।
पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः।
विगृह्य चक्रे नमुचिद्विषा वशी य इत्थमस्वास्त्यमहर्निशं दिवः।।

भट्टिकाव्यमखिलं च। न चेतदलङ्कारमिति वक्तुं युज्यते रहसि कृतेऽवसरे इत्यर्थः। ३।

अप्रियाख्यानेनाशङ्कमानः पूर्वमभयं याचते। अतोऽर्हसीत्यादिना यदहमसाधु अप्रियं साधु हितं च वक्ष्यामि ततः क्षन्तुम् अर्हसि। ततः कोपं कर्तुं नार्हसीत्यर्थः। अथ कथं साध्वेव नाचष्टे यतोऽभ्यर्थनमेव कर्तुं न यातीत्याह- हे नृप ! क्रियासु कर्मसु युक्तैर्व्यापारितैः अनुजीविभिः सेवकैर्यस्मात् प्रभवः स्वामिनो न वञ्चनीयाः। न विप्रलभ्याः। अतो हे नृप! मम अप्रियमपि अहितमप्याख्यास्यतो न कोपः कार्यः। [कथं भूताः प्रभवः।] चारचक्षुषः।

जोनराजटीका

चेच्छतेस्तुमन्तो धातुः कर्मत्वेन निर्दिष्टः क्त्वाणन्तुमां स्वार्थिकत्वात्। विघातायेति तादर्थ्ये चतुर्थी न वाच्या, यूपायदारु इतिवत् प्रकृतिविकार भाव एव चतुर्थी भवति। 'चतुर्थी तदर्थार्थबलिहितसुखरक्षितैरित्यत्र सूत्रे बलिरक्षितशब्दाभ्यां चतुर्थ्यन्तस्य समासविधानात्। न हि 'कुबेरबलिः' 'कुबेररक्षित' इत्यत्र प्रकृतिविकारभावः। ननु कुबेरबलिरित्यादौ सम्प्रदानचतुर्थ्येव समस्यताम्। तथा हि कुबेराय कल्प्यमानो बलिरित्यादौ बलिप्रभृतेः कर्मत्वप्रतीतौ तेनैव कर्मणा कुबेरादेरभिप्रीयमाणत्वम्। मैवम् सम्प्रदानसंज्ञ[ा]या अन्वर्थत्वात् कुबेररक्षित इत्यादौ त्यागाङ्गताया [अ !]भावात्। द्विषामिति कर्मणि षष्ठी। तदयमत्रार्थः - शत्रून् हन्तुं यद्विधानं तदिच्छतः भूपतेराज्ञां लब्ध्वाऽभ्यधात्।।३।।

राज्ञां विज्ञप्तिसमये भृत्यानामभयप्रार्थना युक्तेत्यभयप्रार्थनामाह - नृपेत्यामन्त्रणम्। साध्वसाधु वचः क्षमौचित्यसूचकम्। स्वामिभिः क्रियास्वरिवार्तान्वेषणेषु प्रयुक्तेः अनुजीविभिश्चारैः स्वामिनो न वञ्चनीयाः। अहितं मधुरं न श्राव्यं यतः। चर एव न तु स्वनेत्रं चक्षुर्येषां ते।

लघुटीका

चारा एव चक्षूंषि येषां ते चारचक्षुषः। मया हि चक्षुस्स्थानीयेन दर्शितेऽर्थे त्वया व्यवहर्तव्यम्। यदि वा भूतार्थमेव प्रियमाचक्षीय। तद्भवान् वञ्चितो विप्रलब्धः स्यात्। अथ कथं यत्प्रियं हितं च तन्नेत्याह- हितं मनोहारि च वचो दुर्लभम्। हितम् उदर्कपथ्यं कटुकौषधवत्। मनोहारि च प्रियम् अपथ्यम्, तदात्व एव सुखकारि। सुरसमपथ्यम्। अतो हितम् उदर्कपथ्यम्। मनोहारि च प्रियम्। एवं गुणत्रयोपेतं वचनं दुर्लभं कथञ्चिदपि न प्राप्यते। अतो हितम् उदर्कपथ्यं कटुकौषधवत् आदृतम्। मनोहारि तदात्वे सुखकारि परिणामापथ्यम्। तद्वचस्त्याज्यम्। अथ प्रिय एवाख्याने कथं वञ्चना भवति। उच्यते- नासौ निरीहो मुनिरिव वने वर्तते। किं तर्हि? द्विषो हन्तुं सम्प्रति विधानम् अपेक्षते। तच्च विपक्षव्यवहारानुरूपेण कर्तव्यं नान्यथा। एनमेवार्थं दर्शयितुं 'द्विषां विघाताय' इत्यादिविशेषणमुपात्तम्। प्रायेण सप्रतिपक्षा एव लोके वचनव्यक्तयो भवन्ति इति असाधु साधु च इति द्वयोपादानम्। यथा -

सन्तः सच्चरितोदयव्यसनिनः प्रादुर्भवद्यन्त्रणाः
सर्वत्रैव जनापवादचकिता जीवन्ति दुःखं सदा।
अव्युत्पन्नमतिः कृतेन न सता नैवासता व्याकुलो
युक्तायुक्तविवेकशून्यहृदयो धन्यो जनः प्राकृतः।।

तथा 'मया हि सा तपस्विनी कलहकुपितेन कुशीलवेन किमपि कथितं न कथितम् इत्यवज्ञापरमार्थम्'। 'स्नेहोचितेन विधिना परुषपरुषमभिधाय निर्भत्सितेति। एवमन्यत्रापि बहुलं समाचर। चारचक्षुष इति।

गावः पश्यन्ति गन्धेन वेदैः पश्यन्ति ब्राह्मणाः।
चारैः पश्यन्ति राजानः चक्षुर्भ्यामितरे जनाः।।

जोनराजटीका

यद्वा क्रियासु विशिष्टेषु व्यापारेषु चारदृष्टयः स्वामिनो युक्तैः समाहितैश्चरैः प्रभवः न वञ्चनीयाः। एतेन अहं युक्तोऽस्मीति सूचितम्। अतो वञ्चनांनर्हत्वान्मया वक्ष्यमाणमसाधु साधु वा सोढुमर्हसि। यद्वार्थयुक्तत्वात्त्वमर्हसि इति योज्यम्। साध्वेव किं नोच्यते इत्याक्षेपमाशङ्क्याह- हितं प्रियं च वचो दुर्लभम्। अतः साध्वसाधु वा वचः सोढुमर्हसि इति योज्यम्। मयाऽप्रियमेव श्रुतम् इत्यर्थे विश्रान्तिः।।।४।।

स किंसखा साधु न शास्ति योऽधिपं हितं न यः संशृणुते स किंप्रभुः।
सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः।। ५।।

लघुटीका

अथ यदि त्वमेव तदपि प्रियमिति मन्यसे तत् किं तेनोदितेन इत्याह- योऽधिपं स्वामिनं साधु हितं न शास्ति न विज्ञापयति स किंसखा नैव सखेत्यर्थः। कुत्सितः सखा किंसखा। यस्मात् सख्युरयमवश्यव्यापारो यत् हितानुशासनम् <इति>। यदि त्वं सख्यादप्रियमपि हितम् आत्थ तत् किमित्यहमप्रियं शृणुयाम् इत्याह - हितादनुकूलादनुजीविनो न यः संशृणुते सम्यक् न शृणोति नाङ्गीकरोति च। सोऽपि किं प्रभुर्भवति? नैव स प्रभुरित्यर्थः। कुत्सितः प्रभुः किंप्रभुः। तस्मादवश्यमेव मया तव हितं वाच्यम्। त्वया च तच्छ्रोतव्यम्। हि यतः। सदा सर्वकालं ये स्वाम्यनुजीविनः परस्परानुकूलाः परस्परहितकारिणः तेषु सर्वसम्पदो रतिं कुर्वन्ति। सदैव सर्वाः समृद्धयो धृतिं बध्नन्ति। साभिलाषमवतिष्ठन्ते। संशृणुत इति समो गमृच्छिभ्याम् इत्यादिनात्मनेपदम्। अनुजीविनि गौरविनि राजानो व्यवहरन्ति सख्येन। अधिपातीत्यधिपः। ५।

जोनराजटीका

यद्यप्रियं त्वया श्रुतं तदा तव तच्छ्रावयित्वा मम च तच्छ्रुत्वा किं फलमित्याह - यः स्वामिनं साधु न शास्ति युक्तं न ब्रूते सः किंसखा कुत्सितं मित्रम्। किमा[मः]क्षेपे इति समासान्ताभावः। स सखा किं भवति इति योज्यम्। हितात् भृत्याद्यो न संशृणुते सः प्रभुः किं भवति, न किञ्चिदित्यर्थः। यः साधु शास्ति सः एव भृत्यः, यश्य हिताच्छृणोति स एव प्रभुरित्यर्थादापतितम्। न केवलं स्वामिभृत्ययोरन्योन्यशुद्धयोर्यशोमात्रमेव भवति यावच्छ्रीश्च सन्निधत्ते इति दर्शयितुमाह- नित्यमनुकूलेषु राजसु सचिवेषु च सर्वसमृद्धयो रतिं सक्तिं कुर्वते। सचिवैरपथान्निवर्तितेन राज्ञा लब्धविभवातिशयेन सता सचिवेष्ववश्यं प्रसादौन्मुख्यश्रवणात्। उत्तरार्धपूर्वार्धयोः हेतुहेतुमद्भावः। भक्तेनानुजीविना यथास्थितमेव स्वामी श्रावयितव्य इति तात्पर्यम्।।५।।

निसर्गदुर्बोधमबोधविक्लवाः क्व! भूपतीनां, चरितं! क्व जन्तवः।
तवानुभावोऽयमवेदि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषाम्।। ६।।

लघुटीका

न चाहमविज्ञायैव विपक्षचरितं कर्णकटु अभिदधे। अपि तु मया द्विषां नीतिपथः सम्यक् अवगतः इत्येवमनौद्धत्यपूर्वकं वक्तुमाह- यन्मया विद्विषां सम्बन्धि नयवर्त्म ज्ञातम् अवेदि। तदयं तवानुभावः। तव प्रभावः। तवैवासौ बुद्धिविभव इत्याह- कुत एवम्। क्व इति महदन्तरे। क्व भूपतीनां चरितं, क्व जन्तवः। तवैवासौ बुद्धिविभव इत्याह। [कुतो वैषम्यमाह]। यस्माद् भूपतीनां राज्ञां चरितं व्यवहारो निसर्गतः स्वभावत एव दुर्बोधम्। जन्तवः सामान्याः मादृशा जनाः अबोधेन विक्लवाः अज्ञानोपहताः। अतश्च नृपचरितं ज्ञातुं दुःशक्यम्। अथ च मया जन्तुमात्रेणापि यदवेदि स तवानुभावः। तव प्रभावो भाग्यसम्पदुदितेत्यर्थः। [नयवर्त्म कथं भूतम् ?] निगूढम् अप्रकाशं तत्त्वं स्वरूपं यस्य तन्निगूढतत्त्वम्। एतन्नयवर्त्मनो दुर्ज्ञेयत्वे कारणम्। नयः षाड्गुण्यादिः, तस्य वर्त्म प्रयोगः। नयोनीतिः।। ६।

जोनराजटीका

भूपतीनां चरितं नीतिः क्व भवति? जन्तवः क्व भवन्ति? राजनीतेः जन्तूनां महदन्तरम्। जनैर्नृपाणां नीतिर्न ज्ञायते इत्यर्थः। विशेषणाभ्यामन्तरमुपपादयति - निसर्गेण गोपनेन विना दुर्बोधम् अबोधेन बोधविपर्ययेण विक्लवाः। स्वविषयेऽपि राजनीतिज्ञानाभावे प्रसक्ते सत्याह- मया यत् द्विषामपि नीतिमार्गोलक्षितोऽयं तव अनुभावः माहात्म्यं निगूढं गोपितं तत्त्वं रहस्यं यस्य तत्। त्वन्माहात्म्यान्न पुनः बुद्धिबलाच्चरितं लक्षितम् इति भावः। तवानुभावोऽयमवेदि यन्मयेत्यत्र निर्देश्यप्रतिनिर्देश्ययोरेकत्वम् आपादयन्ति। सन्ति सर्वनामानि तल्लिङ्गभाञ्जि भवन्ति इत्यदोषः। दुर्योधनेन भूमिर्वशीकृतेत्यनेन सूचितम्।।६।।

विशङ्कमानो भवतः पराभवं नृपासनस्थोऽपि वनाधिवासिनः।
दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः।। ७।।
तथापि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन् भूतिमनार्यसंगमाद्वरं विरोधोऽपि समं महात्मभिः।। ८।।

लघुटीका

भवतः सकाशात् पराभवमाशङ्कमानो नयेन नीत्या पुनर्जगतीं जेतुं स्वीकर्तुं समीहते आत्मीकर्तुम् इच्छति। दानमानाद्यावर्जिताः प्रजा निश्चलीभवन्ति। अल्पीयसोऽपि शत्रोर्भेतव्यम् इतीमां नीतिं दर्शयति। स नृपासनस्थोऽपि सिंहासनाधिरूढोऽपि भवतः। [कथं भूतान्?] वनाधिवासिनः क्वापि वने विजने वसतोऽपि पराभवम् आशङ्क्य नयेनैव वर्तते। [कथं भूतां जगतीम् ?] दुरोदरच्छद्मजिताम् दुरोदरं द्यूतं, छद्म च्छलं तेन जिताम् अर्जितां, न तु क्रमायातां न प्रजानुरागार्जितां किन्तु दुरोदरच्छद्मजिताम्। अत एव भवतः पराभवमाशङ्कते। ७।

विपक्षस्य नीतिप्रधानतां श्रुत्वा कदाचित् राज्ञो न व्यवसायः स्यात् इत्याह- एतदुक्तं भवति। यद्यप्यसौ सम्प्रति प्रयोजनापेक्षतया नयमाश्रयते, तथापि तत्त्वतो जिह्मः पापिष्ठ एव सः। नहि प्रकृतिरपह्नोतुं शक्या। तत्त्विदानीमेवोक्तं 'नयेन जेतुं जगतीं समीहते'<इति>। भवज्जिगीषया भूतिं समुन्नयन् गुणसम्पदा यशः तनोति। केवलं सम्प्रति श्रियं वर्धयितुकामेन त्वामभिभवितुम्। तेन गुणानुरागिता समाश्रिता। प्रकृत्या पाप एव सः। त्वयि गुणराशौ सति

जोनराजटीका

तत्राहं वनस्थः किं कर्तुं शक्त इत्यतः वार्ताश्रवणमात्रेऽपि राज्ञोऽनादरमाशङ्क्योत्साहमुत्पादयितुमाह- सुयोधनो नयेन सामादिना जगतीं भूमिं जेतुं चेष्टते। दुरोदरेऽपि च्छद्मना च्छलेन जितां छलजितस्य स्थैर्याभावाच्छलरहितया युक्त्या वशीकर्तुमारभते इत्यर्थः। यतो भवतः सकाशात्पराभवं राज्यहरणादिकं शङ्कमानः स सिंहासनस्थो भवतो वनस्थादपि। त्वदुद्योगप्रतीक्षैव राज्यप्राप्तिरिति तात्पर्यम्।।७।।

तमेव नयमाख्यातुमाह- यद्यपि भवच्छङ्कया स नयचेष्टां प्रकाशयति तथापि जिह्मः कुटिलः स्वभावस्य त्यक्तुमशक्यत्वात्। सः दुर्योधनो गुणानां सौजन्यौदार्यादीनां सम्पदाकरणभूतया भवज्जिगीषया हेतुभूतया यशस्तनोति। युधिष्ठिरादधिको जनानुरागो

कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना।
विभज्य नक्तंदिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम्।। ९।।

लघुटीका

निर्गुणस्य तस्य श्रीः वर्धते इति मन्यमानो गुणवानिति जगति यशः प्रथयतीत्यर्थः। अत्रैव विस्मयमानोऽर्थान्तरं प्रयुङ्क्ते- अनार्यसङ्गमादिति। अनार्यसंगमात् अनार्यैः दुर्जनैः सह सङ्गमो मैत्री। ततः सज्जनैः सह यो विरोधोऽपि द्वेषोऽपि प्रशस्यतरः। स विरोधोऽपि वरम् उत्कर्षहेतुत्वात्। अनार्यसङ्गम-महात्मविरोधसमुदायद्वारेण गुणेन विभज्यमानो विरोधो निर्धार्यते। तेन पञ्चमीविभक्तिः। सामान्यविशेषाणां भिन्नलिङ्गानामपि सामानाधिकरण्यं दृश्यते। यथा 'द्विगुरेकवचनम्' 'याच्ञा वन्ध्या वरमधिगुणे नाधमे लब्धकामा'। एवं 'वरं विरोध' इति। शुभ्रं निर्मलम्। जिगीषया इति हेतौ तृतीया। गुणसम्पदेति करणे। गुणसम्पत् गुणभूयस्त्वं प्रकर्षश्च। गुणा दाक्षिण्यादयो वदान्यतादयः। ८।

यदि नीतिमेवावलम्बितवान् तदा पौरुषहीनस्य सम्यक् प्रजा न वर्तन्ते इत्याह - तेन सुयोधनेन नयेन पौरुषं वितन्यते नयानुगतं पौरुषं तेन वितन्यते। न केवलो नयो नापि केवलः पुरुषकार इत्यर्थः। अविनीतस्य नय एव नोपपद्यते। यतो नयस्य विनयो मूलमित्याह। षट्संख्यो वर्गः, षण्णां वा वर्गः षड्वर्गः। अरीणां षड्वर्गः। अरिषड्वर्गः। कृतः अरिषड्वर्गजयो

जोनराजटीका

यथा मयि भवति तथा कीर्तिमर्जयति इत्यर्थः। यद्वा तथापि पराभवशङ्कया ज्ञातस्वसामर्थ्याभावोऽपि जिह्मः यथा तथा तेन प्रकारेण द्यूतच्छलादिना जिह्मोऽपि स यशस्तनोति। जिह्मानां यदन्तस्तन्न जिह्वायाम्। यतो भूतिं लक्ष्मीं समुन्नयन् छलहरणादधःकृतामपि श्रियमुद्धर्तुकामः। यदि स्वभावजिह्मो नित्याश्रितान् दुर्जनान् कथं जिगीष[ा]मात्रात् परिहरतीत्याह - महात्मभिः सह विरोधोवरमुत्कृष्टः। [कस्मात्?] अनार्याणां नीचानां सङ्गमात् महद्भिः सह विरोधेन यथा यशः स्फुरति न तथा नीचसङ्गमेनेत्यर्थः। यद्वा समुन्नयन्नित्युत्तरार्धे हेतुतया लक्षणतया वा योज्यम्।।८।।

केवलं नयप्रयोगाख्यानेन दुर्योधनस्य कातर्यप्रतिपादनमाशङ्क्याह - नयः शास्त्रानुसारेण प्रवर्तनम्। नयेन सह तेन पौरुषं वितन्यते। [किं कृत्वा?] विभज्य नयपौरुषयोर्विभागं कृत्वा। अस्मिन् विषयेऽस्मिन् काले नयो युक्तः पौरुषं वेति विचार्येत्यर्थः। अस्ता त्यक्ता तन्द्रिरालस्यं,

सखीनिव प्रीतियुजोऽनुजीविनः समानमानान्सुहृदश्च बन्धुभिः।
स सन्ततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बन्धुताम्।। १०।।

लघुटीका

येन स तथाविधः। कामक्रोधलोभमानमदहर्षा अन्तरीयाः षट्- शत्रवः। एतेन जितेन्द्रियतोक्ता। इन्द्रियजय एव विनयो विनयो हि इन्द्रियजय इति वचनात्। कथमसाङ्कर्येणानेकविधकार्यानुष्ठानम्। षोडशधा नक्तंदिवं विभज्य वितन्यते इति सम्बन्धः। नक्तंदिवं कृत्यविभागात्तदधिकरणस्य नक्तंदिवस्यापि विभागः। अस्ता तन्द्रिर्येन स अस्ततन्द्रिः। तेनास्ततन्द्रिणा। अथवा अस्ता तन्द्रिणस्तन्द्रावन्तः पुरुषा येन स अस्ततन्द्री। तेन अस्ततन्द्रिणा। एतेन दाक्ष्यमप्युक्तम्। तच्च नक्तंदिवाभागे हेतुः। [पुनः कथंभूतेन ?] मनोरियं मानवीया। अगम्यरूपा प्राप्तुमशक्यस्वभावा पदवी तां प्रपित्सुना प्राप्तुकामेन। कथमहममुना सह गत्याचारेण समो भवामि। नयसहितं पौरुषं तेन वितन्यते इत्यर्थः। तन्द्रिशब्द इदन्तोऽपि विद्यते इत्याहुः।९।

नयपौरुषसम्पन्नः कदाचित् स उपाश्रितान् अ[व]मन्येत। एतदपि नेत्याह - स प्रीतियुजः स्निग्धान् अनुजीविनो भृत्यान् सखीनिव मित्राणीव दर्शयते पेशलतयाऽऽनुकूल्यमाचरति। तथा सुहृदो मित्राणि बन्धुभिः सदृशमानान् दर्शयते। बन्धुतां बन्धुवर्गं च। कृताधिपत्यामिव।

जोनराजटीका

तन्द्रिणोऽलसा वा येन पौरुषमाहात्म्यादिति भावः। तथा कृतोऽरिषड्वर्गस्य मदमदनादेर्जयो येन नीतिमाहात्म्यादिति भावः। यतो मानवीं मनुराजसम्बन्धिनीं पदवीं नीतिं प्रपित्सुनाप्राप्तुमिच्छुना। आलस्यं कामादिव्यसनं च परित्यज्य जेतुमेव यतते इत्यर्थः। अगम्यरूपाम् इति। तसिलादित्वाद्रूपप्रत्यये ह्रस्वः।।९।।

विनयविशेषं वक्तुमाह। सखिषु प्रीतिः बन्धुषु मानः। स्वामिन्याधिपत्यं युक्तम्। सोऽनुजीविनः सेवकान् सखीन् इव प्रीतियुजः प्रीतिपात्राणि सम्यग् दर्शयते। सभासु

लघुटीका

कृतम् आधिपत्यं यया सा कृताधिपत्या। अनुजीविनः सखाय इव, विश्रम्भातिशयात् तस्मिन् वर्तन्ते। तान् तथा वर्तमानान् संयुङ्क्ते। यतोऽनुजीविनो मित्राणीव, मित्राणि च बन्धूनिव, बन्धून् प्रभूनिव स पश्यति इत्यर्थः। कथं राजा सन् अनुजीव्यादिष्वेवं वर्तते इत्याह- [कथं भूतः?] सः गतस्मयः। अस्मयो निगर्वः। सन्ततं सर्वकालमेवं वर्तते, न तु तथा पौरुषसम्पन्नस्य प्रकृत्यपमानननाशङ्का नैवं युक्ता। षाड्गुण्यकौशलेनैव केवलेन व्यवहरतां प्रायेण पदातीन् प्रत्यनादरता भवतीति युक्ता आशङ्का। एतेन प्रकृतिरञ्जनं दर्शितम्। दर्शयते इति णिचश्चेत्यात्मनेपदम्। न तु णेरणाविति तस्य कर्मकर्तृविषयत्वात्। तथा च आरोहयते हस्ती स्वयमेवेति कर्मकर्तर्युदाहरणम्। तदुक्तम् 'अणौ यत्कर्म णौ चेत् तदेव कर्म न कर्मान्तरम्। यदेव च कर्म स एव कर्ता। न कर्तेतत्। निरूप्यमाणम्। यदि परं तदेव कर्म नान्यदिति' इत्यर्थः। अत्र च राज्ञोऽन्यत्कर्मास्तीत्यनुजीव्यादि। एतच्च लभ्यते न्यायाद्यत्तदोर्नित्याभिसम्बन्धयोराक्षेपणावधारणात्। बन्धुसमूहो बन्धुता, ग्रमजनेत्यादिना [ग्रामजनबन्धुभ्यस्तल] तल्। ततः साधुशब्देन कर्मधारयः।१०।

जोनराजटीका

सेवकानां सखिवत् प्रीतिं करोतीत्यर्थः। एवं सति सखीनां वैराग्यं तस्मिन्नापतति इत्याह- स सुहृदो बन्धुभिः सदृशमानान् दर्शयते। एवं सति बन्धुभ्योऽपकीर्त्यापत्तिरित्याह - सः बन्धुतां बान्धवसमूहं कृतस्वाम्यमिव दर्शयते। स्वामिवद्बन्धून् सेवते इत्यर्थः। निरभिमानताप्रसङ्गमाशङ्क्याह - गतस्मयः। गत इव स्मयोऽभिमानः यस्य सः। सख्यादीनां गुणानल्पानपि बहूनिव मन्यते इत्यर्थः। दर्शयते इत्यत्र णिचश्चेत्यात्मनेपदम्। पश्यति इति प्रयोक्तव्ये दर्शयते इत्यस्य प्रयोगात् अन्येषाम् एव दर्शयते न तु स्वयं पश्यति इति गूढतया सर्वानेव वञ्चयतीत्यर्थः।।१०।।

असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपातया।
गुणानुरागादिव सख्यमीयिवान्न बाधतेऽस्य त्रिगणः परस्परम्।११।

लघुटीका

तथापि विजिगीषुः सन् अरिवर्गपराङ्मुखो यतो हि विजिगीषूणां प्रायेण त्रिवर्गोपभोगशून्यता दृष्टा इत्याह - त्रयाणां धर्मार्थकामानां गणः समुदायोऽस्य सम्बन्धी परस्परं न बाधते न पीडयति। न धर्मोऽर्थकामौ बाधते। न कामोऽर्थधर्मौ, न चार्थो धर्मकामौ। अन्यतमासक्त्या भवितव्यं बाधयेत्याह। [अस्य किं कुर्वतः ?] समपक्षपातया भक्त्या आराधयतः। [कथं?] यथायथं यथास्वं विभज्य अस्य आराधयतः। धर्मार्थकामानां यो यस्योपभोगकालो निर्दिष्टस्तदा तं सदृशानुरागेण तुल्याभिलाषेण सेवमानस्य इत्यर्थः। [कथम्] असक्तम् अविद्यमानः सङ्गो यत्र तत्। असक्तम् इति क्रियाविशेषणम्। अवश्यं कर्तव्यतया अव्यसनितया आराधयत इत्यर्थः। उक्तं च

धर्मार्थकामाः सममेव सेव्या यो ह्येकसक्तः स नरो जघन्यः।। इति

विरोधोऽस्यपरस्परं न बाधते इत्यत्रोत्प्रेक्षा। [कथं भूतः त्रिवर्गः]। गुणानुरागादिव सख्यम् ईयिवान्। तेषां हि स्वामिनि गुणैर्दाक्षिण्यादिभिरनुरागो भवति। ते अन्योन्यविरुद्धा अपि तदर्थसिध्यर्थं सख्यं भजन्ते। सख्युः कर्म सख्यम्। सख्युर्यः। परस्परशब्दस्य द्वितीयैकवचनान्तस्य कर्मव्यतिहारे 'सर्वनाम्नो द्वे भवत इति वक्तव्यम्'। 'समासवच्च बहुलम्'। यदा न समासवत् प्रथमैकवचनम्। तथा 'पूर्वपदस्येति' 'द्विवचनादि'ति 'परस्परोपपदाच्चेति वक्तव्यम् इति' निर्देशात्। विसर्जनीयस्य सकारे कृते परस्परमिति रूपम्। अव्यसनित्वं चानेनोक्तम्। ११।

जोनराजटीका

त्वज्जिगीषावशाद्यशसि प्रवृत्तो धर्मार्थकामांस्त्यजतीत्याशङ्क्याह - अस्य सख्यमीयिवानेतं सेवत इत्यर्थः। त्रयाणां धर्मार्थकामानां गुणो वर्गः परस्परम् अन्योन्यं न बाधते धर्मादीनां मध्यादेकोऽन्यं न बाधते इत्यर्थः। अबाधने हेतुमाह - यथायथं यो यस्य स्वदेशः कालो वर्गः वा तं विभज्य त्रिगुणमसक्तं निस्सङ्गमाराधयतः। [कया?] हेतुभूतया समपक्षपातया भक्त्या। समः पक्षपातो यया। धर्मार्थकामाः सममेव सेव्या इति विभिवाक्यदर्शनात् धर्मादयः सममनुष्ठेया भवन्ति। अत्र हेत्वन्तरमुत्प्रेक्षते- गुणानुरागादिव धर्मादिसम्बन्धिषु

निरत्ययं साम न दानवर्जितं न भूरि दानं विरहय्य सत्क्रियाम्।
प्रवर्तते तस्य विशेषवर्तिनी गुणानुरोधेन विना न सत्क्रिया।। ।१२।

लघुटीका

अनेन चेदानीम् उपायचतुष्टयस्य कौशलं दर्शयति निरत्ययामिति श्लोकत्रयेण तस्य सुयोधनस्य मृदूदारतीक्ष्णमानियशोऽर्थिषु निरत्ययं निर्बाधं साम। ये तर्हि खलु खलक्लीबलुब्धक्षीणादयस्तेषु किं साम्नेत्याह- [कथं भूतं साम ?] न दानवर्जितम्, किं तु दानसहितं साम वर्तते। न दानमपि तस्यापदे प्रवर्तते इत्यर्थः। न च दानशौण्डतया तस्य कोशक्षय आशङ्क्यते। यतः सत्क्रियां विरहय्य तस्य भूरि प्रभूतं दानं न वर्तते। यत्र सत्क्रिया यत् सत्क्रियार्हं पात्रं तत्र भूरि ददातीत्यर्थः। अन्यत्र पुनः तावन्मात्रमेव परिमितं ददाति। सत्क्रियापि यदि तस्य सर्वत्र प्रवर्तते ततोऽपि च अर्थव्ययः स्यात् इत्याह - गुणानुरोधेन गुणगौरवेण विना तस्य सत्क्रिया न प्रवर्तते। कथं गुणान् अनुवर्तमान एष सपर्यामारभते नान्यथेत्याह- विशेषवर्तिनी। विशेषेण प्रवर्तते शालते विशेषाश्रिता। विशेषो गुणवत्ता। तत्र प्रवर्तते। या किल विशेषाश्रिता सा कथं सर्वत्र प्रवर्तते ? एतेन साम दानं प्रतिपादितम्। १२।

जोनराजटीका

गुणेष्वनुरागादिव धर्मादीन् सेवते इत्यर्थः। यद्वा 'इव' शब्दः सख्यमीयिवानित्यनेन योज्यः। समपक्षपातया भक्त्याऽराधनं धर्मादित्रिगुणस्य परस्परमबाधने हेतुः। गुणेन उपकारेणानुरागादिव सख्यमीयिवानिति योज्यम्। यदि वयमेवं विध गुणविशिष्टेऽप्याश्रये वैरमेवान्योन्यं कुर्मः तदा लोकोऽस्मान् निन्दतीति विचार्येव कृतसख्यः संस्त्रिगुणोऽन्योन्यं न बाधते इत्यर्थः।।११।।

सामदानसत्क्रियाणां प्रयोगस्य शास्त्रनिर्दिष्टस्थानान्तरसंभवेऽपि गुणवत्स्वेव सामादिप्रयोगात्तस्य गुणेषु पक्षपातं सूचयितुमाह - तस्य साम सन्धिर्दानवर्जितं न प्रवर्तते। दानसहितमेवेत्यर्थः। निरत्ययं स्थिरम्। तथा तस्य दानं कर्तृ सत्क्रियां सत्कारं त्यक्त्वा न प्रवर्तते। संमानसहितमेवेत्यर्थः। लुब्धः करोति सम्मानमधिकं दानवर्जितमित्याशङ्क्याह- भूरि बहुलं तथा सत्क्रिया सम्मानं गुणानुरोधेन विना न प्रवर्तते। विशेषवर्तिनी विशिष्टसत्क्रियामात्रं गुणैरपि विना न करोतीत्यर्थः।।१२।।

वसूनि वाञ्छन्न वशी न मन्युना स्वधर्म इत्येव निवृत्तकारणः।
गुरूपदिष्टेन रिपौ सुतेऽपि वा निहन्ति दण्डेन स धर्मविप्लवम्।१३।

लघुटीका

इदानीं दण्डं दर्शयति- स सुयोधनो दण्डेन दण्डाख्येन उपायेन धर्मविप्लवं निहन्ति धर्मबाधां निवर्त्तयति। [किं कारणेन?] केनचित् रागादिद्वेषादिना स्यादित्याह - [कथं भूतः स इति?] अस्मात् कारणात् निवृत्तकारणः। निवृत्तम् अपगतं कारणं निमित्तं यस्य सः। [किमर्थं?] तर्हि निर्निमित्तमेव धर्मबाधां निवर्त्तयति। स्वधर्म इत्येव। स्वधर्मो ममायमित्येवमित्यर्थः। निष्कारणमेवायं धर्मो राज्ञां यद्वर्णाश्रमपरिरक्षा नाम। न ह्यवश्यकर्तव्ये कारणान्तरमपेक्षते सन्ध्योपासनादाविव। तदेव कारणं निमित्तं दर्शयति- न वसूनि वाञ्छन् सन् मन्युना वा। नार्थकामौ न च वैरायमाणदण्डस्य विषयमाह- रिपौ शत्रौ सुतेऽपि पुत्रेऽपि वा। विषयेण दण्डेन। [कथंभूतेन?] गुरुणा धर्मशास्त्रविदा द्विजेन उपदिष्टेन कथितेन दण्डेन, न स्वमनीषापरिकल्पितेन। [कथम्?] निवृत्तलोभद्वेषकारणोऽसाविति आह। [कथंभूतः सः?] वशी जितेन्द्रियः। यदि वा कथमेवं तस्य कथत इत्याह। एवं सर्वेषामीष्टे येन दण्डकारणमन्येषां लोभद्वेषौ। तस्य तु धर्मविप्लव एव कारणम्,धर्मसंस्थापनार्थमेव दुराचारानरीन् च्छिनत्ति स नेतरान् इत्युक्तं भवति। १३।

जोनराजटीका

गुणानुरागमेव स्वमण्डलद्वारेणोपोद्बलयति- स दुर्योधनो धर्मविप्लवमपथगमनं निहन्ति निवारयति। [केन?] गुरुः स्मृतिज्ञः पुरोहितस्तदुपदिष्टेन दण्डेन। [कस्मिन्?] शत्रौ सुते मि(पु?)त्रेऽपि वा। [कीदृशः] निवृत्तं कारणं गुरुवचनाग्रहणे हेतुरज्ञानाख्यो यस्यैवंविधोऽपि गुरुवाक्येनैव दण्डं दण्ड्येषु क्षिपति। स्वयं विदग्धोऽपि गुरुवचनमेवानुतिष्ठतीत्यर्थः। यतो वसूनि धनानि न वाञ्छन्। यतो वशी जितेन्द्रियः। लुब्धो हि गुरवचनमुल्लङ्घयतीति तथा। न मन्युना अन्ये राजानो ह्याज्ञोल्लङ्घनादिना रोषाच्छास्त्रमुल्लङ्घ्य दण्डं पातयन्ति। अयं तु न तथेत्यर्थः। अयं यद्यमन्युरलुब्धश्च तत्किं तस्य दण्डेनेत्याह- धर्मरक्षणार्थं दण्डपातनं क्षत्रियाणां स्वधर्म इत्यतो हेतोः। यद्वा निवृत्तं कारणं शास्त्रोक्तदण्डत्यागे हेतुर्लोभो रोषाख्यो यस्य सः। यतो धनानि न वाञ्छन् न च रोषेण। यद्वा लोभाभावे रोषाभावे च कारणं वैरागाख्यं निवृत्तमस्येति योज्यम्।।१३।।

विधाय रक्षान् परितः परेतरानशङ्कितताकारमुपैति शङ्कितः।
क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदन्ति सम्पदः ।१४।

लघुटीका

इदानीं भेदं दर्शयति- स शङ्कितोऽपि चकितोऽपि सन् अशङ्किताकारमुपैति। अशङ्कितं रूपं भजते। [किं कृत्वा ?] परितश्चतुर्दिक्षु आत्मानं परितो रक्षान् विधाय। रक्षन्तीति रक्षाः तान्। [किं भूतान् ?] परेतरान् परान् शत्रून् इतरयन्तीति परेतराः, तान् भेदोपायबलेन शत्रून् आत्मसात्कुर्वन्ति। तान् भेदविषये कुशलान् चारान् परितः सर्वतः स्वमण्डले परमण्डले वा भेद्येषु शत्रुषु चारान् विनियुज्य। सशङ्कोऽपि निःशङ्क इवास्ते इत्युक्तं भवति। अथ कथं परान् स्वीकृत्य सर्वत्रात्मनात्मानं रक्षतीत्याह - क्रियापवर्गेष्विति। तस्य सम्यक् कृतं कार्यं न निष्फलं भवति। कृताकृतज्ञोऽसौ। न च सामवचसैव कृतकार्याननतिवाहयतीति। [किं तर्हि ?] क्रियापवर्गेषु क्रियानिष्पत्तिषु अनुजीविसात्कृताः प्रसादीकृताः अनुजीव्यधीनाः कृताः सम्पदो धनसमृद्धयोऽस्य कृतज्ञतां वदन्ति। अनुजीविनां स्वत्त्वं प्रापिता धनसम्पद इत्यर्थः। तदधीनवचन इति सातिः। एतेन चास्य भेदोपायः प्रयोगनैपुण्यं कृतवेदित्वं चापि दर्शितम्। अनुजीविनः कृतज्ञे राजनि सर्वात्मना हिते प्रवर्तन्ते। १४।

जोनराजटीका

मन्त्रगुप्तिरेव राज्यरक्षाकारिणी प्रसिद्धा। सा च तस्यास्तीत्याह- शत्रूणामुदये शङ्कितः स दुर्योधनः अशङ्कितस्याकारं हसन्मुखत्वमुपैति नाटयति। चित्ते तु तस्य शङ्कैवेत्यर्थः। [किंकृत्वा]परानितरयन्ति भेदप्रयोगेण स्वतामापादयन्ति, एतान् परेतरान् रक्षकान् विधाय। परेभ्य इतरे इति वा विग्रहः। यद्वा परे चेतरे चेति वा विग्रहः। परे प्रथमं ये शत्रुसेवकास्ततो बुद्धिबलेन स्वीकृतास्ते हि पूर्वस्वामिनो भावज्ञा इतरे स्वसेवकास्तान् रक्षान् विधायेति व्याख्येयम्। रक्षार्थं सह प्रयुक्ताः प्रथमं ते शत्रुसेवकाः स्वे सेवकाश्च साध्यं सम्यक् साधयन्ति। यद्वा शत्रुदुर्गादेः रक्षान् रक्षकान् परेतरान् भेदोपायेन स्वकान् कृत्वा। नन्वेवं सत्ययं लुब्धः स्यात्। दातुमशक्तो हि सेवककृतेषु कर्मस्वनादरं करोत्यत आह - यदर्थं परेऽपि स्वीकृतास्तासां क्रियाणामपवर्गेषु निष्पत्तिषु सत्स्वनुजीविसात्कृताः भृत्याधीनाः कृताः सम्पदोऽस्य कृतज्ञतां वदन्ति। कार्येषु सम्पादितेषु सत्सु प्रसादं करोतीत्यर्थः।।१४।।

अनारतं तेन पदेषु लम्भिता विभज्य सम्यक् विनियोगसत्क्रियाः।
फलन्त्युपायाः परिबृंहि(घ)यतीरुपेत्य संताहर्षमिवार्थसम्पदः।१५।
अनेकराजन्यरथाश्वसङ्कुलं तदीयमास्थाननिकेतनाजिरम्।
नयत्ययुग्मच्छदगन्धिरार्द्रतां भृशं नृपोपायनदन्तिनां मदः।१६।

लघुटीका

पूर्वनिर्दिष्टसामाद्युपायप्रयोगफलं दर्शयितुमाह- पदेषु स्थानेषु विनियोगः। स एव सत्क्रिया। तां लम्भिताः प्रापिताः सन्तः सामादय उपायाः सततम् अनारतं अर्थसम्पदः अर्थसमृद्धीः फलन्ति। सम्यक् विभज्य न साङ्कर्येण नापि व्यत्ययेन विनियुक्ताः। यथाप्रस्तावं विभज्य विनियुक्ता इत्यर्थः। [कथंभूताः?] परिबृंहिताः प्रगुणीकृता गुप्तफलदायिनी। आयतिः आगामी समय उत्तरः कालो याभिः तास्तथा सम्भूता अर्थसम्पदः। अनुपायेन हि उपायं विना सिद्धोऽर्थो यः सः तदात्व एव सुखकारी न आयतिं पुष्णाति। अत्र साम्ना प्रयुक्तेन अस्य राज्य इयान् अर्थः साधितः। इत्यन्यत्र यथोचितस्थाने विनियुक्ता दानभेददण्डा अपि संहर्षमिव उपेत्य स्पर्धामिव कृत्वा परस्परमधिकाधिकतरा अर्थसम्पदः फलन्ति इत्यत्रोत्प्रेक्षा। सामादीनां पदानि पूर्वमुक्तानि। दृढवैरशठक्रूरा दण्डपदम् अन्यायकारिणः।१५।

उपायचतुष्टयसाधितामेवार्थसम्पदं स्वरूपेण दर्शयितुमाह- उपायनं च ते दन्तिनश्च। नृपैः राजभिः ढौकिता ढौकनिकार्थं दन्तिनां गजानां सम्बन्धी मदः तदीयम् आस्थाननिकेतनाजिरं

जोनराजटीका

उपायाः सामादयोऽर्थसम्पदः फलन्ति। सामादिप्रयोगेणास्य धनागमो भवतीत्यर्थः। परिबृंहिता वर्धिताऽऽयतिरुत्तरः कालो याभिस्ताः। अत्रोत्प्रेक्षते - सङ्घर्षं स्पर्धामिव प्राप्य। स्पर्धावद्भिः हि परस्पराधिकं कर्म क्रियते। तेन पदेषु स्थानेषु सम्यग्युक्ततया विभज्य विनियोगः प्रयोग एव सत्क्रिया सत्कारः। तां प्रापिताः। सत्कृताश्च स्वामिनः कार्यं सम्यक् साधयन्ति। यद्वा यतीर्गत्वरीरपि परिबृंहिताः।।१५।।

अर्थसम्पदां प्राप्तिं सामान्येनोक्त्वा विशेषेणाह- नृपाणामुपायनानि ढौकनानि च ते दन्तिनस्तेषां मदस्तदीयमास्थानगृहाङ्गनमार्द्रतां नयत्यार्द्रीकरोति। न केवलं हस्तिन एवोपायनीकृता

सुखेन लभ्या दधतः कृषीवलैरकृष्टपच्या इव सस्यसम्पदः।
वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन्कुरवश्चकासति।१७।

लघुटीका

सर्वावसरसभामण्डपाङ्गणम् आर्द्रतां नयति। एतेन निरन्तरागम्यमानगजादि-ढौकनिकाभिरुपायन फलं निवेदितम्। [किंभूतम्] अनेकस्य राजन्यकस्य रथाश्वैः सङ्कुलं सम्बन्ध(द्धम्?)म् आस्थानं राज्ञः सभा तस्य निकेतनं मण्डपस्तस्याजिरमङ्गणम्। [किं भूतो मदः ?] अयुग्मच्छदस्य सप्तच्छदस्येव गन्धो यस्य स तथा। उत्पूतिसुरभिभ्यो गन्धादिच्। १६।

न केवलमसौ स्वार्थसिद्ध्यर्थमेव यतते यावज्जनपदक्षेमार्थम् इत्याह- तस्मिन् राजनि क्षेमं वितन्वति होमदानैः आतङ्कादीतिबाधां च नाशयति सति चिराय चिरकालं यावत् कुरुवः कुरुदेशाश्चकासति भृशं शोभन्ते। [किं भूताः?] सस्यसम्पदो दधतः। सस्यसमृद्धीर्धारयन्तः। [किं भूताः सस्यसम्पदः?] कृषीवलैः सुखेन लभ्याः कर्षकैरक्लेशेन प्राप्तुं शक्याम् इति। शकि च कृत्याः इति यः। [पुनः किं भूताः?] सस्यसम्पदः उत्प्रेक्ष्यन्ते अकृष्टपच्या इव। अनुप्तपक्वा इव। एतेन सुखलाभेऽतिशयोक्तिः। [किं भूताः कुरवः ?] अदेवमातृकाः। कुल्याम्बुजीविनः। यथा काश्मीरादध इति। 'नाभ्यस्ताच्छतुरि'ति नुमभावः। वितन्वतीति 'यस्य च भावेनेति' सप्तमी। चिरायेति निपातश्चिरमित्यर्थः। कुरोरपत्यानि 'कुरुनादिभ्यो ण्यः'। तेषां निवासो जनपदः इति अणि कृते 'जनपदे लुबिति' अणो लुप्। १७।

जोनराजटीका

यावदनेकेषां राजन्यानां रथाश्वेन सङ्कीर्णम्। हस्त्यश्वरथादिढौकनीकृत्य राजानो द्रष्टुकामास्तदङ्गने प्रतीक्षन्ते इत्यर्थः। अयु [ग्म]च्छदवद्गन्धोऽस्येति उपमानाच्चेतीत्।।१६।।

न केवलं राजैव धनपतिः, प्रजा अपि धनवत्य इत्याह - यस्मिन् क्षेममर्जितार्थरक्षां वितन्वति सति कुरवो जनपदविशेषाश्चकासति दीप्यन्ते। [कथं?] तैर्धनमर्जितम् इत्याह- कृषीवलैः करणभूतैः सस्यसम्पदो दधतः। अत एव सुखेनायासं विना यद्वा कृषीवलैः सुखेन लभ्या यतोऽदेवमातृकाः न देव इन्द्रो माता यासां ता नदीमातृका इत्यर्थः। अत्रोत्प्रेक्षते- अकृष्टपच्या इव यथा शृङ्गारादयः। ते हि स्वयमेव फलन्ति। कृष्टपच्येति साधुः <राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः ३-१-११४ सूत्रात् क्विबन्तनिपातः>।।१७।।

उदारकीर्तेरुदयं दयावतः प्रशान्तबाधं दिशतोऽभिरक्षया।
स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी।१८।

महौजसो मानधना धनार्चिता धनुर्भृतः संयतिलब्धकीर्तयः।
न संहतास्तस्य न भिन्नवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहित।१९।

लघुटीका

यो हि राजा जनपदोपतापी दरिद्रजनपदो वा स शत्रूणां सूच्छेद्यो भवतीति उक्तम्। तर्हि तस्य कुतोऽर्थागम इत्याह- मेदिनी पृथ्वी अस्य राज्ञो वसूनि धनानि स्वयं प्रदुग्धे स्वयमेव प्रसूते धनान्युत्पादयति। अस्य अभिरक्षया दैवीनां मानुषीणां च आपदां प्रतिहननेन उदयं दिशतः समृद्धीनां वृद्धिं कुर्वतः। राजाभिरक्षा हि सर्वसमृद्धिकारणं जनपदानाम्। [किं भूतम्?] प्रशान्ताबाधं यत्रोपशमिता बाधा दैवीनां मानुषीणां वा बाधायत्र सन्ति क्रियाविशेषणं वा। [अत एव किं भूतस्य?] उदारकीर्तेः उदारा सर्वत्र श्लाघ्यमाना कीर्तिर्यस्य स तस्य। दयावतः दयालुः सन् प्रजाः सम्यक् अभिरक्षति इत्यभिरक्षायां हेतुर्दयावत इति। [किं भूता पृथिवी ?] अस्य राज्ञो गुणैर्दाक्षिण्यादिभिरुपस्नुता प्रस्नुता। गुणवतो हि नृपस्य महाभूतान्येवार्थं साधयन्ति। १८।

सखीत्यादिना यथा सोऽनुजीविषु सुहृद्बन्धुषु वर्तते तथा- इदानीं यथा ते तस्मिन् वर्तन्ते तथा दर्शयितुमाह- धनुर्भृतः क्षत्रिया राजपुत्रा निजैरसुभिः प्राणैरपि करणभूतैः तस्य राज्ञः प्रियाणि समीक्षितुं<समीहितुं> प्रियाणि कर्तुम् इच्छन्ति तदर्थं प्राणानपि त्यजन्तीत्यर्थः। न च प्रियाणि कर्तुमसमर्थाः। यतो महौजसः। ये पौरुषहीनाः ते अकिञ्चित्कराः। महौजसः

जोनराजटीका

न चान्यराजवद्धठाद्दयतीत्याह- स्वयमप्रेरिता मेदिनी दुर्योधनस्य वसूनि धनानि प्रदुग्धे। यतोऽस्य गुणैर्युक्तदण्डत्वादिभिरुपस्नुता आवर्जिता। दण्ड्यानां कुतो धनमित्याह- प्रशान्तबाधं कृत्वाभिरक्षया क्षेमेणोदयं दिशतः। यतो दयावतः अत एवोदारकीर्तेः।।१८।।

राज्ये प्रधानसाधनं चारेक्षणत्वमाह- सच्छुद्धं चरितं येषां तैः सत्यवादिभिः चरैः करणभूतैः स दुर्योधनो राज्ञां क्रियाः कार्याणि निःशेषं साकल्येन वेद जानाति। कदाचिदन्येऽपि तस्य कार्याणि जानीयुरित्याह - अशेषिता निरवशेषाः कृताः क्रिया येन सः। एवमप्यारम्भक्षणे राजानस्तत्क्रिया जानीयुरित्याह - महोदयैः फलैः करणभूतैः राजभिः अस्येहितं कर्म प्रतीयते

महीभुजां सच्चरितैश्चरैः क्रियाः स वेद निःशेषमशेषितक्रियः।
महोदयैस्तस्य हितानुबन्धिभिः प्रतीयते धातुरिवेहितं फलैः।२०।

लघुटीका

पौरुषाधिका धनुर्भृतः। तथा भूताः कदाचित् स्वामिने द्रुह्येयुरित्याह- [पुनः किं भूताः?] मानधना मानमेव धनं सर्वस्वं येषां ते। येषां कुलपुत्राभिमान उत्तमकुलप्रसूता वयमित्यभिमानः ते कथं स्वामिने द्रुह्येयुः। तथाविधाः कदाचिद्दौर्गत्याद्विरज्येयुरित्याह- धनार्चिताः। धनबाहुल्यदानेन अर्चिताः पूर्णाः। एवंविधाः अपि यद्यस्त्रवेदविदो न स्युस्तदकिञ्चित्करा एव ते इत्याह - धनुर्भृतः धानुष्काः। अस्त्रवेदपारङ्गताः। तर्हि प्रतापशून्याः स्युरित्याह- संयति सङ्ग्रामे लब्धकीर्तयः। कृतावदाताः एवंविधा अपि यदि परस्परं मिथः समवायं कृत्वा विहितकूटमन्त्राः तद्दोषायैव। यतः संहता नाशयन्ति। स्वामिनोऽर्थान् भक्षयन्ति इत्याह- न संहताः परस्परं भिन्नाः भिन्नक्रिया न मिलिताः तर्हि भिन्ना अपि परस्परविरोधात् स्वामिनोऽर्थं सैन्यम् अवसादयेयुरित्याह। न भिन्नवृत्तयः। न भिन्ना <न> विरुद्धाः परस्परविरोधिनी वृत्तिर्येषां ते। परस्परविरुद्धा न। किन्तु परस्परसमवायेन प्राणैरपि अस्य प्रियाण्येव साधयितुमिच्छन्ति।१९।

एवं स्वमण्डलगतां तस्य वृत्तिं प्रतिपाद्य परमण्डलेष्वपि यथा वर्तते तथा दर्शयितुमाह- स राजा अशेषितक्रियः स स्वयं परिसमापितसकलकर्तव्योऽन्येषां महीभुजां राज्ञामरिमित्रादिमध्यमोदासीनपार्ष्णिग्राहाक्रन्दासारादीनां क्रियाः कर्तव्यानि। अशेषं निःशेषं सर्वात्मना चरैः प्रणिधिभिः वेद जानीते। यथा- स तेषां निःशेषं वेत्ति तथैव कदाचित्तेऽपि

जोनराजटीका

सम्भाव्यते। क्रियाफलं दृष्ट्वा तस्य क्रियारम्भं राजानो जानन्ति इत्यर्थः। यथा विधातुः कार्यं फलैरेवानुमीयते। यद्वा महीभुजां सम्बन्धिभिश्चरैः करणभूतैर्महीभुजां क्रियाः स जानाति। शत्रुचराः कथं तेन स्वीकृता इत्याह- सम्पादितकृत्यः। ते हि तस्य कार्यनिष्पत्त्या स्वस्वामिनामग्रे किञ्चिदपि वर्णनीयं न पश्यन्तः सन्तः स्वयमेव तमाश्रिताः। अतस्तदीहा फलैरेवानुमिता शत्रुभिः।। १९।।

तस्मिन् सेव्यगुणान्मत्वा भृत्या यथा तं सेवन्ते तथाह - सेवकाः प्राणैरपि तस्य प्रियं कर्तुमिच्छन्ति। तस्य हितार्थे देहमपि न गणयन्तीत्यर्थः। किं ते प्राकृतप्राया इत्याह - महौजसः। तेजस्व्यपि यदि मानी न स्यात् तदा किं साधयतीत्याह- मानधनाः तेऽपि यदि

न तेन सज्यं क्वचिदुद्यतं धनुः कृतं न वा कोपविजिह्ममाननम्।
गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनम्।२१।

लघुटीका

तस्य जानीयुरित्याह- तस्येहितं चरितं चिकीर्षितं फलैः कृत्वा प्रतीयते ज्ञायते। एतदस्य चिकीर्षितमिति फलेन दृष्टेन अनुमितमित्यर्थः। कस्येव धातुरिव। यथा विधेः कर्तव्यं फलात्प्रतीयते किन्तु कार्यं फलितमेव दृश्यते न त्वारब्धमपि विज्ञायते। [किं भूतैः फलैः ?] संप्रत्येव महान् उदयः स्वरूपाविर्भावः परमण्डलासादनलक्षणो येषां फलानां तानि तथा। तैर्महोदयैः। [पुनः किं भूतैः ?] हितमनुकूलं बध्नन्ति पुष्यन्तीति हितानुबन्धीनि तैः। आयत्यां हितानुवर्तीनि यतः। [कथंभूतैः] सच्चरितैः सत्प्रधानं गूढं चरितं यस्य सः। तथा। यद्वा सन्तो बुद्धिमन्तो गूढाश्चराः सञ्जाताः अस्य स सच्चरितः। यदि अवज्ञायमानैरवस्कन्दपातादिभिः परान्वशीकरोति। एवं सति केवलपराक्रमार्जिताः तेन स्थिरा भवन्ति।२०।

ज्ञायमानारम्भपरान् अभिषेणयतः कोशसाधनादिक्षयो भवति। किन्तु गूढचार-क्रि[य?]यैवार्थागम इत्याह-तेन क्वचिदपि चेन्नासौ अबुध्यत कुत्रचित् नाकुप्यत चेत्ततो मृदुमतेरनित्याह। नराधिपै राजभिरस्य आज्ञाऽनुशासनं गुणानं दाक्षिण्यादीनामनुरागेण शिरोभिः

जोनराजटीका

निर्धनास्तदा किं चित्रमित्याह- धनार्चिताः। धनेन हेतुनार्चिताः। एवमपि यदि धानुष्का न तदा किं साधयन्तीत्याह - धनुर्भृतः। एवमपि यदि न प्रसिद्धास्ततः किमित्याह - लब्धकीर्तयः। ते सर्वेऽपि न संहता न बद्धजालाः। न भेदवृत्तयः। सङ्घातभेदाभ्यां हि राजानमवसादयन्ति। यद्वा तेजस्विनश्च मानिनश्च धनिनश्चैते सर्वे तस्य प्रियाणि कर्तुं समीहन्ते इति योज्यम्। तेजस्विपुरुषवन्मानिप्रभृतयोऽपि तद्धितार्थपरा इत्यर्थः।।२०।।

भयान्नतानां कालवशादौद्धत्यमपि शङ्कते इत्याह- धनुष्मानयं दृढ इत्युक्ते दृढप्रहारीत्यर्थो लक्ष्यते। एवमन्यत्रापि। ज्याशब्देन ज्याकर्म लक्ष्यते। तेन सज्यं ज्याकर्मसहितं धनुः। क्विचन्नोद्यतम्। तथा तेनाननं रोषदुर्दर्शनं वा कृतम्। कातर्यप्रसङ्गेनाज्ञाभङ्गे प्रसक्ते आह-माल्यं मालेवास्याज्ञा राजभिः कर्तृभिः शिरोभिः करणभूतैरुह्यते। गुणानुरागेणेति हेतुतृतीया। गुणानुरक्ता राजानो युद्धं विनैव तदाज्ञां मानयन्तीत्यर्थः।।२१।।

स यौवराज्ये नवयौवनोद्धतं विधाय दुःशासनमिद्धशासनः।
मखेष्वखिन्नोऽनुमतः पुरोधसा धिनोति हव्येन हिरण्यरेतसम्।२२।

लघुटीका

मौलिभिरुह्यते धार्यते। किमिव मालामिव कुसुममालामिव। अभिनन्द्यास्याज्ञामनुतिष्ठन्तीत्यर्थः। न वनेचर इत्यर्थः। एतेन दृष्टसम्पत्तिरस्योक्ता।२१।

ततश्च अदृष्टमस्य नास्त्येव इत्याशङ्क्याह- स पुरोधसाऽनुमतः सन् अखिन्नोऽविरतश्रद्धो मखेषु यज्ञेषु हवनीयेन हिरण्यरेतसं वैश्वानरं धिनोति प्रीणयन्नित्थमास्ते। ततो दीक्षितस्य सतोऽस्य अनन्तरा राजानो राष्ट्रमाक्रमेयुरित्याह- यौवरज्ये दुःशासनं निधाय विनियुज्य कदाचिदसौ राज्यं परिपालयितुमशक्त इत्याह- नवयौवनोद्धतं नवयौवनोन्मत्तम् कदाचिदुन्मत्तः स एवाक्राम्यापहरेदित्याह- [किं भूतः सः?] इद्धं दीप्तं शासनम् आज्ञा दण्डो वा यस्य स इद्धशासनः अप्रतिहताज्ञः तीक्ष्णदण्डो वा। धिवेः प्रीणनार्थस्य धिन्विकृण्व्योर्धि चेति वक्तव्यम्। धिनोतीति रूपम्। मत्यर्थस्यापि मन्यतेर्भूतसामान्यविहितनिष्ठा भवति। उपज्ञात इति वचनतो यदि हि मत्याद्यर्थेभ्यो भूते निष्ठा न स्यात्। ततश्च क्तस्य वर्तमानेऽपि षष्ठ्यामुपज्ञातेऽर्थे तृतीयासमर्थता न भवेत्। न निष्ठादिष्वपीति निषिद्धा षष्ठी। मतिबुद्धिपूजार्थेभ्यः क्ते षष्ठ्येव न तु तृतीया। यथा 'विदितं च यथा स्वार्था न मे काश्चित् प्रवृत्तयः' इति। वर्तमाने क्ते षष्ठ्येव। अत्र भूते निष्ठायां तृतीयैव सम्मता इत्येवं साम्प्रतम्।।२२।

जोनराजटीका

एवमुपायविनियोगेनार्जिताया लक्ष्म्या यशोऽर्थप्रतिपादनमाह- स यज्ञेषु हिरण्यरेतसमग्निं धिनोति तर्पयति। [केन?] हव्येनाज्यादिना। अखिन्नोऽनुद्विग्नः। मखानां बहुत्वादुद्वेगो भवति। क्षत्रियस्य यजने कथमधिकार इत्याह- पुरोधसानुमतः। कृतप्रत्यवेक्ष्यः। यदि सदा यज्ञान्करोति तर्हि कथं प्रजाप्रत्यवेक्षा सिद्ध्यतीत्याह- नवयौवनोद्धतम्। दुःशासनमनुजंभ्रातरं यौवराज्ये कृत्वा यद्युद्धतः दुःशासनस्तदाऽयमेव राज्यं किं न हरतीत्याह- इद्धशासनो दीप्ताज्ञः। सदा यज्ञान्कुर्वतोऽस्य दुःशासनो दासवदाज्ञां। करोतीत्यर्थः। सर्वत्रास्याकुण्ठावधानत्वमिति तात्पर्यम्। तत्र पूर्वश्चतुर्वर्गो दम्भार्थमपि सेव्यते इति मनुवाक्याद्यशोऽर्थं यज्ञान्करोतीत्यर्थः।।२२।।

प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधि मण्डलं भुवः।
स चिन्तयत्येव भियस्त्वदे(दी?)ष्यतीरहो ! दुरन्ता बलवद्विरोधिता।२३।

लघुटीका

उदर्के च विपक्षाणां निश्चलां सम्पत्तिं श्रुत्वा कदाचिद्राज्ञो न व्यवसायः स्यादित्याशङ्क्याह- स राजा प्रलीनभूपालं प्रलीनास्तस्यैव परिणता भूपाला यत्र तद्भुवो मण्डलम् आवारिधि आसमुद्रान्तं महीवलयं स्थिरा दृढा निश्चला आयतिः प्रताप उत्तरकालो यत्र तत् स्थिरायति यथा भवति तथा। प्रशासत्परिपालयन् त्वत्तस्त्वत्सकाशादेष्यतीः अवधौ पूर्णे भवतः। सकाशादागामिनीर्भियश्चिन्तयत्येव भयानि पराभवविधिं पर्यालोचयति आशङ्कते एव। अहो! विस्मये। बलवद्भिः बलाधिकपूरुषैः सह विरोधिता कृतविरोधता दुरन्ता। दुष्टो दुःखदायी अन्तो यस्याः सा दुरन्ता विषमावसाना। यतो वशीभूताखिलराजन्यकमपि वसुमतीवलयस्यासमुद्रान्तमाधिपत्यं क्व? क्व च हरिणसहचरेभ्यो भयम्। इदमिति विस्मयस्थानम्। आङ्पूर्वस्य एतेर्लृटि एत्येधत्यूट्स्विति वृद्धावार्चतेद्योर्भूत इति नुमभावपक्षे एष्यतीरिति रूपम्। केचिदीष्यतीरिति पठन्ति तदाऽऽगमिष्यतीरित्यर्थः स्यात्। गतिसामान्यरूपो वा धात्वर्थः। प्रकरणादेव विशेषे वर्तिष्यते। जक्षादित्वादभ्यस्तसंज्ञायां नाभ्यस्ताच्छतुरिति नुमभावे प्रशासदिति रूपम्। त्वदिति पञ्चम्येकवचनम्। २३।

जोनराजटीका

भयवर्णनद्वारेण राजानमुत्साहयितुमाह - प्रलीनाः प्रलयमिव गता भूपाला यत्र तद् भुवो मण्डलं समुद्रपर्यन्तं स्थिरायति भाविकालहितत्वेनापि रक्षन्। स त्वदीष्यतीर्भवत्सकाशादुत्पत्स्यमाना भियो भीतीरेव चिन्तयति। यद्वा भुवो महीः रक्षन्। द्वीपबहुत्वाद्बहुवचनम्। समुद्रमण्डलं यावत् स भियो रहश्चिन्तयतीति योज्यम्। यद्वा त्वदैवेति योज्यम्। यदि स तथा विधो महान् कथमस्य भयमित्याह - अहो! कष्टं बलवद्भिः सह विरोधः दुरन्तः दुःस्वरूपः। बलिनां विरोधेन न कदाचित्सुखमित्यर्थः।।२३।।

कथाप्रसङ्गेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः।
तवाभिधानाद्व्यथते नताननः सुदुःसहान्मन्त्रपदादिवोरगः।२४।
तदाशु कर्तुं त्वयि जिह्ममुद्यते विधीयतां तत्र विधेयमुत्तरम्।
परप्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां धियः।२५।

लघुटीका

एतेन राजानमुद्यमयति,कथमेतत् त्वया ज्ञातं यदस्मादसौ बिभेति। यतो गूढाकारेङ्गितोऽसावित्याह- हे राजन् ! सुयोधनस्तवाभिधानात् नामग्रहणादेवाधोमुखो भूत्वा व्यथते व्यथामनुभवति। [किं भूतो] नताननः अवाङ्मुखः। मदभिधानस्य कस्तत्र गोचरः इत्याह- जनैः कुतश्चित्कथाप्रस्तावात् उदाहृतादभिहितात्। व्यथायां निमित्तमाह- अनुस्मृतः स्मृतः आखण्डलसूनोः अर्जुनस्य विक्रमः पौरुषं येन सः तथा। साहचर्यादिन्द्रतनयपराक्रम-स्मृतिर्व्यथाहेतुः। पुत्रादिच्छेत्पराजयम् इति न्यायान्न दोषः। मन्त्रपदं मन्त्रशब्दः। २४।

प्रकृतम् उपसंहरन्नाह- यदसौ भवतो बिभेति उपचितश्च। अतोऽवश्यमेव किञ्चिज्जिह्मं पापं द्रोहं (त्वयि) विषये कर्तुम् उद्यते चिकीर्षति <सति>। तत्तस्मात्कारणात् तत्र तस्मिन् त्वयि जिह्मं द्रोहं कर्तुम् उद्यते <सति> उत्तरं विधेयम् अनन्तरं कर्तव्यं तदाशु शीघ्रं

जोनराजटीका

परवृद्धिस्थितं भयचिन्तनादिकं कथं त्वया ज्ञातमित्याह- सुदुःसहात् श्रोतुं दुःशकात् तवाभिधानान्नाम्नः स व्यथते। त्वन्नाम श्रुत्वा व्यथते। यतो नताननः, अधोमुखः। नाम कस्माच्छ्रुतमित्याह- जनैः कथाप्रसङ्गेनोक्तात्। अनु पश्चात्स्मृत आखण्डलसूनोरर्जुनस्य विक्रमः पौरुषं येन सः। यथा सर्पः कथाप्रसङ्गेन गारुडिकेन कथितात् गरुडमन्त्राच्छ्रुत्वा व्यथते। स चानुस्मृताऽऽखण्डलसूनवे इन्द्रानुजपक्षिणो गरुडस्य क्रमः पदाक्रमणं येन। 'कथाप्रसङ्गो वाग्जाले विषवैद्ये चे'ति श्रीमङ्खकः। 'सूनुः पुत्रेऽनुजेऽपि च'।।२४।।

एवं राजानमुत्साह्योपसंहरन्नाह - त्वन्नाम्नोऽपि यत्त्रस्यति तत्तस्मात्त्वयि विषये जिह्ममशुभं कर्तुमद्यते प्रवृत्ते तस्मिन् कर्तव्यमुत्तरं त्वया क्रियताम्। ततस्त्वयैव गतेन

इतीरयित्वा गिरमात्तसत्क्रिये गतेऽथ पत्यौ वनसन्निवासिनाम्।
प्रविश्य कृष्णासदनं महीभुजा तदाचचक्षेऽनुजसंन्निधौ वचः।२६।

लघुटीका

विधीयतां क्रियताम्, कालातिपातस्तत्र न युक्तः। अथ त्वमेतदुत्तरकरणीयं कथं नाचक्षे इत्याह- परप्रणीतानि वचांसि लोकैः कथिता गिरो मेलयतां चिन्वतां मादृशाम् अस्मदादीनां धियो बुद्धयः प्रवृत्तिसाराः वार्त्तामात्रमेव नेतुं समर्था यतश्चरा वयम्, तत्र यल्लोकः कथयति तदुपजीव्य मादृशा वार्तामेवानेतुं क्षमा न कार्यनिरूपणसमर्थाः। खलु एवार्थे। प्रवृत्तिर्वार्त्ता। २५।

अनन्तरं महीभुजा युधिष्ठिरेण द्रौपदीवासगृहं प्रविश्य अनुजानां सन्निधौ भ्रातृषूपविष्टेषु चरेणेदितं वचस्तत् आचचक्षे कथितम्। कदाचन सन्निवासिनां पत्यौ वनेचरनायके पूर्वोक्तां वाचम् अभिधाय प्राप्तप्रसादे राज्ञा दत्तं प्रसादं गृहीत्वा गते सति वनेचरोऽसौ वर्णीव तत्र सुयोधनराज्ये व्यवहृतवान्। अत एव वर्णीव लिङ्गैरिति वर्णिलिङ्गी इत्युक्तम्। शैलूषवणिक्तापसनग्नादिवेषेण चराश्चरन्ति।२६।

जोनराजटीका

उच्यतामित्याशङ्काह - मादृशां धियः प्रवृत्तिर्वार्तानयनं सारो यासां तथा विधा भवन्ति। यतः परैः प्रणीतान्युक्तानि वचांसि चिन्वतां संगृह्णतां वार्तामाहर्तुमेवास्माकं योग्यता न पुनरत्रेदं कर्तव्यमिति निश्चेतुमित्यर्थः।। २५।।

आत्ता गृहीता सत्क्रिया सत्कारो येन तस्मिन्। एतेन राज्ञः कृतज्ञत्वं दर्शयति। इत्येवं गिरं वाचमीरयित्वा उक्त्वा वनचरपतौ गते सति गृहं प्रविश्य मन्त्रभेदभयादित्यर्थः। भीमादिसन्निधौ राज्ञां द्रौपदीं तद्वचनम् आचचक्षे कथितम्। भीमादिसन्निधानेऽपि द्रौपदीं प्रति कथनं स्त्रीणां 'बुद्धिश्चतुर्गुणे'त्यतो युक्तम्। यद्वा द्रौपद्याः स्त्रीत्वाद्युद्धश्रद्धामसम्भाव्य सत्यपरेण राज्ञा द्रौपदीं प्रति कथितम्। एतद् व्याख्यानं न तथोत्तरग्रन्थानुगुणम्। वक्ष्यति हि 'नृपस्य मन्युव्यवसायदीपनी'रिति।।२६।।

निशम्य सिद्धिं द्विषतामपाकृतीस्ततस्ततस्त्या विनियन्तुमक्षमाः।
नृपस्य मन्युव्यवसायदीपनीरुदाजहार द्रुपदात्मजा गिरः।२७।
भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम्।
तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः।२८।

लघुटीका

युधिष्ठिरमुखाच्चरोपवर्णितं धार्त्तराष्ट्राणाम् उपचयं श्रुत्वा सिद्धिम् उपचयम् ऋद्धराज्यसिद्धिं निशम्य श्रुत्वा अनन्तरं द्रुपदस्य तनया द्रौपदी गिरम् उदाजहार वचोऽवोचत्। तत आगताः ततस्त्या अपाकृतीः शत्रुभ्य आगतान् तान् केशाकर्षणादिकृतापराधान् नियन्तुं रोद्धुम् अवज्ञातुमक्षमा असमर्था सती गिर उदाजहार। विशेषणद्वारेणाभिधाने निमित्तमाह- [किं भूता गिरः] नृपस्य राज्ञो मन्युव्यवसायौ दीपयन्तीति मन्युव्यवसायदीपनीरिति। नृपस्य क्रोधोद्यमावुद्दीपयितुं वचोऽवोचदित्यर्थः।२७।

हे राजन् ! भवादृशेषु युष्मादृशेषु सर्वशास्त्रज्ञेषु प्रमदाजनोदितम् अनुशासनं कामिनीजनप्रोच्यमानम् अनुशासनं शिक्षापनाबुद्धिसाहस्यम् अधिक्षेप इव भवति तिरस्कार इव भवति इति यदि मन्यसे तन्मा वोच इत्याह- तथापि दुराधयो दुष्टा आधायो दुष्टातिशयकारिण्यो मानस्यः पीडाः। अतः शल्यरूपाः पीडा बलान्मां वक्तुं प्रवर्तयन्ति। प्रोत्साहयन्ति। [किंभूताः?] निरस्तो दूरे क्षिप्तो नारीसमयो यैः ते तथा दूरीकृतस्त्रीसमाचाराः। नारीसमयः शालीनता

जोनराजटीका

द्विषां सिद्धिं भूमिवशीकरणरूपां निशम्य श्रुत्वा द्रौपदी वाचोऽवदत्। भीमादीनामप्यग्रे स्त्रिया वक्तुं कथं युक्तमित्याह- ततस्तेभ्यो द्विषद्भ्यो भयादुत्पन्ना अपाकृतीरवमानान् क्षमितुमसमर्था। अत एव पर्यायवक्रतया द्रुपदात्मजेत्यभिधानमिहोपन्यस्तम्। क्षत्रियवंशाश्या हि पराभवं न सहन्ते। यद्वा स्त्रीत्वादल्पधैर्यत्वमत्र हेतुः। मन्युव्यवसायौ रोषोद्यमौ वर्धयन्ति ताः।।२७।।

देवराणामप्यग्रे उक्त्वा प्रागल्भ्यप्रसङ्गमाशङ्क्याह- भवादृशेषु महाराजेषु प्रमदाजनेनोदितमनुशासनमुपदेशोऽधिक्षेपोऽवमान इव यद्यपि भवति तथापि निरस्त उल्लङ्घित नारीसमयो दार्ढ्याभावरूपो यैस्ते। दुराधयो विषमाश्रितपीडा वक्तुं मां व्यवसाययन्त्युद्योजयन्ति। प्रमदाशब्दः साकूतः। प्रमदाशब्दस्य स्वविषय पर्यवसानात्केवलं चित्तपीडैव प्रागल्भ्यनिमित्तं न तु बुद्धिदर्प इति सूचयति।। २८।।

अखण्डमाखण्डलतुल्यधामभिश्चिरं धृता भूपतिभिः स्ववंशजैः।
त्वया स्वहस्तेन मही मद च्युता मतङ्गजेन स्रगिवापवर्जिता।२९।

व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।
प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान्निशिता इवेषवः।३०।

लघुटीका

अधृष्टता। परपरिभवमसहिष्णुः दुःखातिरेकात् ब्रवीमीत्यर्थः। आधयो मानस्यः पीडाः। प्रमदाजन इति साभिप्रायमभिधानम्। भवादृश इति आसर्वनाम्न इत्यात्वे कृते रूपम्। २८।

महेन्द्रतुल्यतेजोभिरविच्छेदेन अखण्डं चिरं यावत् स्ववंशजैः भरतादिभिः या भूः परिपालता धृता सा मही त्वया दीव्यता। मदं श्चोततीति मदश्च्युत् तेन तथा। त्वया स्वहस्तेनैवापवर्जिता त्यक्ता। तस्यादैवदोषं विना स्वयं परित्यागो न युक्त इति वाच्यता। यथा मदमूढो मतङ्गजो हस्ती मदश्च्युत्। तेन स्रक् माला शिरसा धारणीया स्वहस्तेन निजशुण्डादण्डेन अपवर्ज्यते त्यज्यते क्षिप्यते। २९।

अथ मन्यसे मायावद्भिररातिभिः छलितोऽस्मि न मया स्वेच्छयाऽपवर्जिता इत्याह- ये पुरुषा मायाविषु कपटयुक्तेषु विषये मायविनो न भवन्ति कुटिलचरिता न भवन्ति तस्मात्ते मूढधियो जडबुद्धयः पराभवं व्रजन्ति पराभवं प्राप्नुवन्ति। हि यस्मात् कारणात् शठा मायाविनः तथाविधान् अमायिकान् ऋजुबुद्धीन् प्रति रूपान्तर्भावं कृत्वा घ्नन्ति बाधन्ते। असंवृताङ्गान् कवचादिभिरगोपितशरीरान्। निशितास्तीक्ष्णा यथा इषवो बाणाः प्रविश्य घ्नन्ति बाधन्ते। मायाविषु ऋजुत्वं मूढबुद्धिता। ३०।

जोनराजटीका

प्राक्कर्मायत्तं सुखं दुःखं चेति कथं चित्तपीडा त्वां बाधते इत्याह- इन्द्रसदृशतेजोभिः स्वकुलजातैराजभिर्बहुकालं रक्षिता भूमिस्त्वया स्वहस्तेन न तु दैवबलेनापहारिता। यो मदश्च्युता बलावलिप्तेन यथा मतङ्गजेन हस्तिना स्रङ्माला हस्तेनापवर्ज्यते। तत्पक्षे मदो दानम्। २९।

क्षत्रियस्य मम द्यूते भूमिं हारयतः को दोष इति, कथं मदश्च्युतेति त्वयोक्तमित्याशङ्क्याह- मायाविषु मायिनो ये न भवन्ति ते मूढधियो मूढमतयः पराभवं प्राप्नुवन्ति। हि यस्मादर्थे। शठाः खलाः प्रविश्य मोहमालक्ष्य तथा विधान्मायारहितान् घ्नन्ति। यथा तीक्ष्णाः शरा नग्नाङ्गान् वर्मरहितान् घ्नन्ति। ३०।।

गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां जनाधिपः।
परैस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियम्।३१।

लघुटीका

अथार्थलक्ष्म्याः स्वभाव एवायं यदकाण्ड एव परित्यज्य अन्यमाश्रयते इत्याह- एतदुक्तं भवति। न त्वं श्रिया चापल्यात् त्यक्तः। किं च त्वदन्यः त्वद्व्यतिरेकेण त्वां विहाय अन्यः क इव को नाम परैः शत्रुभिः श्रियं लक्ष्मीम् अपहारयेत् त्याजयेत्। [किं भूतां श्रियाम्?] गुणैर्दाक्षिण्यादिभिः अनुरक्ताम् अनुरागवतीं कुलजां कुलायातां मनोरमां ऋद्धां मनस आह्लादकारिणीम् या एवं विधा श्रीः वधूश्च सा भर्तारं कथं त्यजेत्। त्वां विहाय अन्यः कः परैरितरैरेवं गुणविशिष्टां श्रियं वधूं च हारयेत् यतः [किं भूतः?] अनुरक्तसाधनः अनुरक्तपौरजनपदसैन्यः। विरक्तपौरं हि जहाति लक्ष्मीः। कुलजां प्रबन्धायाताम्। उत्तमकुलप्रसूतां वधूम्। [किंभूतोऽन्यः] कुलाभिमानी उत्तमकुलप्रसूतः। [किंभूतो] जनानामधिपो बहुजनपोषयिता। अथवा हे जनाधिप नरपते इति सम्बोधनम्। रमयतीति रमा मनसो रमा मनोरमा। ताम्। अवक्षेपे चायमिव शब्दः। यथा क्वेव भोक्ष्यसे। इतीवकारस्ततोऽन्य-मपहारयितारम् असम्भाव्येत्येव प्रयुङ्क्ते। एवमन्यत्रापि। क इव शब्दे बोद्धव्यम्। यथा 'कमिवेश ते रमयितुं न गुणाः'। विस्मयः। 'क इव वा जयश्रियं क इव स्वगुणो योऽस्मान् कुर्यान्नरेश्वरवल्लभान्' इति। शत्रवोऽपहरन्ति तानपहरत आनुकूल्यमाचरन् स प्रयुङ्क्ते। हृक्रोरन्यतरस्याम् इति पक्षे कर्तुः कर्मसंज्ञाया अभावः। अथ न स्वयमपहृता नापि परैरपहारिता किं तर्हि? शत्रुभिः छलेनापहृता।३१।

जोनराजटीका

श्रीः स्वभावचपलत्वादेकत्र न तिष्ठतीति को दोष इत्यत आह - इव शब्दोऽत्र सम्भावनायाम्। क इव त्वदन्यः परैः शत्रुभिः श्रियमपहारयेत्। त्वमेवापहारयेरित्यर्थः। न च स्वत एवेयं गतेत्याह - गुणेष्वनुरक्तां सरागां कुलजां कुलागताम्। न च त्वयि विरक्ताः प्रजा इत्याह- अनुरक्तं साधनं प्रकृतिमण्डलं यस्य सः। न च भवान् विरक्त इत्याह- कुलाभिमानी। एवंविधां लक्ष्मीमात्महस्तेन त्वमपहारयेः। अत एवात्मवधूमिव। यद्वा आत्मवधूमिवेत्युपमानद्वारेण। श्रियश्चपलारोपं खण्डयति। त्वमिवेत्युपमा। त्वमेव प्रमादाद्वधूश्रियौ हारितवानित्यर्थः। परैरिति हृक्रोरन्यतरस्यामिति विभाषातृतीया।। ३१।।

भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेववर्त्मनि।
कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः ।।३२।।
अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः ।।३३।।

लघुटीका

तदेवं गते किमधुना करोमीत्याशङ्क्याह- हे नरदेव ! एतर्हि इदानीं मनस्विगर्हिते तेजस्विभिर्निन्दिते वर्त्मनि मार्गे वर्तमनं भवन्तं कथमिव उदीरितः समिद्धोऽनिवारितो मन्युः कोपो न ज्वलयति। न उद्दीपयति। कस्मात् ? दुर्वारेण कोपेन न ज्वलसीत्यर्थः। शमीतरुम् अग्निरिव। यथा शमीसंज्ञस्तरुः शमीतरुः। शाकपार्थिवादित्वात् समासः। यथा वह्निरुच्छिखः उदञ्चज्ज्वालोऽग्निः शुष्कं शमीतरुं ज्वलयति दहति तथेत्यर्थः। शमीतरोरग्निगर्भत्वमहानिदाघो भवति इति शमीग्रहणम्। अस्मिन् काले एतर्हि। शत्रुभिः परिभूतस्य निरीहतयावस्थानम्। मनस्विगर्हितोऽयं मार्गः। व्यवहारविषयः वर्त्मेव वर्त्म। प्रशस्ततेजो युक्तं मनो विद्यते यस्य स मनस्वी। ३२।

अथ मन्यसे क्रोधो हि मनोऽभ्यन्तरः शत्रुः। स सर्वथा परिहार्यः इत्याशङ्क्याह- अवन्ध्यकोपत्वादेव आपदां विहन्तुः पुरुषस्य देहिनः प्राणिनः सर्वे वश्याः स्वयमेव भवन्ति। यत्नं विनैव वशं गच्छन्ति। न हि सफलक्रोधस्य कश्चिद् भयाद्विरुध्यते एव।

जोनराजटीका

अलमस्मत्प्रेरणया, स्वयमेव तव कोपो युक्त इत्याह - मनस्विभिर्गर्हिते निन्दिते राजभावे तिष्ठन्तं त्वामनिवारितो रोषः कथं न ज्वलयति। अस्मत्प्रेरणा दूरेऽस्तु, मनस्विनिन्दां कथं सहसे इत्यर्थः। यथोच्चैश्शिखा ज्वाला यस्य सोऽग्निरवारितो वारिणो रसस्याभावाच्छुष्कं शमीवृक्षं ज्वलयति। अन्तर्लीनाग्नित्वाच्छमीतरुरन्तः स्थितरोषाग्ने राज्ञ उपमानम्।।३२।।

महान्तो हि जितरोषायुक्ता इति विघटयितुमाह- यदि वयमेतेन सह द्वेषं कुर्मस्तदेषः सफलक्रोधोऽस्मान् हन्ति। अथैनमाश्रयामस्तदेष स्थानान्तरगता अपि विपदो वारयतीति

लघुटीका

एवमन्वयमुखेन कोपस्य साफल्यं प्रतिपाद्य व्यतिरेकमुखेनाऽपि दर्शयितुमाह - अमर्षशून्येन जन्तुना प्राणिना जातहार्देन सञ्जातस्नेहेन सता कस्यापि जनस्यादरो बहुमानो गौरवं न भवति। अमर्षशून्येन जन्तुना कोपरहितेन जन्तुना विद्विषा सता वैरविरुद्धेनापि सता दरो भयं न भवति। यः कुपितः सन् फलं भृशतया रौद्रं दर्शयति सोऽवन्ध्यकोपः। सोऽपि यदि आपदो मित्रेषु अपहन्तुं न समर्थः तेनाऽपि किम् ? यः शत्रुषु कुपितः सन् रौद्रचरितो भवति, जातहार्दः सन् विपदोऽपनेतुं समर्थः स खलु पुरुषो मनस्वी। हार्दं स्नेहः। आदरो बहुमानः। दरो भयम्। अमर्षेण शून्य इति कर्तृकरणे बहुलग्रहणात्तद्धितेनापि समासः। यदि तवात्मीया विपत्, त अमर्षायत्ता मा भूवन् तवानुजा निन्दितां गर्हणीयां दशाम् आपन्नाः। ३३।

जोनराजटीका

विमर्शेन स्वयमेव प्रेरणां विनैव देहिनः पुरुषा वश्या भवन्ति। कस्यावन्ध्यकोपस्य सफलक्रोधस्य। तथाऽऽपदां निहन्त्युर्निवारयितुः। पुरुषस्य द्वेषेणापचयमानेनोपचयं स्वबुद्ध्या निश्चित्यायत्ता भवन्तीत्यर्थः। अतो महतां कोप एव माहात्म्यपरिपालक इति सिद्धम्। अमुमेवार्थं व्यतिरेकेण पुनरप्याह- जातं हार्दं प्रेम यस्मिंस्तेन मित्रेणेत्यर्थः। जातहार्देन मित्रेण करणभूतेन जनस्यादरो जनकर्तृकः सम्मानो न भवति। यतः अमर्षशून्येन। अमर्षो मित्रकृतोपकारविषयमसहनम्। प्रत्युपकार इति यावत्। अमर्षेण प्रत्युपकारोद्यमेन यः शून्यः सखा तेन करणभूतेन जनकर्तृक आदारो न भवति। यो न प्रत्युपकरोति तं जनो न गणयतीत्यर्थः। अत्रैव वाक्ये तन्त्रेण दरशब्दोऽपि व्याख्येयः। जनस्य दरो भयं न भवति। केन [कारणभूतेन?] अमर्षशून्येनाक्रोधेन। विद्विषा यो द्वेषं क्षमते, प्रत्यपकारं न करोति तेन शत्रुणा दरो भयं न भवति। यः शत्रोः प्रत्यपकारं न करोति तं जनो न गणयतीत्यर्थः। अथवाऽवन्ध्यकोपस्यात एवाश्रितानां विपन्निवारकस्य सर्वे आयत्ता भवन्ति। अमर्षशून्येन तु विद्विषा दरो भयं न भवति। [कीदृशेन?] न जातहार्देन। नञः काकुस्वरप्रयोगात् ज्ञातहार्देनैवेत्यर्थः। प्रणामादिना शत्रावपि प्रसन्नेनेत्यर्थः।। ३३।।

परिभ्रमन् लोहितचन्दनोचितः पदातिरन्तर्गिरिरेणुरूषितः।
महारथः सत्यधनस्य मानसं दुनोति ते कच्चिदयं वृकोदरः।३४।
विजित्य यः प्राज्यमयच्छदुत्तरान्कुरूनकुप्यं वसु वासवोपमः।
स वल्कवासांसि तवाधुनाऽहरन्करोति मन्युं न कथं धनञ्जयः।३५।

लघुटीका

कथं मन्युं न जनयन्ति इति श्लोकत्रयेण दर्शयति - कच्चिदिति प्रश्ने। हे राजन्! यो लोहितचन्दने काश्मीरजे चन्दने उचितो योग्यो यो महारथः महानुत्कृष्टो रथो यस्य स महारथः। यो हि कुङ्कुमदिव्यानुलेपनयोग्यः स रेणुरूषितः धूलिधूसरितशरीरो यश्च महारथः रणे शूरो युद्धकुशलश्च स इदानीं दुर्गगिरौ पदातिः पादचारी परिभ्रमन् अयं वृकोदरो भीमः तव मानसं दुनोति। कच्चित्प्रश्ने। दुनोति इति सोल्लुँण्ठः प्रश्नः। तव सत्यधनस्य। सत्यमेव धनं सर्वस्वं यस्य सः। सत्यवचनं पालयतः न सोदर्यस्नेहिलस्य सोत्प्रासं विशेषणम्। रूषितः परुषीकृतः। मन एव मानसं प्रज्ञादित्वादण्। गिरौ अन्तोऽन्तर्गिरि। विभक्त्यर्थेऽव्ययीभावः, अन्यस्माल्लुक् इति।३४।

यो धनञ्जयः पूर्वम् उत्तरान् कुरून् विजित्य जित्वा प्राज्यं बहुतरम् अकुप्यं रूप्य-हेमादिधनं तवायच्छत् स धनञ्जयोऽर्जुनोऽधुना इदानीं तव वल्कलवासांसि आहरन् आनयन् कथं मन्युं कोपं न करोति कोपं न जनयति। अयच्छदिति दाणो यच्छेति <आदेशे रूपम्>। वल्कं वल्कलं वृक्षत्वक्। ३५।

जोनराजटीका

महतां विपदि धैर्यमुचितमिति यदि महत्त्वात्स्वपीडां न गणयसि तर्हि, भ्रातुः दुःखं त्वं कथं न पीडयतीत्याह- प्राङ्महारथोऽद्य पदातिर्भूत्वाऽन्तर्गिरि पर्वतमध्ये भ्रमन्नटयमानः तथा लोहितचन्दनस्य रक्तचन्दनस्योचितः। अद्य रेणुना रूषितो वृकोदरो भीमसेनस्तव चित्तं कच्चिद्दुनोति तापयति। सत्यधनस्येत्युपहासपर्यवसितम्। सत्यं पोषयसि भ्रातॄञ्छोषयतीति भावः।। ३४।।

यो वासवोपमः उत्तरान् कुरूञ्जनपदविशेषान् जित्वा तुभ्यमकुप्यं हेमरूप्यादि वसु धनमदात्सोऽर्जुनोऽद्य वल्कवासांसि परिदधत्क्रोधं कथं नोत्पादयति। एनमेवं विधं विपद्विवशं दृष्ट्वा क्रोधस्तव न दोषावह इत्यर्थः।। ३५।।

वनान्तशय्याकठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ।
कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम्।३६।

इमामहं वेद न तावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः।
विचिन्तयन्त्या भवदापदं परं रुजन्ति चेतः प्रसभं तवाधयः।३७।

लघुटीका

हे राजन् ! त्वम् एतौ यमौ माद्रीसुतौ विलोकयन् कथं बाधितुं न उत्सहसे कथं तव दुःखं न उत्पद्यते। [किं भूतौ ?] धृतिःसन्तोषः। तया या संयमो नीरागद्वेषता ययोः। तौ सकलदोषनिमित्तभूतौ इति विशेषणद्वारेणाह- वनान्ते वनसमीपे शय्यतया कठिनीकृता कठोरीकृता आकृतिः शरीरं ययोः भूमिशयनात्। विष्वक् कचाचितौ, समन्ताल्लोमव्याप्तौ, शरीरसंस्काराभावात्। अत एव अगजौ गजौ इव। भिन्नक्रमे इव शब्दः। इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं चेति। विभक्त्यलोपनार्थं न नित्यसमासार्थमित्याशङ्क्याह- वनान्ते शय्येत्येवमादौ प्रायेणान्तशब्दोऽलङ्कारार्थः। यथा

'पद्मभिदपि शुभाः सिषेविरे गन्धमादनवनान्तवायवः'।

'वनान्तसङ्गीतसखीररोदयत्'। 'अनुगिरगृतुभिर्वितायमाना स विलोकयितुं वनान्तलक्ष्मीम्'। 'धवलयतीह वनान्तमिन्दुलेखा'। ३६।

आस्तां चैते भ्रातरः, आत्मीयात्र विपत्कथं तव न दुःखायेति दर्शयितुमाह- इमामिति पुरोवर्त्तितया निर्दिशति। इमां तावकीं धियं त्वदीयां बुद्धिं न वेद वेदितुं न शक्नोमि। कथं न वेद्मीत्याह- खलु यस्मात्कारणाच्चित्तवृत्तयो विचित्ररूपाः चित्रस्वभावा अनेकप्रकारा लोके इत्यर्थः।

जोनराजटीका

वनान्तशय्यया कठिनीकृताऽकृतिर्ययोस्तौ। विश्वक्सर्वतः कचैः केशैराचितौ विकरालौ। अत एवागे पर्वते जातौ तौ गजाविव। नागरिकाणां हस्तिनां हस्तिपकैः। कचप्रसाधनादिसम्पादनेन वनग्रहणम्। एतौ यमौ नकुलसहदेवौ पश्यंस्त्वं धृतिसंयमौ धैर्यशमौ बाधितुं त्यक्तुंकथं नोत्सहसे। तत्त्यागे त्वमुत्साहस्वेत्यर्थः।। ३६।।

अस्याः केवलं परोपदेशकौशलं, न त्वात्मनः सचित्तवत्त्वमित्याह- इमां विपत्प्रतीकारापेक्षारूपां तव धियं बुद्धिमहं न वेद न जाने। अत्र हेतुं न जानामीत्यर्थः। विदो

पुराधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतिमङ्गलैः।
अदभ्रदर्भामधिशय्य स स्थलीं जहासि निद्रामशिवैः शिवारुतैः।३८।

लघुटीका

तदेव विचित्ररूपत्वं दर्शयति। भवदापदं त्वदीयमापदं विचिन्तयन्त्या मीमांसमानायाः सत्याः परं केवलम् आधयो दुःखानि प्रसभं हठात् मम चेतो रुजन्ति पीडयन्ति। न पुनरन्तरनुभूयमाना अपि तव चित्तविकारमुत्पादयन्ति इत्यर्थः। यदीया ह्यापदश्चिन्त्यमाना अपि महते दुःखाय भवन्त्यपरेषामपि। स कथमनुभूयमाना अपि तव मनो न मनागपि न नुदन्तीत्यर्थः। त्वदीया बुद्धिर्विलक्षणा [कथं ज्ञातुं न शक्यते।] परमिति निपातः केवलमित्यत्रार्थे। ३७।

अथ मन्यसे विपदेव मम नास्ति तन्मुधैव तच्चिन्तया त्वं दुःखितेत्याशङ्क्याह- तदवस्थं श्लोकत्रयेण दर्शयति-पराध्यें शयनीये सुप्तः महाधनं महार्हं शयनं शय्याम् अधिरूढः समन्ततो मागधादिभिरुदीरितैः स्तुतिगीतिमङ्गलैः कृत्वा यस्त्वं पुरा पूर्वं विबोध्यसे जागर्यसे स त्वम् इदानीम् अदभ्रदर्भां प्रचुरबर्हिस्कां स्थलीं भूमिम् अधिशय्य अशिवैरमङ्गलरूपैः दुःश्रवैः शिवारुतैः भरूटीरटितैः कृत्वा निद्रां जहासि प्रचुरदर्भायां भूमौ सुप्तोऽधुना शिवावाशितैः कृत्वा विबोध्यसे। यावत् पुरानिपातयोर्लुट् इति भूते काले लट्। अधिशीङ्स्थासां कर्म।

जोनराजटीका

लटो वेत्यट्। धियमिति कार्ये कारणोपचारः। युक्तमेतत्। चित्तस्थितयो हि विचित्ररूपा भिन्नरूपाभिन्नगुणा इत्यर्थः। स्वसदृश एव ज्ञातुं शक्यते न विसदृशः। राजचित्तात्स्वचित्तस्य भिन्नगुणतां प्रतिपादयितुमाह- सर्ववाक्यानां व्यवच्छेदफलत्वादेवकारोऽत्राध्याहार्यः। त्वदापदं विचिन्तयन्त्या एव न त्वनुभवन्त्या मम चित्तमाधयः पीडा व्यथयन्ति। त्वं त्वापदनुभवेऽपि निर्विकारः। यद्वाहं निश्चिन्तरूपां त्वन्मतिं न जाने। मम त्वद्विपश्चिन्तनमात्रेण चित्तदुःखोद्भवः, तव तु विपदनुभवतोऽपि न पीडेत्यर्थादापतितम्। एतदेव सामान्येन समर्थयति- चित्तवृत्तयो नानारूपा इति।। ३७।।

तामेव विपदं दर्शयितुमाह- नृपेत्यैश्वर्यद्योतकमामन्त्रणम्। द्विजातीनां ब्रह्मणानां शेषेण भुक्तावशिष्टेनान्धसाऽन्नेन यशसा सह। यद्वा पुरा रामणीयकं कान्तिं पुरा तव नीतं तद्वपुस्तवाद्य यशसा सह कृशतां प्राप्नोति। यतः परं केवलतया वन्यफलान्यश्नासि यशसा समं सदृशं च। यशोऽपि ब्राह्मणभुक्तावशिष्टेनान्नेन भुक्तेन वृद्धिं नीतम्।। ३८।।

परोपनीतं नृप ! रामणीयकं द्विजातिशेषेण यदेतदन्धसा।
तदद्य ते वन्यफलाशिनः परं परैति कार्श्यं यशसा समं वपुः।३९।
अनारतं यौ मणिपीठशायिनावरञ्जयन् राजशिरःस्रजां रजः।
निषीदतस्तौ चरणौ वनेषु ते मृगद्विजालूनशिखेषु बर्हिषाम्।४०।

लघुटीका

स्थलीम् इति कर्मत्वम्। अध्यारोपितगुणकीर्त्तनं स्तुतिः। स्वरतालसंस्कृतपदप्रयोगो गीतिः। मङ्गलं जय-जयेत्यादिपदोदीरणा।।३८।।

हे नृप ! पुरा तव वपुः शरीरं यदेतत् द्विजातिशेषेण द्विजैः स्वयं भुक्त्वा अनुज्ञातेन शेषेण अवशिष्टेन अन्धसा क्रूरान्नेन रामणीयकम् उपनीतं रमणीयतामानीयत तदेतत्तव शरीरम् इदानीं वन्यफलाशिनः वन्यफलभोजनव्रतस्य सतस्तव वपुः शरीरं परम् अतिशयेन कार्श्यं परैति, कृशतां प्राप्नोति यशसा समं कीर्त्या सह। विघसा सितया यत्ते वपुर्यशश्च रमणीयमभूत्। यशो जगत्प्रसिद्धमभूत्। तत्तव वपुः यशश्च अद्य इदानीं वनोद्भवफलभोजनेन कृशं सञ्जातम्। अन्धः क्रूरान्नम्। वने साधु वन्यं वनेयमिति च स्यात्। रमणीयस्य भावो रामणीयकम्। योपधादि वुञ्। यत्तदिति पदे पूर्वरूपादिव्यञ्जके न। ३९।

एतदिति साम्प्रतिकमवस्थाविशेषमभिव्यनक्ति- हे नृप ! यौ ते तव चरणौ मणिपीठशायिनौ ते तव चरणौ अनारतम् अनवरतं राजशिरस्स्रजां नृपमौलिपुष्पमालानां रजः परागसमूहाऽरञ्जयत्। तौ इदानीं तव चरणौ बर्हिषां वनेषु दर्भाणां समूहेषु निषीदतः तिष्ठतः। [किं भूतेषु वनेषु?] मृगाणां हरिणानां द्विजैर्दन्तैरालूनाः शिखा ईषद्भक्षिताः शिखा अग्राणि येषां तानि तथा। तेषु मणिमयपादफलकपृष्ठप्रतिष्ठितौ सञ्जातौ यौ सर्वकालं

जोनराजटीका

महार्हशय्यामधिरूढो यस्त्वं जनेन स्तुत्यादिभिः पुरा पूर्वं प्रबोध्यसे निद्रां त्यज्यसे स त्वं घनदर्भा स्थलीमाश्रित्याशुभैः शिवावाशितैर्निद्रां त्यजसि। पुरि लुङ् चास्मे(६.२.१२२) इति लट्।। ३९।।

रत्नपीठप्रतिष्ठितौ यौ पादौ राजमौलिपालानां किञ्जल्कोऽरञ्जयत्। तौ ते पादवद्य बर्हिषां दर्भाणां वनेषु लुठतः मृगैर्द्विजैर्दन्तैर्न तु जिह्वया। पारुष्यदोषाल्लूना शिखा येषाम्।। ४०।।

द्विषन्निमित्ता यदियं दशा ततः समूलमुन्मूलयतीव मे मनः।
परैरपर्यासितवीर्यसम्पदां पराभवोऽप्युत्सव एव मानिनाम्।४१।

विहाय शान्तिं नृप धाम तत्पुनः प्रसीद सन्धेहि वधाय विद्विषाम्।
व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः।४२।

लघुटीका

त्वदीयौ प्रणतराजकमौलिकुसुममालारेणुररञ्जयत्। तौ चरणाविदानीं हरिणदशनकृत्तकोमलकोठिषु दर्भसमूहेषु तिष्ठतः। अरञ्जयदिति रञ्जेश्चौरादिकस्य रूपम्।४०।

अथ मन्यसे किमत्र क्रियते शान्ताशान्तरूपा ह्यवस्थाः पर्यायेण वर्तमानाः सर्वस्यापि चक्रनेमिक्रमवत् स्थित एवेत्याशङ्क्याह- द्विषन्तो निमित्तं यस्याः सा द्विषन्निमित्ता यद्यस्मात्कारणात् तव अस्या अवस्थाया द्विषतः शत्रवो निमित्तं कारणं न दैवम्। ततो हेतोरियं तव दशा मम मनः समूलं सबन्धनम् उन्मूलयतीव। व्यथातिशयान्मनःप्रोत्साहयतीव। अथ कस्मादरातिनिमित्ता दशा दुःखाय, न दैवनिमित्ता इत्याह- परैः शत्रुभिरपर्यासिता अनिरस्ता अनवरोपिता वीर्यसम्पत् पौरुषातिशयो येषाम्। शत्रुभिरध्वस्तपौरुषातिशयानां ते तथा। तेषां तथाभूतानां मानिनां मनस्विनां पराभवोऽपि दैवकृतो यः कथञ्चित् पराभवो दुर्दशा स उत्सव एव। उत्सवसदृशः। यतो दैवो दुर्निवारोऽचिन्त्यः। मानस्यक्षतिं न करोति। ४१।

यत एव भ्रातॄणां भवतश्च रिपुकृतात्पराभवाद् दुष्टादशा वर्तते। ततो हेतोः प्रसीद प्रसादं कुरु शान्तिं विहाय उपशमं त्यक्त्वा तत्पूर्वं दिग्विजयादौ दृष्टं धाम तेजः पुनरपि

जोनराजटीका

विपदि महतां धैर्यं युक्तमिति दैवकृताऽऽपद्विषयमित्याह- इयं प्रत्यक्षा तव दशा द्विषन्त एव न तु दैवं निमित्तं हेतुर्यस्याः सा यद्भवति। ततो हेतुरियं दशा मे मनः समूलमुन्मूलय त्युत्पाटयतीव। युक्तमेतत्। परैः शत्रुभिरपर्यासिता अर्जिता वीर्यसम्पद्येषां तेषां मानिनां पराभवोऽप्युत्सवसमः। पूर्वोक्तकर्मजनितानां विपदामपरिहरणीयत्वादिति भावः।।४१।।

अत्र यद्युक्तं तत्प्रतिपादयितुमाह- शान्तिमुदासीनतां त्यक्त्वा त्वं तत्सहजं धाम तेजः पुनः सन्धेहि योजय। शत्रूणां वधार्थं प्रसीदेत्यस्मत्कृपया न स्वसुखाभिलाषेणेत्यर्थः। यतः

पुरस्सरा धामवतां यशोधनाः सुदुस्सहं प्राप्य विकारमीदृशम्।
भवादृशाश्चेदधिकुर्वते परान् निराश्रया हन्त ! हता मनस्विता।४३।

लघुटीका

सन्धेहि योजय, पौरुषम् आश्रय इत्यर्थः। [किमर्थम् ?] विद्विषां वधाय द्विषो निहन्तुमित्यर्थः। अथ मन्यसे नाहं शत्रुवधेन सिद्धिमिच्छामि। किं तर्हि ? शमेनेत्याह- शत्रूनवधूय अरीनवगणय्य शमेन शान्ततया सिद्धिं मुनयो व्रजन्ति, ज्ञानापवर्गादिकां सिद्धिं यान्ति। [किं भूता?] निःस्पृहाः निरीहा न पुनर्भूभृतो राजानः। तर्हि भूभृतः शत्रूणां वधेन विक्षेपणेन राज्ययशोलाभलक्षणां सिद्धिं यान्ति। मित्रलाभभूमिलाभहिरण्यलाभलक्षणां सिद्धिं व्रजन्ति यान्ति। यतो भूभृतो न निःस्पृहाः, शत्रुषु मित्रेष्वपि समाः। मुनीनां सिद्धिः ज्ञानापवर्गलक्षणा, भूभृतां सिद्धिः राज्ययशोलाभलक्षणा। अवधूय परित्यज्य। यथा- 'अवधूय विरोधिनीं किमारात् मृगजातीरभिजाति मां जवेन। प्रसीद, सन्धेहीति प्रार्थनायां लोट्। ४२।

अथ बुध्यसे नैवं प्रकारेण मम रतिर्भवतीत्याह- धामवतां तेजस्विनां पुरःसराः प्राग्रहराः। तथा यश एव धनं येषां ते यशोधनाः। एवं गुणविशिष्टाः त्वादृशा एवाश्रयास्तैर्भवादृशैर्यदि सा मनस्विता त्यज्यते तदिदानीं निराश्रयाऽसौ सम्पन्ना। निराश्रयतैव हानिः रतेरधिकारप्रवर्तनं रतिं प्रवर्तयन्तीत्यर्थः। केचित्तु अधिकुर्वते परानिति पठ<न्ति>। त्वादृशा यदि परान् शत्रून् अधिकुर्वते प्रसहन्ते क्षमन्ते इति व्याचक्षते। प्रसह्य योऽस्मासु परैः प्रपन्नो वक्तुं न शक्यः किमुताधिकर्तुम्। एवं च 'अधिः प्रसहने' इत्यात्मनेपदम्। प्रपूर्वसहिरभिभवपराजयाभ्याम् अर्थान्तरेऽपि वर्तते। प्रासहिरे सादयितुं न सादिताः

जोनराजटीका

शत्रूनवधूयोपेक्ष्य मुनयः सिद्धिं लभन्ते यतो निस्स्पृहाः। न तु पृथ्वीपालाः सिद्धिं लभन्ते। अत एव <पूर्वं> नृपेत्यामन्त्रणमुक्तम्।। ४२।।

तेजस्विनामग्रगण्या यशोधना भवादृशाईदृशं छलं राज्यहरणरूपं निकारणमवमानं प्राप्य परान् शत्रून् चेदधिकुर्वते यदि प्रसहन्ते, तदा भवादृशामेवाधारत्वेन प्रसिद्धत्वान्निराधारा मनस्विता नष्टा। तस्या हि तेजस्विनो यशस्विनश्चाश्रयाः।। ४३।।

विधिसमयनियोगाद्दीप्तिसंहारजिह्मं
शिथिलबलमगाधे मग्नमापत्पयोधौ।
रिपुतिमिरमुदस्योदीयमानं दिनादौ
दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः।४६।

लघुटीका

कुसृतिप्रधानेषु मायाविषु परेषु शत्रुषु समयपरिरक्षणं त्रयोदशसमावधिपरिपालनं न क्षमं न योग्यम्। कथमित्याह- हि यस्मात्करणात्। युधि जयार्थिनो विजिगीषवः क्षितीशाः राजानः ते अरिषु शत्रुषु सोपधि सनिमित्तं सन्धिदूषणानि विदधति। सन्धौ दूषणान्युत्पादयन्ति। तत्किमिति निमित्तमुत्पाद्य सन्धिभागं करोमीत्यर्थः। यतो निकृतिपरेषु विहिततीव्रपराभवेषु निकृतिपरत्वात् योऽसमर्थो भवति स वचनसमयं भङ्क्त्वापि किं कुर्यादित्याशङ्क्योक्तम्- भूरिधाम्नस्ततो महौजसो यतः। परेष्विति विषयसप्तमी। ४५।

हे राजन् ! एवं सन्धिदूषणं कृत्वा रिपुतिमिरम् उदस्य। रिपव एव तिमिरम्। दूरं निहत्य उदीयमानम् उद्गच्छमानं त्वां लक्ष्मीः राजलक्ष्मीर्भूयः पुनरपि समभ्येतु समागच्छतु। [किं भूतं त्वाम् ?] विधेर्देवस्य समयस्य च कालस्य च नियोगात् व्यापारणात् हेतोर्यो दीप्तिसंहारः पौरुषक्षयः तस्माज्जिह्मं तेजोरहितम्। [पुनः किं भूतम् ?] शिथिलं चलितं बलं शक्तिर्यस्य स तथा तं चलितशक्तिम्। [पुनरपि किं भूतं त्वाम् ?] अगाधे दुस्तरेऽनन्तेऽपारे।

जोनराजटीका

भयात्समयं पालयति। अनिकृतिकारिष्वपि शत्रुषु मर्यादोल्लङ्घनमेवोचितमित्याह। विजयकाङ्क्षिणो राजानः शत्रुविषये सन्धेर्दूषणानि मर्यादोल्लङ्घनं कुर्वते। सोपधि सच्छलम्। शत्रुषु कमपि दोषमारोप्य मर्यादां प्रतिक्षिपन्तीत्यर्थः। 'निकृतिः कुसृतिः शाठ्य'मित्यमरः।।४५।।

मर्यादायामुल्लङ्घितायामपि सिद्धिः सन्दिग्धैवेति न चाशङ्कनीयमित्याशीर्द्वारेणाह- लक्ष्मीस्त्वां भूयः पुनः समभ्येतु प्राप्नोतु। [त्वां कीदृशम्?] रिपुकृतं तिमिरं मोहमुदस्य निवार्योदीयमानमुदयन्तम्। एतेन मर्यादोल्लङ्घनीयमुपायं दर्शयति। त्वया स्वेच्छया समयो

अथ क्षमामेव निरस्तविक्रमश्चिराय पर्येषि सुखस्य साधनम्।
विहाय लक्ष्मीपतिलक्ष्म कार्मुकं जटाधरः सन् जुहुधीहि पावकम्।४४।
न समयपरिरक्षणं क्षमं ते निकृतिपरेषु परेषु भूरिधाम्नः।
अरिषु हि विजयार्थिनः क्षितीशा विदधति सोपधि सन्धिदूषणानि।४५।

लघुटीका

शरौघमुत्साहमिवास्य विद्विषः' इति 'प्रसादाहतरेणु वानुजान्'। वृत्तिकारप्रदर्शितस्तु प्रसहनार्थोऽत्र न तथा घटते। हन्त ! खेदे।। ४३।

एवमपि ग्राहिकया निरस्तविक्रमः त्यक्तपौरुषः सन् त्यक्ताभिमानः सन् क्षमामेव यदि सुखस्य साधनं पर्येषि अवगच्छसि चिराय सुखस्य अनन्तःसुखस्योपकरणं क्षमामेव जानासि। तव लक्ष्मीपतिलक्ष्म राज्यलक्ष्मीपतेः लक्ष्मीचिह्नं कार्मुकं धनुर्विहाय त्यक्त्वा जटाधरः सन् पावकं जुहुधी इहि गच्छ। जटाधरो भूत्वा पावकं जुहुधि इहि गच्छाग्निहोत्रं जुह्वन्। आशु किं धनुषा पौरुषचिह्नेन तव कार्यमिति। इणो लोट् मध्यमैकवचनम्। हि तत इहीति रूपम्। लोकोक्तिरेषा। न पुनरत्र गमनमेव विधीयते। यथा 'बहुनाऽत्र किमुक्तेन व्रज भर्तारमवाप्नुहि'। 'उदन्वन्तमनासाद्य महानद्यः किमासते'। चिराय चिरमनन्तसुखेत्यर्थः। ४४।

अथ मन्यसे मया समयः कृतो यथा त्रयोदश समा यावद्वने वस्तव्यं तत्कथमकाण्डे समयभङ्गं करोतीत्याशङ्क्याह - हे नृप ते ! तव भूरिधाम्नः महातेजसो निकृतिपरेषु शत्रुषु

जोनराजटीका

निरस्तं त्यक्तं साधनं जयोपायो येन स त्वं क्षमामेव सुखस्य साधनमुपायमथ पर्येषि यदि मन्यसे, गच्छ राजचिह्नं धनुस्त्यक्त्वा जटाधरो भवन्नग्निं तर्पय। सर्वचेष्टा हि सुखार्थाः। तदेव क्षमालभ्यं यदि मन्यसे तर्हि युद्धक्लेशावहं धनुः किमर्थम्?।। ४४।।

स्वयं कृताया मर्यादाया नोल्लङ्घनं युक्तमित्याह- छलेन निकारप्रवृत्तेषु शत्रुषु समयपरिरक्षणं मर्यादापालनं न ते युक्तम्। यतो भूरिधाम तेजो यस्य सः। अशक्तो हि

लघुटीका

आपदेव पयोधिः समुद्रस्तत्र मग्नं निमग्नं बुडितम्। एवंविधं त्वां साम्प्रतं पुनरपि राजलक्ष्मीः आभिमुख्येनोपैतु। रिपुसंज्ञं तिमिरम्। उदस्यापनीयोदीयमानमुद्यन्तं दिनकृतं श्रीः सूर्यं यथा लक्ष्मीः समभ्येति सोऽपि भगवान् विधिसमयनियोगाद्दीप्तिसंहारेण जिह्मो भवति शिथिलबलश्च भवति। अगाधे आपद्रूपे पयोधौ मज्जति सविता। निशि महार्णवे निमज्जतीत्यागमः। रिपवः तिमिरमेवेति व्याघ्रादेराकृतिगणत्वात् समासः। व्याघ्रस्येव पादौ यस्य स व्याघ्रपात्। उदीयमानमिति ई-गतौ दैवादिकस्येत्यात्मनेपदिनो रूपम्।४६।

।। इति श्रीप्रकाशवर्षकृतौ किरातार्जुनीयलघुटीकायां प्रथमसर्गः समाप्तः।।

जोनराजटीका

न कृतः। किन्तु शत्रुकृतेन मोहेनेत्यर्थः। अमुमेवार्थं विशेषेणोपोद्बलयति- विधेर्विधिविशेषस्य दुरोदराख्यस्य समयः पूर्वो नियोगः नियोजनं तस्मात्। दीप्तिसंहारेण जिह्मं सङ्कुचितमत एव शिथिलं बलं यस्मिंस्तथा। दुर्विगाहे विपत्समुद्रे मग्नम् इति राजपक्षे योजना। सूर्यपक्षे तु समयस्यकालस्य नियोग एतावता कालेनार्कोऽस्तमेष्यति इति विधेराज्ञा तेन दीप्तिसंहारजिह्मं रिपुभूतं तिमिरं हत्वोदयन्तं रविं यथा दिनादौ प्रभाते श्रीरभ्येति तथा भवन्तं जयश्रीरभ्युपेयादिति भद्रम्।।४६।।

।। इति श्रीकिरातार्जुनीये महाकाव्ये श्रीजोनराजविरचितायां टीकायां प्रथमः सर्गः।।

***

[अथ द्वितीयः सर्गः]

विहितां प्रियया मनः प्रियामथ निश्चित्य गिरं गरीयसीम्।
उपपत्तिमदूर्जिताश्रयं नृपमूचे वचनं वृकोदरः।। १।

अन्वयदीपिका

विहितामिति। अथानन्तरं द्रौपद्युक्त्यनन्तरं वृकोदरो भीमः नृपं युधिष्ठिरम् ऊचे उक्तवान्। कर्तरि लिट्। ब्रुवो वचिरादेशः। वृकस्य उदरमिव उदरं यस्य सः वृकोदरः <वृकनामाऽग्निः उदरे यस्य सः> [किं लक्षणं वचनम्?] उपपत्तिमत्। उपपत्तिरस्यास्तीत्युपपत्तिमत्। [पुनः किं लक्षणं वचनम्।] ऊर्जिताश्रयम्। ऊर्जितः उदारार्थः। तस्याश्रयं महार्थम्, गम्भीरार्थमित्यर्थः। ऊर्जितस्य वीररसस्य आश्रयम्। ऊर्जितानामाश्रयो यस्य तत् ऊर्जितम् इति यावत्। [किं कृत्वा?] गिरं वाणीं निश्चित्य ज्ञात्वा। [किं लक्षणां गिरम्?] गरीयसीं, सारवतीम्। प्रियया द्रौपद्या विहिताम् उक्ताम्। प्रियाग्रहणमस्या हितोपदेष्टृत्वसूचनार्थम्।

लघुटीका

अथ वृकोदरो भीमो नृपं युधिष्ठिरं वचनमूचे उवाच। [किं कृत्वा?] प्रियया विहिताम् अभिहितां वाचं गरीयसीं निश्चित्य गरीयसीत्वेन निश्चित्य। तच्च गरीयस्त्वं हिताभिधेयता। अत एव उत्साहगुणयोगान्मनः प्रियां, न पुनः प्रिययाऽभिहिता इत्येव प्रिया। [किं भूतं वचनम्?] उपपत्तिमत्। सयुक्तिकं तथा ऊर्जितस्य आश्रयं वीररससम्बद्धम्। द्रौपद्या यदभिहितं तदेव युक्तियुक्तं वीररससम्बद्धमवोचदित्यर्थः। प्रियया इति साभिप्रायं अभिधानम्। यद्रुचिरं वल्लभाभाषितं च तदवश्यं समर्थनीयमित्यभिप्रायः। ओजोनिष्ठायामूर्जितमिति रूपम्।

जोनराजटीका

द्रौपद्या कृतामभूतपूर्वरचनयोत्पादितामर्थैर्गुरुतरामत एव मनसो न तु श्रुतेरेव वीणाशब्दवत्प्रियां वाचं निश्चित्य भीमसेनो नृपं युधिष्ठिरं वचनमवदत्। प्रतिज्ञातस्यार्थस्य समर्थकानां हेतूनामुपन्यास उपपत्तिर्विद्यते यस्य तत्। तयोर्जितो न तूपप्लवमान आश्रयो गृहीतपक्षो यस्य तत्। द्रौपदीमतमेव सारमिति कृतनिश्चयो भीमो वाचमन्ववददित्यर्थः। प्रिययेत्यनेन द्रौपदीवचसामनुपप्लत्वं सूचयति। सा हि कान्तप्रेमस्मरणात्सावधानं वक्ति। अमनःप्रियामित्यकारप्रश्लेषेणाऽमनसामपि प्रियामिति व्याख्येयम्।।१।।

यदवोचत वीक्ष्य मानिनी परितः स्नेहमयेन चक्षुषा।
अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयम्।। २।।

अन्वयदीपिका

अत एव मनःप्रियाम्। मनसः प्रिया मनःप्रिया। ताम्। अभिमतार्थसंयोगान्मनोहराम्। विहितामिति विपूर्वस्य दधातेः क्रियासामान्यवाचिनो योग्यविशेषतात्पर्यावसानात् विशेषणद्वयेनापि गिरो ग्राह्यत्वमुक्तम्।। १।।

किमवोचदित्याह- **यदवोचदिति**। मानिनी क्षत्रियकुलाभिमानवती द्रौपदी यद्वचनम् अवोचत् अवादीत्। स्नेहमयेन स्नेहरसप्रचुरेण चक्षुषा ज्ञानचक्षुषा। परितः समन्तात् सर्वत्र परिणामम् अवेक्ष्य परिपाकं विचिन्त्य। स्नेहमयेन इति आप्तत्वमुक्तम्। यद्वा नौ अस्मान् अवेक्ष्येति शेषः। तद्वचनं सर्वस्यापि विस्मयं विदधीत कुर्वीत। [किं लक्षणं वचनम् ?] वागधिपस्यापि बृहस्पतेरपि दुर्वचं वक्तुमशक्यम्। यद्वा तद्वचनं वागधिपस्यापि विस्मयं

लघुटीका

वचेर्द्विकर्मकत्वान्नृपो वचनं च कर्म। ऊचे-ब्रूञ् वचिर्ञ्यनुबन्धत्वादुभयपदम् अतिशयविशिष्ट-त्वात्। गुरुशब्दादिष्ठेमेयःस्सु प्रियस्थिरादिना (६.४.१५७) गरादेशे स्त्रियामीप्रत्यये गरीयसीति रूपम्।१।

किं तद्वचनमित्याह- मानिनी द्रौपदी यद्वचनमवोचत् तद्वचनं वागधिपस्यापि विस्मयं विदधीत। स्नेहाद्धेतो रागतो यत्तत् स्नेहमयं चक्षुः। चक्षुरिव चक्षुस्तेन स्नेहपूरितेन चक्षुषा परितः समन्ताद्वीक्ष्य कार्यं पर्यालोच्य। स्नेहं प्रकृतौ यत्र तत् स्नेहमयम्। प्रकृतौ मयट्। तेन स्नेहमयेन स्निग्धेन चक्षुषा अस्मान् ईदृगवस्थान् दृष्ट्वेव। यदवोचत तत् वाचस्पतेरप्याश्चर्यं

जोनराजटीका

द्रौपदी स्त्रीत्वादुक्तिं नाजानादिति भीमो वक्तुकाम इति राज्ञः सम्भावनामाशङ्क्याह- मानिनी द्रौपदी स्नेहदृष्ट्या विमृश्य यदवोचत्तद्वाचस्पतेरप्याश्चर्यं कुर्वीत बृहस्पतिनापीदृग्वक्तुं न शक्यते इत्यर्थः। सम्भावनायां लिट्। दुर्वचं कृच्छ्रेण वक्तुं शक्यम्। इदमेव वक्तुं प्राप्तकालमिति वचने विशेषप्रतिपादनात्। अपि शब्दादस्मादृशां न कथमाश्चर्यमिति सिद्धम्। यद्वा वागधिपस्यापि दुर्वचमिति विस्मयविधाने हेतुत्वेन योज्यम्।।२।।

विषमोऽपि विगाह्यते नयः कृततीर्थः पयसामिवाशयः।
स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः।। ३।।

अन्वयदीपिका

विदधीतेति सम्बन्धः। दुर्वचम्। केनापि वक्तुमशक्यम् इति शेषः। यतो स्त्रैणमपि शास्त्रम् अनुरुणद्धि हितञ्चानुबध्नाति अतो विस्मयकारणं स्वीकार्यं चेत् तद्वचनमिति तात्पर्यम्।। २।।

विषमोऽपीति। विस्मयकरत्वे हेतुमाह - हे राजन् ! पुंसां विषमोऽपि दुर्बोध्योऽपि नयो नीतिशास्त्रं विगाह्यते गृह्यते।[किं लक्षणो नयः?] कृततीर्थः। कृतः तीर्थः गुरुर्यस्मिन् शास्त्रे यः सः कृततीर्थः। कृताभ्यासाद्युपायः। 'तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु' इति **विश्वः**। कृतोपाध्यायेन पुंसा नीतिशास्त्रं व्याख्यातुं शक्यत इत्यर्थः। [क इव ?] पयसाम् आशय इव। ह्रद इव। यथा पयसाम् आशयः पुंसा पुरुषेण विषमोऽपि दुस्तरोऽपि विगाह्यते प्रविश्यते। [किं लक्षणः जलाशयः ?] कृततीर्थः। <स>सोपानमिति यावत्। यस्मिन् ह्रदे <तीर्थः = सोपानं> सः कृततीर्थः। 'तीर्थं योनौ जलावतारे' चेति **हलायुधः**। तु पुनरर्थे।

लघुटीका

कुर्यात् किं पुनरन्येषाम् ? [किं भूतं?] कृच्छ्रेण वक्तुं शक्यम्। मानिनी अहङ्कारवती। एतच्च साभिप्रायं वचनम्। विदधीत संभावने लिङ्। २।

अथ मन्यसेऽतिवैषम्यात् दुर्ज्ञानं नीतिशास्त्रम्। तदजानत्याः कथमिवास्या वचनं साधीयः स्यात् इत्याशङ्क्याह- नयो नीतिशास्त्रं बार्हस्पत्यादिनयो विषमोऽपि दुर्बोधोऽपि कृततीर्थो विहितागमश्रुतिः सन् स विगाह्यते प्रथमविहितप्रवेशावतारः सन् अवबुद्धः सन्

जोनराजटीका

इदं वचनं वाक्पतिमप्याश्चर्ययतीत्युक्तम्। अत्रोपपत्तिमाह- विषमो दुर्बोधोऽपि नयो नीतिशास्त्रं जनेन विगाह्यते बुध्यते। यतः कृतानि तीर्थानि विवरणानि यत्र सः। यथा पयसामाशयः कूपादिः। तत्पक्षे विषमोऽगाधः कृततीर्थो विहितसोपानः। तत्र नयने य आधारः स पुमान्पुनः विशेषेण बोद्धृसकाशादतिशयेन दुर्लभः, यः कृत्यं कर्तुं प्राप्तकालमस्मिन्देशे

अन्वयदीपिका

तत्र नये सः तादृशः पुरुषः विशेषदुर्लभः। विशेषेण अत्यन्तं दुर्लभः दुष्प्राप्यः। कर्तृकरणे कृता बहुलमिति समासः। कृत्यं वर्त्म सत् उपन्यस्यति। सन्धिविग्रहयानासनसञ्चयद्वैधीभावाख्यं <कार्यं> स्नानादिकं च कार्यम्। तस्य कार्यस्य वर्त्म। कर्मपदम्। सत् साधु सम्यक् देशकालाद्यविरुद्धं यथा भवति तथा उपन्यस्यति उदाहरति कथयति। 'उपन्यासस्तु वाङ्मुखम्। उपोद्घात उदाहार' **इत्यमरः**। **जलाशय**पक्षे- तत्र जलाशये यः पुमान् सत् साधु सम्यक् यथा भवति तथा गर्तपाषाणादिरहितं प्रदेशम् उपन्यस्यति उदाहरति दर्शयति सः विशेषदुर्लभः। यथा केनचित् कृततीर्थे पयसि गम्भीरप्रवेष्टारः सन्ति तीर्थकरस्तु <सोपानकर्ता> विरलः तद्वन्नयेऽपि गूढं तत्त्वम्। सति वक्तरि बोद्धारः सन्ति वक्ता तु न सुलभः। इयं च साधु वक्तीति युज्यते विस्मय इत्यर्थः।। ३।।

लघुटीका

व्याप्यते। यो यत् शृणोति स तत् शास्त्रं विषममपि जानातीत्यर्थः। तु पुनः। स विशेषदुर्लभः। यस्तत्र नये कृत्यवर्त्म कार्यतत्त्वं सत् शोभनं देशकालावस्थोचितम् उपन्यस्यति प्रतिष्ठापयति तस्माच्छास्त्रेण न किञ्चित्। किन्तु कृतज्ञतैवोपादेया। तथा च शास्त्रमपि 'केचिदिदानीमस्मिन्नवसरे किं प्राप्तमिति पृष्टे दृष्टं शास्त्रमेवोद्ग्राहयन्तो दृश्यते। प्रकृते प्रारब्धे कार्ये तु न किञ्चिदाचक्षते। कृत्यवर्त्म(स्तु) कार्यतत्त्वम्। विशेषेण दुर्लभः इति कर्तृकरणे कृता बहुलम् इति समासः। तावच्छास्त्रज्ञो दुर्लभः। गूढं कार्यतत्त्वं यः प्रकटार्थं कृत्वा दर्शयति स पुनः सुतरां दुर्लभः इत्यर्थः। यथा पयसाम् आशयो ह्रदः कृततीर्थो विहितसोपानः सन् विषमोऽपि दुरवतारोऽपि विगाह्यते प्राप्यते। तत्र ह्रदे यः सन् सुगमं वर्त्म उपन्यस्यति विरचयति स तु पुनर्विशेषदुर्लभः। अथ स्वल्पमनयाभिहितम्।।३।।

जोनराजटीका

काले वेदं कर्तव्यमित्येवं रूपं वस्तु सम्यक्कृत्वोपन्यस्यति प्रयुङ्क्ते। नीतिशास्त्रे बहूनां बोधमात्रम्, द्रौपद्यास्तु नीतिप्रयोगेऽपि कौशलमित्यर्थः। तत्र बोद्धृषु मध्ये इति निर्धारणसप्तमी वा।।३।।

परिणामसुखे गरीयसि व्यथकेऽस्मिन्वचसि क्षतौजसाम्।
अतिवीर्यवतीव भेषजे बहुरल्पीयसि दृश्यते गुणः।। ४।।

अन्वयदीपिका

अथ अस्याः द्रौपद्याः वचनं ग्राह्यं तत्र हेतुमाह- **परिणामेति।** पुनः किमुवाचेत्याह- हे राजन्! अस्याः द्रौपद्याः अस्मिन् वचसि वचने अभिमानरक्षणराज्यलाभादिः बहुरनेकः गुणः दृश्यते। [कस्मिन्निव?] भेषजे इव। औषधे इव। यथा औषधे बहुर्महान् आरोग्यबलपोषादिगुणो दृश्यते तद्वदित्यर्थः। [किं लक्षणे वचसि?] परिणामसुखे। परिणामः फलकालः। तत्र सुखहेतौ। [किं लक्षणे भेषजे?।] अल्पीयसि। स्वल्पतरे। परिणामसुखे। रोगपरिपाकावस्थायां सुखे सुखकारिणि। गरीयसि भूयिष्ठे। गरीयसि श्रेष्ठे। क्षतौजसां व्यथके। युद्धाद्युपोद्बलकत्वाद्भयदायिनि। क्षतौजसाम्। क्षतं क्षीणम् ओजः बलं शक्तिर्येषां ते क्षतौजसः, तेषाम्। [पुनः किं लक्षणे भेषजे?] अनेन शान्तिर्भविष्यति न वेति संशयादिदुःखजनके।

लघुटीका

तदत्र भवन्नपि कियान् गुणः स्यात् इत्याह– अस्मिन् वचसि अल्पीयस्यपि बहुर्गुणो दृश्यते। [कीदृशे] परिणामे आयत्यां सुखे हिते तथा गरीयसि महाफलाभिधेये। तथा श्रद्धाप्रवर्तकत्वात्। क्षतौजसां निस्तेजसां भीरूणां व्यथके त्रासजनके। एवंविधेऽस्मिन् वचने सुतरामल्पेऽपि बहुर्भूयान् हितोपदेशलक्षणो गुणो दृश्यते। यथा गरीयसि दुर्जरेऽतिवीर्यवति बलीयसि परिणामहितकारिणि सम्प्रति पुनः कटुकत्वादुद्वेगकारिणि। क्षतौजसां तेजः क्षतवताम्। पीडावहे किराततिक्तकादौ द्रव्ये स्वल्पेऽपि ज्वरादिनिवृत्तिलक्षणो महान् गुणो लक्ष्यते। अहोऽत्र तु विशेषः। भिषज इदं भेषजम्। अनन्तावसथेतिह भिषजाञ्ज्यः (५.४२३) भिषज इति कृते इति निपातनाद् गुणः।४।

जोनराजटीका

पूर्वश्लोकेन सामान्यद्वारेण द्रौपद्युक्तिं स्तुत्वा साक्षात्स्तोतुमाह- परिणामेऽपि न पुनरामुख एव सुखं यस्मात्तस्मिन् <यत्परिणामे सुखं तस्मिन्> तथार्थैरतिगौरववति। तथातिवीर्येण एव निरोजसां व्यथावहेऽस्मिन् वचस्यल्पीयस्यपि बहुर्गुणो दृश्यते। यथा भेषजे औषधे मात्रयाल्पेऽपि बहुर्गुणो रोगनिवृत्तिरूपो दृश्यते। तत्पक्षे परिणामे विपाके सुखम्। गुरुः गुणयुक्ते। ओजोधातुः तेजः। वीर्यमुष्णशीतगुणोत्कर्षः।।४।।

इयमिष्टगुणाय रोचतां रुचिरार्था भवतेऽपि भारती।
ननु वक्तृविशेषनिस्स्पृहा गुणगृह्या वचने विपश्चितः।। ५।।

अन्वयदीपिका

[पुनः किं लक्षणे वचसि ?] अतिवीर्यवति। वीरमोहात्मकत्वादनल्पसामर्थ्यवति। [पुनः किं लक्षणे भेषजे?] रोगशान्तिकरणसामर्थ्यादतिवीर्यवति। **भेषजौषधभैषज**मित्यमरः। अतोऽस्या वचनं ग्राह्यमिति भावः। श्लेषालङ्कारः।।४।।

सत्यम्, एवंविधमप्येतद्वचनं मह्यं न रोचते। किं करोमीत्याह- **इयमिति**। हे राजन् ! इयं भारती द्रौपदीवाक्यं भवतेऽपि रोचतां प्रियतां स्वदतामित्यर्थः। [किं लक्षणा भारती ?] रुचिरार्था। रुचिरो मनोहरो महितो वा अर्थो यस्याः सा रुचिरार्था। सम्पन्नार्था इत्यर्थः। मह्यं रोचते भवतेऽपि रोचतामित्यर्थः। यतः <किं लक्षणाय भवते ?> इष्टगुणाय। इष्टाः अभिमताः गुणाः यस्य असौ इष्टगुणः तस्मै। गुणग्राहिणे इत्यर्थः। रुच्यर्थानां प्रीयमाण इति चतुर्थी।

लघुटीका

यस्मादियं भारती परिणामसुखत्वादिगुणयोगाद्रुचिरार्था, भवांश्च इष्टगुणः गुणगृह्या वचने विपश्चितः। अतोऽस्मभ्यमिव भवतेऽपि तुल्यमपि रोचताम्। योषिदुक्तं कथं मादृशा गृह्णीयुरित्याह- ये विपश्चितो दक्षाः ते गुणगृह्या वचने, वचने गुणपक्षाः गुणपक्षपातिन एव भवन्ति। वक्तृविशेषे विदुषि अविदुषि वा निःस्पृहाः। विद्वानयम् अविद्वानयमित्यत्रादरं न कुर्वन्ति। यतस्त्यं ततस्त्यं वा सुभाषितम् आद्रियन्ते इत्यर्थः। 'बालादपि सुभाषितम्' इति वचनात् स्त्रियैतदुक्तमित्येतावताऽत्रानादरो न युक्तः। ननु प्रश्ने। <गुण> गृह्या इति पदास्वैरिबाह्यापक्ष्येषु च (३-१-) इति क्यप्। ५।

जोनराजटीका

द्रौपद्याः स्त्रीत्वादुक्तिं मा वमंस्था इत्याह- एवं सत्यल्पेऽप्यर्थवाक्ये बहुगुणत्वाद् भवतेऽपीयं वाग् रोचताम्, यतो रुचिरोऽर्थो यस्याः सा इष्टगुणाय गुणा एव तुभ्यं रोचन्ते ते चात्रोक्तौ सन्तीत्येषा वागनुष्ठेयेत्यर्थः। स्त्रीवचनं कथं गृह्यते इति निरसितुमाह- ननु यस्मादर्थे, निश्चये वा। वक्तृविशेषे पुरुषादौ निःस्पृहाः पण्डिता वचनस्थेषु गुणेषु गृह्याः सस्पृहाः। इयं स्त्री तस्मादस्या वचोऽनादरणीयमित्यत्र भवता न स्थातव्यम्। गुणा एव त्वया पोषणीया इत्यर्थः।।५।।

चतसृष्वपि ते विवेकिनी नृप! विद्यासु निरूढिमागता।
कथमेत्य मतिर्विपर्ययं करिणी पङ्कमिवावसीदति।। ६।।

अन्वयदीपिका

बालादीनामपि हितवचनेच्छां कुर्यादिति भावः। तथापि अबलावचने का श्रद्धा ? तत्राह- ननु वितर्के। विपश्चितः पण्डिताः वचने वचनविषये वक्तृविशेषनिस्स्पृहाः। वक्तृणां विशेषः वक्तृविशेषः तस्मिन्। स्त्रीपुंसादिलक्षणे वक्तृविशेषे निस्स्पृहाः। निर्गता स्पृहा येभ्यः ते निस्पृहाः। [नराः किं लक्षणाः] विपश्चितः गुणग्राह्याः। गुणानां <गुणैः> वा ग्राह्याः गुणग्राह्याः। गुणपक्षपातिन इत्यर्थः। आबालादेरपि सुभाषितं ग्राह्यमिति न्यायादिति भावः। अर्थान्तरन्यासोऽलङ्कारः। विद्वान् विपश्चिद्दोषज्ञ **इत्यमरः**।। ५।।

सम्प्रति स्वयमुपालभते **चतसृष्वपीति**- हे नृप ! ते तव मतिः बुद्धिः कथम् अवसीदति ? कथं नश्यति ? न युक्तमिति भावः। [किं विपर्ययं वैपरीत्यम् एत्य।] अविवेकरूपत्वं प्राप्य। [किं लक्षणा मतिः?] चतसृष्वपि विद्यासु रूढिमागता प्रसिद्धिं गता विख्याता। [पुनः किं लक्षणा मतिः] विवेकिनी एव। सदसद्विवेकवती। [का इव?] करिणीव। यथा करिणी हस्तिनी पङ्कम् एत्य कर्दमं प्राप्य अवसीदति नश्यति पुनर्न

लघुटीका

ननु कथं वक्तृविशेषे स्पृहा न स्यात्। यावता ये शास्त्रविदो वक्तारः तेषां मतिः अविपर्यस्ता भवतीत्याह– यद्येवं कथं तव मतिः चतसृष्वपि विद्यासु निरूढिं निश्चयस्थितिमागता। तथा विवेकिनी विचारचतुरा मतिर्विपर्ययं प्राप्यावसीदति मुह्यति। विपर्ययोऽन्यथात्वम्। विपरीतार्थदर्शनम् एतेनावसादः। कार्येषु न व्यवसायः। तथा विवेकिनी। हेयोपादेयोपेक्षाविचारसमर्था। अन्वीक्षिकी त्रयी वार्ता दण्डनीतिरिति चतस्रो राजविद्याः। तासु निरूढिम् आगता निश्चयस्थितिं प्राप्ता। एतद्वक्तृविशेषनिस्स्पृहा गुणगृह्या वचने विपश्चितः। यथा करिणी हस्तिनी पङ्कं कर्दमं प्राप्याऽवसीदति तत्रैव मज्जति नोत्तरति। ६।

जोनराजटीका

द्रौपदीवचने एव मोहादनादर इति प्रतिपादयितुमाह- कथं विपर्ययं मोहमेत्य तव मतिर्बुद्धिरवसीदति? युक्तमप्येतद्वचनम्, किमपि न लिप्ससीत्यर्थः। यतश्चतुस्सङ्ख्यासु राजविद्यास्वान्वीक्षिकी-त्रयी-वार्ता-दण्डनीतिषु विवेकिनी न तु गतागतिकत्वेन निरूढिं सक्तिं प्ररोहं गता। यथा हस्तिनी पङ्कं प्राप्यावसीदति। पङ्क इति वा पाठः।। ६।।

विधुरं किमतः परं परैरवगीतां गमिते दशामिमाम्।
अवसीदति यत्सुरैरपि त्वयि संभावितवृत्ति पौरुषम्।। ७।।

अन्वयदीपिका

निस्सरति। एतदयुक्तं तवेति भावः। चतस्रो विद्या आह कामन्दकः

आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती।
विद्या एताश्चतस्त्रश्च लोकनां स्थितिहेतवः।। इति।

चतुर्णां विद्यानां लक्षणमाह- आन्वीक्षिकी तर्कविद्या। त्रयी वेदत्रयी। वार्ता कृषिगोरक्ष्य वाणिज्यादिः। दण्डनीतिः नीतिशास्त्रम्। चतुर्णां विद्यानां प्रयोजनमाह-

आन्वीक्षिक्यां तु विज्ञानं धर्माधर्मौ त्रयीस्थितौ।
अर्थानर्थौ तु वार्तायां दण्डनीत्यां नयानयौ।। उपमालङ्कारः दृष्टान्तश्च। तयोः संसृष्टिः।। ६।।

किन्नश्छन्नं ये नेत्थमुपालभतेत्याह- **विधुरमिति**। हे युधिष्ठिर! पौरुषं पुरुषव्यापारः त्वयि अवसीदति नश्यति। अतः परम् अतोऽन्यदधिकं किं विधुरम् ? किं कष्टम् ? न किञ्चिदित्यर्थः। विधुरं कष्टविश्लेषयोरिति **वैजयन्ती**। [किं लक्षणे त्वयि ?]। परैः शत्रुभिः इमाम् ईदृशीं दशाम् अवस्थां गमिते प्रापिते।[किं लक्षणां दशाम्।] अवगीतां गर्हिताम्।

लघुटीका

अथ वेत्सि विधुरतां विनैव कथं मर्यादामुत्सृजेयमित्याशङ्क्याह- यस्य पौरुषस्य देवैरपि त्वयि संभाविता वृत्तिः सत्ता तत्पौरुषं यदिदानीमवसीदति क्षीयतेऽतः परं किं विधुरं स्यात् ? अतोऽन्यः को विपश्चित् स्यात्। युधिष्ठिरे एव निरवद्यं पौरुषम् इत्येवंविधा वृत्तिः संभाविता देवैरपि। न च दैववशात्पौरुषक्षतिर्येन विधुरं न भवेत्। किं भूते त्वयि ? परैः शत्रुभिरिमामेवंविधामवगीतां निन्द्यां दशामवस्थां गमिते सति त्वयि पौरुषमवसीदति। अतः परं किं विधुरं त्वयीत्यधिकरणे सप्तमी वा। ७।

जोनराजटीका

विपदि मर्यादोल्लङ्घनं न दोषावहम्, न चास्माकं विपदिति धैर्यनिधे राज्ञो मतमाशङ्क्याह- अतः परं किं विधुरं का विपत्? अतः कुत इत्याह- सुरैरपि सम्भाविताऽस्तित्वेनानुमता वृत्तिर्यस्य। तत्तद्विषयं पौरुषं यदवसीदति। यतः परैः शत्रुभिर्न तु विधिना इमां दशामवस्थां प्रापिते अवगीतां गर्हिताम्।।७।।

द्विषतामुदयः सुमेधसा गुरुरस्वन्ततरः सुमर्षणः।
न महानपि भूतिमिच्छता फलसम्पत्प्रवणः परिक्षयः।। ८।।

अन्वयदीपिका

निन्दिताम्। 'अवगीतञ्च निवादे मुहुः दष्टे च गर्हिते' **इति विश्वः**। [किं लक्षणं पौरुषम्।] यत् यस्मात्कारणात् सुरैरपि सम्भावितवृत्ति। सुरैरपि इन्द्रादिभिः देवैरपि सम्भावितवृत्ति। सम्भाविता बहूकृता वृत्तिः प्रसरो यस्मिन् तत् सम्भावितवृत्ति। अथवा निश्चितसद्भावः क्वापि न व्यभिचरतीति। पौरुषमिति। पौरुषाधिकस्य दुर्दशा कष्टतरा। सा चेत्पुनः शत्रुता स्यात्तन्महत्कष्टम्। तच्च तदुपेक्षयैतदुक्तम् उपालभते इति। ७।

अथोपेक्षाकालत्वादियमुपेक्षा इत्याशङ्क्य नायमुपेक्षाकाल इति वक्तुं तदेव तावत् श्लोकद्वयेन विविनक्ति- ।**द्विषतामिति।** हे राजन्! सुमेधसा सुष्ठु मेधा यस्यासौ सुमेधाः। तेन सुमेधसा। विजिगीषुणा पुरुषेण द्विषां शत्रूणां गुरुरपि महानपि गरीयानपि उदयः अभ्युदयो वृद्धिः सुमर्षणः सुखेन मृष्यत इति सुमर्षणः। सुसहः उपेक्ष्यः [इत्यर्थः।] कदा सुसह इत्याह- यदि अस्वन्ततरः। अत्यन्त-दुरन्ततरः क्षयोन्मुखः। शोभनोऽन्तः स्वन्तः। अतिशयेन स्वन्तः स्वन्ततरः। न स्वन्ततरः अस्वन्ततरः। शोभनोऽन्तो न भवेत् तदा उपेक्ष्यः। अथ च द्विषतां शत्रूणां महानपि परिक्षयः विनश्यदवस्था न सुमर्षणः नोपेक्षणीयः। [किं लक्षणः परिक्षयः?] फलसम्पत्प्रवणः। फलसम्पत्त्या प्रवणः फलसम्पत्प्रवणः। उन्मुखश्चेद्भवति उदयोन्मुखो भवति।

लघुटीका

अथ मन्यसे मया नायं पौरुषावसादः कश्चित्। किं तर्हि? अहमेव द्विषामुदयं पश्यामीत्यशङ्क्याह- सुमेधसा निपुणबुद्धिना पुरुषेणाभ्यन्तरो यः शत्रूणामुदयः स सम्प्रति गुरुरपि सुमर्षणः उपेक्षणीयः। स्वयमेव विनंक्ष्यतीति कृत्वा सुसोढव्यः। एतदुक्तं भवति- यद्यपि वृद्धिरुपेक्षणीया शत्रोः इत्युक्तम्। ततो यदि सुयोधनस्याऽभ्युदय उपेक्षेत यद्यस्वन्ततरः

जोनराजटीका

'पतनान्ताः समुच्छ्रया' इत्यस्माद्वैरिणः स्वयमेव पतिष्यन्तीत्यस्माभिः सत्यान्न स्खलनीयमिति राजमतमाशङ्क्याह- भूतिमिच्छता लक्ष्मीकाङ्क्षिणा सुमेधसा मतिमता कर्त्रा द्विषताम् उदयो वृद्धिर्गुरुर्महानपि सुमर्षणः शत्रोरुदस्य नाशे प्रयत्नो न कार्यः साधनीयस्य

अन्वयदीपिका

अन्यथा उपेक्ष्य इति भावः। न ह्युदय इत्येव प्रतिकार्यः। न च क्षय इत्येवोपेक्ष्यः। किन्तु स्वन्तत्वास्वन्तत्वाभ्याम् उभावपि प्रतीकार्यौ उपेक्ष्यौ च भवतः। [किं लक्षणेन ?] सुमेधसा भूतिमिच्छता सुधियेत्यर्थः। 'धीर्धारणावती मेधा' **इत्यमरः**।। ८।।

लघुटीका

स्यात्। यस्मात् उपेक्षैव परस्य वृद्धिं प्रनष्टनीतेरजितेन्द्रियस्य मदातियुक्तस्य विरागहेतुः समूलघातं विनिहन्ति यान्ति। यथा तु साम्प्रतं चरेण त्वदीयो व्यवहारः उक्तः। तथा सुतरामभ्युदयावसानो नियतमसौ लक्ष्यते तत्कथं मर्षयितुं युज्येत ? उपेक्ष्यमाणो हि वर्धिष्णुतरः स्यात्। तस्मात् यावत् न वर्धतेतरां तावत् मूलच्छेदमेव तस्य कर्म इति। एतेन वृद्ध्युपेक्षायां विषयविभाग उक्तः। इदानीं प्रसङ्गात् शत्रुकृशताविषयेऽपि दर्शयति। तथा भूतिमिच्छता राज्ञा द्विषतां शत्रूणां संप्रति महानपि यः परिक्षयो <नाशः> फलसम्पत्प्रवणः पुरस्तादर्थानुबन्धी सन् सुमर्षणः नोपेक्षणीयः। एतदुक्तं भवति- योऽपि हि तावदयं क्षयः सर्वत्रोपेक्षणीयः तयोक्तः। सोऽपि यदि अभ्युदयान्तो भवति तदा नोपेक्षणीयः। किमङ्ग ! पुनरुदयोऽभ्युदयान्तः उपेक्षेत। शोभनोऽन्तो यस्य सः स्वन्तः। प्रकृष्टः स्वन्तः स्वन्ततरः। न स्वन्ततरः अस्वन्ततरः। फलसम्पदर्थातिशयः। तत्र प्रवणः अभिमुखः फलसम्पदभिमुखवर्ती सुखेन मृष्यते इति सुमर्षणः। भाषायां शासुयुधिदृशिधृषिमृषिभ्यो युज्वाच्यः(वा) ३-३-१२८. इति युच्। शोभना मेधा प्रज्ञा यस्य स सुमेधाः। तस्य प्रज्ञामेधयोर्नित्यमसिच्। ८।

जोनराजटीका

स्वयं सिद्धेः। यतोऽतिशयेनास्वन्तो दुरन्तः स्वन्तस्तत्र न सोढव्य इत्यर्थादापतितम्। सुमेधसा द्विषां क्षयोऽपि न सुमर्षणः। यतः फलसम्पदि प्रवणः। यदि शत्रोरुदयश्चरेण दुरन्तो वर्ण्यते ततोऽस्माभिः सोढव्यः। स्वन्त एव तु वर्णित इति क्षमा कथं युक्तेति तात्पर्यम्। यद्वा पूर्वार्धस्य द्वितीयार्धं समर्थकम्। बुद्धिमता शत्रूणामुदयः स्वन्तो न सुमर्षणः। युक्तमेतत्। फलदः क्षयोऽपि यतो न सुमर्षणः। अथवा द्वितीयार्धं प्रथमं व्याख्यायते। दण्डापूपिकयार्थादापतितस्य च पूर्वार्धस्योपन्यासः प्रतिपत्तिगौरवपरिहारार्थः।।८।।

अचिरेण परस्य भूयसीं विपरीतां विगणय्य चात्मनः।
क्षययुक्तिमुपेक्षते कृती कुरुते तत्प्रतिकारमन्यथा।। ९।।

अन्वयदीपिका

अथोभयोरपि मध्ये एकतरस्योदयक्षययोर्गतिमुक्त्वा इदानीं युगपत्परिक्षयगमे गतिमाह- **अचिरेणेति।** कृती कृतमनेनेति। कुशलः पुमान् उपेक्षते। उपेक्षां कुरुते उदासीनस्तिष्ठति। [किं कृत्वा?] परस्य शत्रोः क्षययुक्तिं क्षययोगम् अचिरेण आशु शीघ्रं भाविनीं विगणय्य विचार्य। [किं लक्षणां क्षययुक्तिम्?] भूयसीं महतीं दुरन्ताम्। तथा चात्मनः स्वस्य क्षययुक्तिं विपरीतां चिरभाविनीम् अल्पीयसीञ्च विगणय्य विचार्य। उपेक्षत इति सम्बन्धः। अन्यथा तत्प्रतीकारं कुरुते। उक्तवैपरीत्ये परस्य क्षययुक्तौ अल्पीयस्यां सत्यां स्वस्य च क्षययुक्तौ

लघुटीका

अथ मन्यसे नाऽहं सर्वथा सर्वमुपेक्षे किं तर्हि कालं तावदपेक्षमाणः स्थितः। तत एतदपि न युज्यते इत्याह- अस्त्येतद्यत्कालापेक्षया शत्रूणामपेक्षा, किन्तु यः कृती दक्षः स परस्य क्षययुक्तिम् उपेक्षते। परं तामपि न सर्वाम्। किं तर्हि शत्रोरचिरेणैव कालेन भूयसीं बहुतरां भाविनीं क्षययुक्तिं विगणय्य निश्चित्यात्मनश्चातो विपरीताम् अचिरेण लघीयसीं भाविनीं क्षययुक्तिं विगणय्य निश्चित्य यः पण्डितः कृती स उपेक्षते। तथाविधं क्षययोगं ज्ञात्वा न तत्र प्रतिक्रियामारभते। किन्तु उदासीन एवास्ते। एतदुक्तं भवति-यो यः परस्य सम्प्रति लघीयान् परिक्षयः सोऽचिरेणैव कालेन निश्चितं दुर्नीतत्वान्महान् भविता। एवं विगणय्य। एवंभूतां परस्य क्षययुक्तिम् उपेक्षेत। आत्मन्यपि अतो विपरीतः क्षय उपेक्षणीयः। योऽयं मम

जोनराजटीका

सहसा यत्किमपि न कर्तव्यमिति राजमतमाशङ्क्याह-वर्तमानावस्थापरीक्षयाऽचिरेणाल्पकालेन परस्य शत्रोः क्षययुक्तिं भूयसीं बहुतरां विमृश्यात्मनो विपरीतामत्यल्पां गणयित्वा कृती क्षययुक्तिमपेक्षते लिप्सति, तत्प्रतीकारे यत्नं न करोतीत्यर्थः। साध्यस्य शत्रुजयस्य स्वयं सिद्धेः अन्यथा शत्रोरल्पामात्मनो बह्वीं क्षययुक्तिं लक्षयित्वा तस्याः क्षययुक्तेः प्रतीकारं निवारणं कुरुते। विपत्तिवारणेऽभ्यर्णमेव यततेत्यर्थः। यदि च दुर्योधनस्याचिरेण क्षययुक्तिः स्यादस्माकं च सा व्यपगच्छेत्तदा काममस्माभिर्न त्वरा क्रियते, न तु तदिति त्वरैव युक्तेति तात्पर्यम्।।९।।

अनुपालयतामुदेष्यतीं प्रभुशक्तिं द्विषतामनीहया।
अपयान्त्यचिरान्महीभुजां जननिर्वादभयादिव श्रियः।। १०।।

अन्वयदीपिका

भूयस्यां सत्यां तत्प्रतीकारं तस्याः क्षययुक्तेः प्रतीकारं नाशम् अचिरेण कालेन आशु शीघ्रं कुरुते। एवं च सति यदा शत्रोरुदयः स्वस्य चातिपरिक्षयः, यथास्माकं तदा किं वक्तव्यम्? सद्यः प्रतीकारः कर्तव्यः इत्यर्थात्सिद्धमनुसन्धेयम्।।९।।

तथाप्युपेक्षायामनिष्टमाचष्टे- **अनुपालयतामिति**। पुनः किमुवाचेत्याह- हे राजन्! श्रियः राज्यसम्पदः महीभुजां राज्ञाम् अचिरात् शीघ्रम् अपयान्ति। गच्छन्ति। जहति। उत्प्रेक्षते। जननिर्वादभयादिव लोकापवादादिव। यथा सत्यः स्त्रियः लोकापवादभीतेः पलाय्य

लघुटीका

सम्प्रति महानपि परिक्षयः सोऽचिराल्लघूभविष्यतीति निरूप्य उपेक्षेत। अन्यथा तत् प्रतिकारं कुरुते। अन्यथा क्षययुक्तेर्वैपरीत्ये सति अचिरेणात्मनो भूयसीं भाविनीं क्षययुक्तिं निरूप्य परस्य पुनरचिराल्लघीयसीं विगणय्य तस्याः क्षययुक्तेः प्रतीकारं प्रतिक्रियां कुरुते। तदानीं युध्यते इत्यर्थः। अचिरेण शीघ्रमेव तत्प्रतिकारं कुरुते इति व्याख्येयम्। यदि हि अन्यथा सति शीघ्रं तत्र प्रतिक्रियां न कुर्यात्तदा परो दिवसाद्दिवसं वर्धते। यथा सुयोधनः स्वयं च हीयते, यथा वयम्। एतेनाऽवश्यं क्षीणस्यावतर्स्यतः शत्रोरुपेक्षा न कार्या। किं पुनर्यस्य क्षयगन्धोऽपि नास्ति प्रत्युत उत्तरोत्तरं वृद्धिरेव यस्य स सुयोधनः शीघ्रमेव प्रतिकर्तव्यः। युद्धे हन्तव्य एव। पूर्वश्लोकेन केवलं क्षयो न मर्षणीयः इत्युक्तम्। अनेन पुनरनुपेक्षणीयः प्रदर्शितः। अनुपेक्षणीयस्याऽपि अचिरेण तत् प्रतिकारं कुर्यादिति च। ननु अनुपेक्षणीये प्रदर्शिते तद्विपरीत उपेक्षणीयः इत्यर्थादेवोक्तं भवति।९।

न वयं सहसा देवसूत्राणि करिष्याम इत्याशङ्क्यावतर्स्यतां शत्रूणाम् उपेक्षायां यो दोषः स्यात्तमाह-ये राजानो निरीहतया उदासते तेषां श्रियोऽपयान्ति पलाय्य गच्छन्ति।

जोनराजटीका

अनीहमानानां राज्ञां क्षयः कथं नाम विघटतां यावदर्जितापि श्रीर्नश्यतीत्याह- उदेष्यतीमुदयं प्राप्स्यन्तीं द्विषतां सम्बन्धिनीं प्रभुशक्तिमचेष्टयाऽनुत्साहेन करणेनानुपालयतां

क्षययुक्तमपि स्वभावजं दधतं धाम शिवं विवृद्धये।
प्रणमन्त्यनपायमुत्थितं प्रतिपच्चन्द्रमिव प्रजा नृपम्।। ११।।

अन्वयदीपिका

गच्छन्ति तद्वदित्यर्थः।[किं लक्षणानां महीभुजाम्?] अनीहया अनुत्साहेन आलस्येन द्विषतां शत्रूणां प्रभुशक्तिं कोशदण्डजं तेजः अनुपालयताम्। उपेक्ष्यमाणानाम्। [किं लक्षणां प्रभुशक्तिम्] उदेष्यतीं वर्द्धिष्यमाणाम्। निकृष्टपुरुषानुरागाल्लोकापवादभयादिवेति हेतूत्प्रेक्षा। अपयान्ति। अपसरन्ति। यथाह कामन्दकः स्त्रीभिः रवमिव श्रीभिरलसः परिभूयत इति। अतः पराक्रमः कर्तव्य इत्यर्थः। "सत्प्रतापः प्रभावश्च यत्तेजः कोशदण्डज"**मित्यमरः**।। १०।

ननु परिक्षीणः कथं प्रबलम् अभियुङ्क्ते? तत्राह- पुनः किमुवाचेत्याह- **क्षययुक्तमिति**। हे राजन् ! प्रजाः प्रकृतयः लोकाः नृपं राजानं प्रणमन्ति। अभिवन्दन्ति। अनुसरन्तीत्यर्थः।

लघुटीका

विशेषणद्वारेण कारणमाह- महीभुजां राज्ञां श्रियोऽपयान्ति पलाय्य गच्छन्ति, अनुपालयतां प्रतीक्षमाणानां तेषाम् अनुद्यम एव शत्रूणां प्रभुशक्तिम् अनुपालयति वर्द्धयति। अतो हेतोः श्रियस्तान् राज्ञो जहति त्यजन्ति। उत्प्रेक्षेते जननिर्वादभयादिव। जनानां निर्वादोऽपरागस्ततो भयं तस्मात्। एवंविधनिरीहनृपानुरक्ताः श्रिय इति। लोके अस्माकं यशो मा भूदित्यतो हेतोः श्रियोऽपयान्तीति वा इत्युत्प्रेक्षा।१०।

अथ मन्यसे सर्वथा परिक्षीणा वयं तदारम्भयोग्या एव न भवाम इत्याह- नृपं राजानं क्षययुक्तमपि कोशसाधनादिना क्षीणमपि स्वभावजं क्षात्रं तेजो दधतं शिवं कल्याणं स्वतेजो

जोनराजटीका

राज्ञां श्रियो चिरादपयान्ति नश्यन्ति। शत्रोरनुद्योगेन वर्धमानाः शत्रवो लक्ष्मीं हरन्तीत्यर्थः। अत्रोत्प्रेक्षते- जनानां निर्वादादपवादाद्यद्भयं तस्मादिव यद्यनुत्साहहतेषु राजसु वयं स्थास्यामस्तदा लोकोऽस्मान्निन्दतीतीव निन्दाभयाल्लक्ष्म्योऽलसेभ्यः पलायन्ते इत्यर्थः।।१०।।

क्षीणोऽप्यहं यद्युत्साहं करोमि तत्को मामनुयातीत्याह- क्षीणमपि राजानमनपायम्। बाधा यत्र न भवत्येव। उत्थितं कृतोद्यमं सन्तं जनाः प्रणमन्ति, यतः सहजं तेजो दधानम् [तेजः कीदृशम्?] विवृद्धये शिवं विवृद्धये दधतमिति वा योज्यम्। यथा प्रतिपच्चन्द्रं प्रजा नमन्ति। तत्पक्षे क्षयः कलामात्रत्वम्।।११।।

प्रभवः खलु कोशदण्डयोः कृतपञ्चाङ्गविनिर्णयो नयः।
स विधेयपदेषु दक्षतां नियतिं लोक इवानुरुध्यते।। १२।।

अन्वयदीपिका

[किं कुर्वन्तं नृपम् ?] क्षययुक्तमपि परिहीयमानमपि तथा क्षीणमपि स्वभावजं क्षात्रजं धाम तेजः वहन्तं दधतम्। [पुनः किं लक्षणं नृपम् ?] विवृद्धये वृद्ध्यर्थम् उत्थितम् उद्युक्तम् उत्सहमानम्। अत एव अनपायम्। अविनाशं वर्द्धिष्णुमित्यर्थः। [किं लक्षणं धाम] शिवम्। सर्वलोकाह्लादकम्। [कमिव?] प्रतिपच्चन्द्रमिव। यथा प्रजाः लोकाः प्रतिपच्चन्द्रं द्वितीयाचन्द्रं नमन्ति नमस्कुर्वन्ति। [किं लक्षणं चन्द्रम्?] स्वभावजं स्वकीयं धाम तेजःप्रकाशं दधन्तं वहन्तम्। [पुनः किं लक्षणं चन्द्रम्?] क्षययुक्तमिति तथा क्षीणमपि। [पुनः किं लक्षणं चन्द्रम्?] उत्थितम् उदितम्।[किमर्थं ?] विवृद्धये। वृद्ध्यर्थम्। अनपायं वर्द्धिष्णुम्। [किं लक्षणं धाम] शिवम्। सर्वाह्लादकम्। प्रतिपद्ग्रहणं द्वितीयोपलक्षणार्थम्। प्रतिपदि तस्यादृश्यत्वात् द्वितीया चन्द्र उच्यते। क्षीणस्यात्युत्साहः कार्यसिद्धये निदानमित्यर्थः। "श्रियं हि शत्रुतोत्साही दुर्बलोऽपि समश्नुते" **इति कामन्दकः**।। ११।।

ननु प्रभुशक्तिरहितस्य जनस्य उत्साहः कुत्रोपयुज्यते इत्यत्राह- **प्रभवेति।** हे राजन्! खलु इति निश्चितम्। नयः नीतिः कोशदण्डयोः प्रभवः उत्पत्तिस्थानम्। कोशश्च दण्डश्च

लघुटीका

धारयन्तं सन्तमनपायं निर्बाधं विवृद्धये वृध्यर्थम् उत्थितं निर्विघ्नमुत्साहमाश्रितं सन्तमेव गुणयुक्तं नृपं प्रजाः प्रणमन्ति सादरमाराधयन्ति। तथा प्रतिपच्चन्द्रं क्षययुक्तमपि कलामात्रशेषमपि स्वभावजं तेजो दधानं विवृध्यर्थम् उत्थितमुदितं प्रजाः प्रणमन्ति। तथा नृपमपि प्रणमन्तीत्यर्थः। धाम तेजोऽसहिष्णुता सन्तं शिवं श्रेयो विधायि। अविद्यमाना अपाया यत्र तत्क्रियाविशेषणं नृपविशेषणं वा। ११।।

अथ कोशदण्डयोः कारणभूतं नयं त्यजतः केवलं तेजः समाश्रित्योत्थानवतो न काचिदर्थसिद्धिर्भवतीत्याशङ्क्याह- कृतः पञ्चस्वङ्गेषु विनिर्णयो निश्चयो यस्य सः। तथाविधो नयो मन्त्रशक्तिर्विधेयपदेषु कार्यस्थानेषु विपक्षोच्छेदनलक्षणेषु दक्षताम् उत्साहशक्तिम् अनुरुध्यते

जोनराजटीका

लक्ष्मीरहितानां नास्ति कार्यसिद्धिः। लक्ष्मीश्च नय प्राप्येति नय एव युक्तः किमुत्साहेनेति निरसितुमाह- पञ्चानामङ्गानां कर्मारम्भोपायादीनां विनिर्णयः कृतो यत्र स नयः कोशदण्डयोः।

अन्वयदीपिका

कोशदण्डौ। तयोः कोशदण्डयोः। कोशो राशिरर्थौघः भाण्डागारम्। दण्डश्च तुरगसैन्यं तयोः प्रभवः। प्रभवत्यस्मादिति प्रभवः। उत्पत्तिस्थानं, कारणमित्यर्थः। [किं लक्षणो नयः?] कृतपञ्चाङ्गविनिर्णयः। कृतकर्मणामारम्भोपायः। पञ्च च तानि अङ्गानि च पञ्चाङ्गानि। पञ्चाङ्गानां विनिर्णयः पञ्चाङ्गविनिर्णयः। कृतः पञ्चाङ्गविनिर्णयो यस्य सः कृतपञ्चाङ्गविनिर्णयः। हे राजन् ! सः नयः विधेयपदेषु कार्यवस्तुषु दक्षतां क्षिप्रकारित्वम् उत्साहम् अनुरुध्यते अनुसरति। मन्त्रस्यापि मूलमुत्साहस्तन्मूलायाः प्रभुशक्तेः <सः> मूलमिति किमु वक्तव्यम्? अतः स एव आश्रयणीयः। यतो नक्तन्दिवं मन्त्रयतः तस्यापि प्रभोः निरुत्साहस्य न किञ्चित्सिद्ध्यति। क इव? लोक इव। यथा कृष्णादिप्रवृत्तो लोकः नियतिं दैवम् अनुरुध्यते अनुसरति। "नियतिः नियमे दैवे च"] **इति विश्वः।** "कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययो"रि**त्यमरः**।। "दण्डोऽस्त्री शासने राज्ञां हिंसायां कुड्मले धने" **इति वैजयन्ती। कर्मणामारम्भोपायः, पुरुषद्रव्यसम्पत्, देशकालविभागः विनिपातप्रतीकारः, कार्यसिद्धिश्चेति पञ्चाङ्गानि।** यथाह कामन्दकः-

सहायसाधनोपायः विभागो देशकालयोः।
विनिपातप्रतीकारः सिद्धिः पञ्चाङ्गमुच्यते।।१२।।

लघुटीका

अनुवर्तते। नहि उत्साहहीनस्य नक्तंदिवं मन्त्रयमाणस्यापि किञ्चित्कार्यं सिध्यति। [किं भूतो नयः?] कोशदण्डयोः प्रभुशक्तेः खलु निश्चितं प्रभवः। नयः कोशदण्डसाधनमेवेत्यर्थः। [कामिवानुरुध्यते]। नियतिं लोक इव। यथा वार्त्तानिपुणोऽपि लोको जनो नियतिं भवितव्यं दैवमनुवर्तते। नहि दैवमन्तरेण व्यवहरन्नपि जनोऽर्थमश्नुते। कोशो भाण्डागारधनम्। दण्डश्चतुरङ्गबलगजरथतुरगपदातिलक्षणः। 'कर्मणामारम्भोपायः पुरुषद्रव्यसम्पत् देशकालविभागो विनिपातप्रतीकारः कार्यसिद्धिश्चेति पञ्चाङ्गानि मन्त्रस्य'।।१२।

जोनराजटीका

कोशो धनम्, दण्डो रथादिः तयोः प्रभवः कारणं भवति। नयादेव कोशदण्डोत्पत्तिरित्यर्थः। स नयो विधेयपदेषु कर्तव्येषु दक्षतामुत्साहमनुरुध्यतेऽपेक्षते। यथा नियतिं दैवं लोकोऽनुरुध्यते। केवलेन परुषकारेण वरं किञ्चिल्लभ्यते। निरुत्साहो नयस्तु न किञ्चित्फलं ददातीत्यर्थः।।१२।।

अभिमानवतो मनस्विनः प्रियमुच्चैः पदमारुरुक्षतः।
विनिपातनिवर्तनक्षमं मतमालम्बनमात्मपौरुषम्।। १३।।

अन्वयदीपिका

ननु सोत्साहोऽधिपतिः निःसहायश्चेत्तर्हि तस्य कथं सिद्धिरित्याह- **अभिमानेति।** हे राजन् ! मनस्विनः धीरस्य पुरुषस्य आत्मपौरुषस्य पुरुषकार एव आलम्बनं मतम्। सहकारि मतमिष्टम्। केवलं स्वपौरुषकार एव प्रधानमित्यर्थः। पुरुषादिसैन्यैः सहायैः किं शूराणामिति भावः। [किं लक्षणम् आत्मपौरुषम्?] विनिपातनिवर्तनक्षमम्। विनिपातस्य अनर्थस्य निवर्तनं प्रतीकारः तत्र क्षमं समर्थम्। यथा कस्यचित् उक्तम् - **'अङ्गं पर्वतमारोहयतः पुरुषस्य किञ्चित्पतनप्रतिबन्धकम् अनुचरहस्तादिकम् आलम्बनं भवति' तद्वदित्यर्थः।** [किं लक्षणस्य मनस्विनः।] अभिमानवतः। अभिमानोऽस्यास्तीति अभिमानवान्। तस्य अभिमानवतः मानधनस्येत्यर्थः। पदं स्थानं राज्यादिकम् आरुरुक्षतः। आरोढुमिच्छतः प्राप्तुकामस्य। [पुनः किं लक्षणं पदम्?] इष्टं प्रियम्। उच्चैः उन्नतैः। पौरुषं विना नान्य उपायो शत्रून् विजेतुम्। विनिपातोऽनर्थमित्यर्थः।। १३।।

लघुटीका

अथ मन्यसे सहायहीनाः किमवलम्ब्य वयमुत्तिष्ठेमहीत्याह- प्राप्तुकामस्य मनस्विनः तेजस्विनोऽभिमानवतोऽहङ्कारयुक्तस्याभिनवराजस्य विनिपातनिवर्तनाय क्षमं समर्थं विनिपातनिवारणसमर्थम् आत्मपौरुषमेव निजपराक्रम एवावलम्बनं मतम्। सर्वः कोऽपि उच्चैः पदमारोढुमिच्छन् पतननिवारणसमर्थं किमप्यवलम्बते। तेजस्विनोऽहङ्कारवतो राज्ञः उच्चैः पदमारोढुकामस्यालम्बनेषु निरूप्यमाणेषु निजपौरुषमेवावलम्बनं मतम्। न हि स्वपौरुषावष्टम्भेनोत्तिष्ठमानो निपतति। तस्मात् स्वपौरुषमाश्रित्य त्वमपि उत्साहवान् भव, किमन्यैः सहायैरित्युक्तं भवति। कस्मादात्मपौरुषमेवावलम्बनं मतं नान्यदिति।।।१३।।

जोनराजटीका

निरालम्बानस्मानुत्थातुकामानरयः तयन्तीत्याशङ्क्याह - उच्चैरुन्नतं प्रियमीप्सितं पदमारोढुकामस्य साभिमानस्य मानिनः विनिपातनिवर्तनसमर्थमालम्बनं, निजमेव पौरुषं मतम्। उन्नतस्थानमारोढुमिच्छतश्चालम्बनमपेक्षितम्।।१३।।

विपदोऽभिभवन्त्यविक्रमं रहयत्यापदुपेतमायतिः।
नियता लघुता निरायतेरगरीयान्न पदं नृपश्रियः।। १४।।

अन्वयदीपिका

पौरुषानङ्गीकारे दोषमाह- **विपदेति**। हे राजन् ! विपदः आपदः अविक्रमं पुरुषम् अभिभवन्ति। पौरुषहीनं जनं पराभवन्ति। तिरस्कुर्वन्ति। <हे राजन् !> आयतिः उत्तरकालः तस्य जनस्य.शोभनो न भवतीत्यर्थः। किञ्च दूषणान्तरम्। निरायतेः आयतिरहितस्य आसन्नक्षयस्य पुरुषस्य लघुता अगौरवं नियता। अवश्यम्भाविनी। न कश्चिदेनम् आद्रियते इत्यर्थः। <किञ्च> हे नृप ! अगरीयान् लघीयान् श्रियः लक्ष्म्याः पदम् आस्पदम् आश्रयो न भवति। यद्वा नृपश्रियः इत्येकं पदम्। <तत्पक्षे> अगरीयान् लघीयान् नृपश्रियः राजलक्ष्म्याः पदं न आस्पदं न भवति। तस्मात्पौरुषं <त्वया> कर्तव्यमेवेत्यर्थः। अत्र पूर्वपूर्वस्याविक्रमत्वादेरुत्तरोत्तरं विपदादिकं प्रति कारणत्वात् कारणमालाख्योऽलङ्कारः। तथा च सूत्रं "पूर्वपूर्वस्योत्तरोत्तरहेतुत्वे कारणमाले"ति लक्षणम्। अत्र उपसर्गप्रक्रमभेदो दोषः।।। १४।।

लघुटीका

अविक्रमं पौरुषहीनं पुरुषं विपदोऽभिभवन्ति आपद्भिराक्रम्यते। ततो राज्यलक्ष्म्याः किं विरुद्धम्? आपदुपेतं विपद्भिः प्राप्तं राजानमायतिः रहयति त्यजति। [ततोऽपि किम्?] निरायतेः भाग्यरहितस्य प्रतापशून्यस्य लघुता नियता लाघवमवश्यं भावि। [ततोऽपि किं?] अगरीयान् लाघवोपेतो गौरवरहितः सम्भावनाहीनः सन् राजश्रियो नृपलक्ष्म्या न पदं स्थानमेव न भवति। तस्मात्पौरुषमेव राज्यलक्ष्म्या मूलम् इत्येतदेवावस्थितम्। १४।

जोनराजटीका

पौरुषमेव राज्यप्राप्त्युपाय इति व्यतिरेकपदेनाह- विपदो निष्पौरुषं पराजयन्ते। विपज्जितमायतिरुत्तरः कालस्त्यजति। आयतिरहितस्य लाघवं नियतम्। निर्गौरवो राज्यलक्ष्म्या न स्थानम्, सर्वैरेवानादरणीयत्वात्। विक्रम एव राज्यलक्ष्मी-मूलमित्यर्थः।।१४।।

तदलं प्रतिपक्षमुन्नतेरवलम्ब्य व्यवसायवन्ध्यताम्।
निवसन्ति पराक्रमाश्रया न विषादेन समं समृद्धयः।। १५।।

अन्वयदीपिका

विपदुपेतं विजहाति <लक्ष्मीः> फलितमाह। **तदिति।** तत्तस्मात्कारणात् उपेक्षायां दोषसम्भवात् हे राजन्! त्वया व्यवसायवन्ध्यताम् उद्योगवन्ध्यतां शून्यताम् अवलम्ब्य आश्रित्य अलं पूर्यताम्। अवलम्बनेन अलमित्यर्थः। व्यवसायस्य उद्योगस्य वन्ध्यता व्यवसायवन्ध्यता। तां व्यवसायवन्ध्यताम्। उद्योगाभावमित्यर्थः। [किं लक्षणां व्यवसायवध्यताम्?] उन्नतेः उदयस्य प्रतिपक्षम् अन्तरायमित्यर्थः। उद्योगरहितस्य पुंसः उदयो न भवतीत्यर्थः। तथा हि हे राजन् समृद्धयः सम्पदः विषादेन समम् अनुत्साहेन सार्द्धं न निवसन्ति न तिष्ठन्ति। [किं लक्षणाः समृद्वयः?] यतः पराक्रमाश्रयाः। पराक्रमः पौरुष आश्रयः कारणं यासां ताः पराक्रमाश्रयाः। हे राजन् ! पौरुषसाध्याः सम्पदः, न तु विषादसाध्याः, उभयोः सहानवस्थानविरोधादित्यर्थः। अत्र वैधर्म्ये कार्यकारणरूपोऽर्थान्तरन्यासोऽलङ्कारः। १५।

लघुटीका

प्रकृतमुपसंहरन्नाह-यस्मात् उपक्रमहीनस्य विपदादयोऽनर्थाः पूर्वश्लोकोक्ता अवश्यं भाविनः। तत्तस्मादुन्नतेर्महत्तायाः प्रतिपक्षं शत्रुभूतां व्यवसायवन्ध्यताम् उत्साहशून्यताम् अवलम्ब्य अलं निरुत्साहत्वं मा त्वं शिश्रिय इत्यर्थः। यतोऽसौ नावलम्बनीया व्यवसायवन्ध्यता उन्नतेः प्रतिपक्षा। यतो विषादेन समम् आलस्येन अनुत्साहेन समं समृद्धयो न निवसन्ति। कथमित्याह– पराक्रमाश्रया यासां किल समृद्धीनां पराक्रम एवाश्रयस्ता विषादेन सह कथं निवसेयुः। पराक्रमस्य विषदेन आलस्येन सहानवस्थानात्तदाश्रयाणां समृद्धीनामपि विषादेन सहानवस्थानम् अलमवलम्ब्य। प्रतिषेधार्थेऽलंशब्दोऽत्र। अलंखल्वोरिति क्त्वा।।१५।

जोनराजटीका

तत्तस्मादुत्साहेन राज्यलाभदर्शनाद्धेतोर्व्यवसायेनोद्योगेन वन्ध्यतां निरुत्साहत्वमवलम्ब्याश्रित्यालं निषिध्यतामौदासीन्यं त्यज्यतामित्याह- यत उन्नतेरुन्नतपदप्राप्तेः प्रतिपक्षं परिपन्थिनम्। व्यवसायवन्ध्यता हि उन्नतपदप्राप्तेः प्रतिपक्षभूता। त्वया उद्योग एव ग्राह्य इत्यर्थः। एतमेवार्थं सामान्येन समर्थयति- विषादेनालस्येन समं समृद्धयो न निवसन्ति। पौरुषमेवाश्रयो यासां ताः। तच्छब्दो द्वितीयार्धपरामर्शको व्याख्येयः। यतो विक्रममूला

अथ चेदवधिः प्रतीक्ष्यते कथमाविष्कृतजिह्मवृत्तिना।
धृतराष्ट्रसुतेन सुत्यजाश्चिरमास्वाद्य नरेन्द्र! सम्पदः।। १६।।

अन्वयदीपिका

ननु समयः प्रतीक्ष्यताम्, किं नो वेगेन तत्राह- **अथ चेदिति।** अथ इति पक्षान्तरे। हे राजन् ! त्वया यदि अवधिः समयः कालः प्रतीक्ष्यते त्रयोदशवर्षाणि पर्यन्तं त्वया चेत् तूष्णीं स्थीयते तर्हि धृतराष्ट्रसुतेन दुर्योधनेन नरेन्द्रसम्पदो राजसम्पदः कथं सुत्यजाः भविष्यन्ति ? सुखेन न त्याज्या इत्यर्थः। [किं कृत्वो] चिरं चिरकालम् आस्वाद्य। त्रयोदशवर्षाणि अनुभूय भुक्त्वा। ज्ञातास्वादेन दुर्योधनेन पश्चादपि सुखेन युद्धक्लेशं विना न त्यक्ष्यते। अत एवावधिप्रतीक्षणं समयपालनं व्यर्थमित्यर्थः। [किं लक्षणेन धृतराष्ट्रसुतेन ?] आविष्कृतजिह्मवृत्तिना। आविष्कृता प्रकटीकृता जिह्मवृत्तिः कपटव्यापारो येनासौ आविष्कृतजिह्मवृत्तिः। तेन नरेन्द्र, सम्पद इति पदद्वयं कर्तव्यम्। हे नरेन्द्रेति।। १६।।

लघुटीका

अवध्यन्ते स्वयं राज्यं प्रत्यर्पयिष्यति सुयोधन एव तदवधिमेव तावत्प्रतीक्षामहे इत्याशङ्क्याह- अथ यदि राज्यस्य कृते त्वया अवधिः प्रतिपाल्यते तद्दुराशैषा भवतः। यतो धृतराष्ट्रसुतेन चिरं चतुर्दशवर्षाणि यावत्सम्पदः श्रिय आस्वाद्योपभुज्य हे नरेन्द्र ! कथं स्वयमेव सुत्यजाः। कथं सुखेन युद्धं विना त्यक्तुं शक्यन्ते ? न च। तस्य भवान् स्वरूपं न जानाति। यत एषा शङ्का स्यात्। यतः [किं भूतेन] आविष्कृता बहुकृत्वः प्रकटीकृता जिह्मा पापा वृत्तिर्व्यवहारो येन। जनुगृहदाहविषमोदकदानलक्षणा वृत्तिर्येन स तथा तेन। धृतराष्ट्रसुतेन इति विशेषाभिप्राययुक्तम्। यतो धृतराष्ट्रो राजा सदैवमन्तःकुटिलबुद्धिः प्रसिद्ध एव। तस्य सुतः कुटिल एव इति। नरेन्द्र इत्यामन्त्रणम्। अथ नरेन्द्रसम्पदो राजलक्ष्म्यः इति वा व्याख्येयम्। केन प्रकारेण सुत्यजा इति वा, न सम्भवत्येवैतत् सुयोधनश्चिरं राज्यमुपभुज्य स्वयं दास्यति।१६।

जोनराजटीका

लक्ष्म्यो नालसेन सह वसन्ति। ततो हेतोर्निरुद्योगत्वं त्याज्यमेवेत्यर्थः। अलंखल्वोः प्राचां क्त्वेति क्त्वाप्रत्ययः।।१५।।

कारुण्यात्त्वं युद्धमुपेक्षसे <स> न च तन्निर्वहतीत्याह- भवता मर्यादा यदि पाल्यते तदा धृतराष्ट्रसुतेन दुर्योधनेन बहुकालं भुक्त्वा राज्यलक्ष्म्यः कथं सुखेन युद्धं विना

द्विषता विहितं त्वयाऽथवा यदि लब्धा पुनरात्मनः पदम्।
जननाथ ! तवानुजन्मनां कृतमाविष्कृतपौरुषैर्भुजैः।। १७।।

अन्वयदीपिका

अथ यदि दैववशात् सः दुर्योधनः स्वयमेव सम्पदो दास्यति तथापि तत्कथं रोचयेमहीति तत्राह- **द्विषतेति।** हे राजन् ! अथवा यदि चेत् त्वया पुनरपि आत्मनः पदं राज्यं लब्धा लप्स्यते। [किं लक्षणं पदम्?] द्विषतां शत्रूणां दुर्योधनेन स्वयमेव विहितं प्रत्यर्पितं दत्तमित्यर्थः। तर्हि हे जननाथ ! हे राजन् ! तव अनुजन्मनां भीमादीनां भुजैः कृतम् अलं पूर्यताम्। अनु पश्चात् जन्म उत्पत्तिर्येषां ते अनुजन्मानः। तेषाम् अनुजन्मनाम्। भुजैर्न किञ्चित्साध्यते इत्यर्थः। [किं लक्षणैः भुजैः?] आविष्कृतपौरुषैः प्रकटीकृतपराक्रमैः। अविष्कृतं प्रकटीकृतं शत्रुषु पौरुषं पराक्रमो यैस्ते आविष्कृतपौरुषाः। तैः। अयमर्थः। राज्यदानादानयोः शत्रूणामेव स्वातन्त्र्यम्। अस्मद्भुजानां निष्कारणत्वमेव। क्षत्रियस्य विजितमिति शास्त्रात् क्षात्रेणैव

लघुटीका

अथ कथञ्चिद्ददात्यपि तथापि न युक्तमेवैतदित्याह- अथवा हे राजन् यदि त्वयाऽऽत्मनः पदं स्वराज्यं द्विषता विहितं पुनरपि लब्धा लप्स्यते। ततः हे जननाथ! हे राजन् तवानुजन्मनामस्माकम् आविष्कृतपौरुषैः प्रकटितपराक्रमैः भुजैः कृतं पर्याप्तम्। अपहृत्य पुनः प्रसादतो यदि राज्यं स्वयमेव लप्स्यते तदनेकजिताहवैः भुजैः अधुना किं करणीयमस्ति नः। कृतमित्यलमर्थे निपातितः। लब्धेति कर्मणि लुट् श्वस्तनी। विपूर्वो दधातिः करोत्यर्थे वर्तते। स च क्रियासामान्यवाची, प्रकरणादेः क्रियाविशेषे वर्तते, तेन विहितं दत्तमित्यर्थः।१७।

जोनराजटीका

त्यज्यन्ते? युद्धेनैव त्यज्यन्ते इत्यर्थः। यतः आविष्कृता जिह्मा मर्यादारहिता वृत्तिर्येन सः। स्वल्पोऽप्यन्यत्र वस्तुन्यसत्यतया व्यवहरन् स बहुकालभुक्तायां लक्ष्म्यां सत्यं कथं न त्यजेदित्यर्थः। धृतराष्ट्रसुतेनेति पर्यायवक्रतया राजबीजित्वं राजसम्पदत्परित्यागे हेतुतां दर्शयति।।१६।।

एवं दुर्योधनेनापहृतस्य राज्यस्य युद्धं विना प्राप्त्यभावपक्षं सदोषं दर्षयति, युद्धं विना प्राप्ति पक्षमपि दूषयितुमाह- अथवा पूर्ववचनोपक्षेपे द्विषता दुर्योधनेन विहितं दत्तं राज्यं त्वया पुनर्यदि लब्धा लप्स्यते तदा तव कनीयसां भ्रातॄणां भुजैः कृतम्। न किञ्चित्कृतमित्यर्थः। अन्यत्राविष्कृतं पौरुषं यैस्तैः अर्थिभिर्भिक्षेव यद्यस्माभी राज्यं प्रति

मदसिक्तमुखैर्मृगाधिपः करिभिर्वर्तयते स्वयं हतैः।
लघयन् खलु तेजसा जगन्न महानिच्छति भूतिमन्यतः।। १८।।

अन्वयदीपिका

राज्यं ग्राह्यमिति भावः। कृतमिति प्रतिषेधार्थकमव्ययम्। कृतमिति वारणनिषेधयोः। १७।

ननु साम्नैव कार्यसिद्धौ किं क्षात्रेण। यथाह **मनुः**

साम्ना दानेन भेदेन समस्तैरुत वा पृथक् ।
विजेतुं प्रयतेतारीन्न युद्धे न कदाचन।।

तत्किमाग्रहेणेत्याशङ्क्याह-

मदसिक्तेति। हे राजन् ! मृगाधिपः सिंहः करिभिः गजैः वर्त्तयते। वृत्तिं करोति। गजैरेव जीवतीत्यर्थः। [किं लक्षणैः करिभिः?] स्वयं हतैः आत्मनैव व्यापादितैः। मदसिक्तमुखैः। मदेन दानोदकेन सिक्तानि आर्द्राणि मुखानि येषां ते मदसिक्तमुखाः तैः। खलु इति

लघुटीका

ननु राज्ये नास्माकं प्रयोजनं यदि तत्स्वयमेव दद्यात्। तत् को दोष इत्याशङ्क्याह- यो महान् तेजस्वी स नान्यतो न परस्मात् वृद्धिमुदयमिच्छति। [किमर्थं नेच्छति?] तेजसा जगल्लघयन् लघूकुर्वन्नधरयन्नित्यर्थः। यथा च मृगाधिपः सिंहः स्वयं हतैः स्वहस्तनिहतैः करिभिर्गजैर्वर्तयते शरीरं पोषयति, नान्यस्माल्लब्धैः। [किं भूतैः?] मदसिक्तमुखैः मदेन सिक्तं स्नपितं मुखं येषां ते तथा। तैरेवंविधैः दुर्मदैः करिभिः स्वयं हतैर्वर्तयते मृगाधिपः। किं पुनर्भवान् कृपणान् सुयोधनादीन् जिजीविषतीत्येवमर्थस्यास्य प्रदर्शनार्थमेतत्करिणां विशेषणमुपात्तम्। असहिष्णुता तेजः।

जोनराजटीका

गृह्यते तर्ह्यस्मद्भुजान् धिक्। अशक्तानामुत्तानफललुब्धत्वाश्रयेण निन्दाभावात् निहितमिति वा पाठः। अनेकार्थत्वाद्धातूनाम्। विपूर्वो धाञ्। अत्र दानार्थः अथवा विपूर्वस्य धाञः करोत्यर्थत्वे क्रियासामान्यवाचित्वाद्वा दानार्थः।।१७।।

शूरा नान्यदत्तं प्रतीक्षन्ते इत्याह - महानन्यतो भूतिं नेच्छति। परदत्तां श्रियं शूरो न काङ्क्षति। यतस्तेजसा जगल्लघयन् लघूकुर्वन्। सामान्यं विशेषेण समर्थयति। स्वयं हतैर्मत्तैर्हस्तिभिः सिंहो वर्तयति, जीविकां करोति।।१८।।

अभिमानधनस्य गत्वरैरसुभिः स्थास्नु यशश्चिचीषतः।
अचिरांशुविलासचञ्चला ननु लक्ष्मीफलमानुषङ्गिकम्।। १९।।

अन्वयदीपिका

वाक्यालङ्कारे। हे राजन् ! महान् पुरुषः अन्यतः अन्यस्मात् पुरुषात् भूतिं वृद्धिम् अभ्युदयं नेच्छति। नाभिलषति। [किं कुर्वन्?] तेजसा स्वप्रभावेन जगत् विश्वं लघयन् लघूकुर्वन् अतितुच्छं कुर्वन्नित्यर्थः। "तेजो बले प्रभावे च ज्योतिष्यर्चिषि रेतसी"ति **वैजयन्ती**। न हि तेजस्विनः पुरुषस्य परायत्तवृत्तित्वं युक्तम्। **मनु**वचनं तु अशूरविषयम्। अत्र विशेषेण वक्ष्यमाणः सामान्यसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः।। १८।।

ननु युद्धात् पाक्षिको लाभ उपायान्तरैस्तु न तथेत्याशङ्क्याह- **अभिमानेति**। ननु इति निश्चितम्। हे राजन् ! एवंलक्षणस्य पुरुषस्य लक्ष्मीः सम्पत् आनुषङ्गिकं भवति। अनुषङ्गादागतम् आनुषङ्गिकम्। अन्वाचयशिष्टमिति कोऽर्थः? अल्पं फलं भवति। [किं लक्षणस्य पुरुषस्य?] अभिमानधनस्य अभिमान एव वैरिनिपातनमेव धनं यस्य सः मानधनः।

लघुटीका

अधिक्षेपापमानादेः प्रयुक्तस्य परेण यत्। प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम्। वर्तयते इति चौरादिकस्य वृत्ते रूपम्। अन्यतो वृत्त्यनिच्छायां मृगाधिपो दृष्टान्तः। अप्रस्तुतमृगाधिपव्यापारकथनेन चाप्रस्तुतार्थे व्यपदेशः। तदानीं लघयन्नित्यादिसमर्थकोऽर्थान्तरन्यासः। खलु यस्मादर्थे पूर्वत्र वाक्यालङ्कारे।१८।

ननु युद्धस्य फलं लक्ष्मीः। सा चेत्प्रकारान्तरेण लभ्यते तत्किं सन्देहावहेन युद्धेनेत्याह- ननु प्रश्ने। अभिमानधनस्य पुरुषस्य लक्ष्मीरानुषङ्गिकं फलम्। अप्रधानमन्वाचयशिष्टं

जोनराजटीका

श्रीश्चलेति सत्यं, त्यागस्तदर्थं न युक्त इत्याशङ्क्याह- ननु निश्चये। लक्ष्मीः प्रासङ्गिकं फलं भवति, लक्ष्मीमुद्दिश्य प्रवर्तनाभावात्। यतोऽचिरांशोर्विद्युतो विलसितवल्लोलाः। किमुद्दिश्य तर्ह्यभिमानी प्रवर्तते इत्याह- गत्वरैरसुभिः प्राणैः करणभूतैः स्थिरं यशश्चेतुं सङ्ग्रहीतुमिच्छतः, अस्थिरेण स्थिरं वस्तुसंग्रहीतुं युक्तत्वात्। यशः प्राप्यते एव प्रयतमानेन पुरुषेण, प्रसङ्गाल्लक्ष्मीः प्राप्यते इत्यर्थः। तस्मान्नास्मत्कर्तृका प्रेरणा भवत इति भावः।।१९।।

ज्वलितं न हिरण्यरेतसं चयमास्कन्दति भस्मनां जनः।
अभिभूतिभयादसूनतः सुखमुज्झन्ति न धाममानिनः।। २०।।

अन्वयदीपिका

तस्य। तस्य असुभिः प्राणैः यशश्चिचीषतः। चेतुं ग्रहीतुमिच्छतः।[किं लक्षणं यशः?] स्थास्नु स्थिरम्।[किं लक्षणैः असुभिः] गत्वरैः गमनशीलैः। "पुंसि भूम्न्यसवः प्राणा" **इत्यमरः**।[किं लक्षणा लक्ष्मीः?] अचिरांशुविलासचञ्चला। अचिरम् अंशवो यस्याः सा अचिरांशुः। अचिरांशोः विलासः अचिरांशुविलासः। अचिरांशुविलासवत् चञ्चला अचिरांशुविलासचञ्चला। अचिरांशुः विद्युत्। तस्याः विलासः स्फुरणं तद्वच्चञ्चला क्षणिकेत्यर्थः। अत एव <मानत्राणजं?> यश एव मुख्यं फलम्। अभ्युदयस्तु लक्ष्मीरिति मानिनामिदमेव श्लाघ्यम् [इत्यर्थः]।। १९।।

न त्वल्पस्य मानस्य हेतोः कथं प्राणत्यागः कर्तुं शक्यते यतो 'जीवन्नरो भद्रशतानि पश्यन्नि'त्याशङ्क्याह- **ज्वलित**मिति। हे राजन्! जनो लोकः भस्मनां विभूतीनाञ्च यं पुञ्जम् आस्कन्दति चरणादिना आक्रामति अदाहकत्वादिति भावः। हिरण्यरेतसं वह्निं नास्कन्दति

लघुटीका

फलम्। तर्हि मुख्यं यशः। एतदुभयं विशेषणद्वारेण दर्शयति। गत्वरैश्चञ्चलैः क्षणिकैरसुभिः प्राणैः स्थास्नु आकल्पस्थायि यशश्चिचीषतः क्रीणतः सतः संग्रामे प्राणान् त्यक्त्वा यशः चिचीषुणा सता क्षणद्युतिस्फुरितविलोलरूपा या लक्ष्मीरासाद्यते सा। तस्याः प्रधानं फलं यशः। पुनः प्रधानफलं तदुद्दिश्य प्रवृत्तेः। किमिति प्राणान् त्यक्त्वा यशश्चिचीषतीत्येतत्परिहारार्थमुक्तं गत्वरैः स्थास्नु इति। तथा कथं यशो मुख्यं फलं लक्ष्मीरानुषङ्गिकम् इत्याह-यशः स्थास्नु, लक्ष्मीः अचिरांशुविलासचञ्चला इति। तस्मात्सर्वथा मनस्विभिर्यशस्यमाचरणीयम्। १९।

केयं नीतिः यदभिधाने लगित्वा निरर्थकं प्राणास्त्यज्यन्ते इत्याह- अतो हेतोः मानिनः पुरुषाः सुखं यथा भवति एवमसून् प्राणान् उज्झन्ति त्यजन्ति। न धाम तेजो न

जोनराजटीका

न केवलं यश एव तेजसः फलं यावत्तेजस्त्यागादवमाना भवन्तीत्याह- ज्वलितमग्निं जनो नाक्रामति, भस्मराशिं सन्तं त्वाक्रामति। अतोऽवमानभयान्मानिनः प्राणान् सुखं त्यजन्ति, न पुनस्तेजः। यस्मिन् सति प्राणत्यागोऽपि सुखदायी। गरीयसोऽवमानं तेजस्त्यागेन प्राप्नुवन्तीत्यर्थः।।२०।।

किमपेक्ष्य फलं पयोधरान् ध्वनतः प्रार्थयते मृगाधिपः।
प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यथा।। २१।।

अन्वयदीपिका

चरणादिना कोऽपि नाक्रामति दाहकत्वात्तस्येति भावः। हिरण्यं सुवर्णं रेतो वीर्यं यस्य सः हिरण्यरेताः तम्। [किं लक्षणं हिरण्यरेतसम्?] ज्वलितम्। ज्वलन्तमित्यर्थः। अतो हेतोः अतः कारणात्। मानिनः अभिमानवन्तः पुरुषाः अभिभूतिभयात् परिभवभयात् असूनेव प्राणानेव सुखम् अक्लिष्टं यथा तथा उज्झन्ति त्यजन्ति न धाम तेजो नोज्झन्ति न त्यक्षन्ति। प्राणरक्षणेन तेजस्त्यागेन परिभवो भविष्यति भयादित्यर्थः। मानहानिकरणात् जीवनात्स्वतेजसा मरणमेव वरमित्यर्थः।। २०।।

अथवा किमत्र प्रयोजनचिन्तया? किन्तु तेजस्विनामयं स्वभावो यज्जिगीषुत्वमित्याह- **किमिति।** हे राजन् ! मृगाधिपः सिंहः पयोधरान् मेघान् किं प्रार्थयते ? अभियाति सम्मुखं गच्छति [किं?], तेभ्यः फलम् अपेक्ष्य प्रयोजनमपेक्ष्य किं याति ? नेत्यर्थः। धरन्तीति धराः। पयसां धराः पयोधराः। तान् पयोधरान्। [किं लक्षणान् पयोधरान्?] ध्वनतः गर्जतः।

लघुटीका

त्यजन्ति। कुतो हेतोः ? यस्मात् अभिभूतिभयात्पराभवभयात्। हि यस्माल्लोको हिरण्यरेतसमग्निं ज्वलितं प्रज्वलितं सन्तं नास्कन्दति नाक्रमते। तु पुनर्भस्मनां बहूनां चयं राशिमप्यास्कन्दति निर्भयः सन् जन आक्रमते। यस्तेजस्वी स न केनचिदप्यभिभूयते। निस्तेजास्तु सर्वैरेव आक्रम्यते। झगिति जहति प्राणान् तेजो न धाम निजं क्वचित्। ननु सर्वः कश्चित्फलमभिसन्धाय क्रियामारभते। २०।

तत्किं शत्रुभिः सह निष्फलेन युद्धारम्भेण इत्याह- ध्वनतो गर्जतः पयोधरान् मेघान् मृगाधिपः सिंहः किं फलमपेक्ष्य लाभमनुमान्य प्रार्थयते। प्रतिस्पर्धया गर्जन् सत्फलापेक्षां

जोनराजटीका

दुर्योधनोऽस्माकं राज्यं प्रत्यर्पयिष्यत्यतो लक्ष्मीलाभार्थेन हिंसामयेन विक्रमेण किं फलमित्याशङ्क्याह- किं फलमवलोक्य सिंहो गर्जतो मेघान्प्राह्वयते? स्पर्धते? स्पर्धायामाज इत्यात्मनेपदम्। तत्स्पर्धया यद्यपि किञ्चित्फलं न लभते तथापि तानेव पराभवितुं चेष्टते इत्यर्थः। युक्तमेतत्। यया करणभूतया महीयान्परौन्नत्यं न सहते। सा महीयसः प्रकृतिः

कुरु विक्रम एव तन्मतिं नृप ! निर्धूय तमः प्रमादजम्
ध्रुवमेतदवेहि विद्विषां त्वदनुत्साहहता विपत्तयः।। २२।।

अन्वयदीपिका

"याच्ञायामभियाने च प्रार्थना कथ्यते बुधै"रिति **केशवः।** हे राजन् ! <खलु इति निश्चितम्> महीयसः महत्तरस्य पुरुषस्य सा प्रकृतिः स्वभावः यया प्रकृत्या स्वप्रभावेन अन्यमुन्नतिं परवृद्धिं न सहते न क्षमते। अन्येषां परेषां शत्रूणां समुन्नतिः अन्यमसमुन्नतिः। ताम्। महतां परभङ्ग एव महान्पुरुषार्थः।। २१।।

उक्तप्रयोजनं निगमयति- **कुरु तदि**ति। हे नृप ! तत्तस्मात्कारणात् पराक्रमे एव पौरुषे एव मतिं बुद्धिं कुरु। विक्रममेव अङ्गीकुरु। न तूपायान्तरमित्यर्थः। [किं कृत्वा?] तमः मोहम् अज्ञानं निर्धूय निरस्य त्यक्त्वा। [किं लक्षणं तमः?] प्रमादजं प्रमादोद्भवम्। [न

लघुटीका

विनैवाह्वयते इत्यर्थः। यद्येवं तदुन्मत्त एवासावित्याह। महीयसो महत्तमस्य सा प्रकृतिः स स्वभावो यया प्रकृत्या अन्यस्य समुन्नतिं प्राधान्यं न सहते न मृष्यति। तद्वयमपि शत्रूणामुन्नतिमसहमानाः फलविशेषमनभिसन्धाय एवमभियोगं कुर्म इति प्रस्तुतावगतिः। किंशब्दोऽत्र काक्वा प्रयुक्तः।२१।

यत एवं पूर्वोक्तप्रकारेण बहुगुणः पराक्रमः। तस्मात् प्रमादादनवधानाज्जातमुत्पन्नं प्रमादजं तमो मोहमवधूय विक्रमे एव मतिं कुरु विक्रममेवावलम्बस्व। स्यादेतन्मयाऽश्रितेऽपि विक्रमे अस्माकं शत्रवस्तदवस्था एव इत्याह- ध्रुवं निश्चितं विद्विषां शत्रूणां विपत्तयो

जोनराजटीका

स्वभावः। यद्वा प्रकृतिः सा तथाविधा भवति। यद्वा सा प्रकृतिर्महीयसो न तु कातरस्येति योज्यम्। स्वभावे वा हेतुपर्यनुयोजनं न युक्तम्। यद्वा फलमवेक्ष्य किं प्राह्वयते इति योज्यम्। प्रार्थयते इत्यनुगुणः पाठः। यद्वा प्रपूर्वोऽर्थिः संरोधार्थः, उपसर्गबलेन धात्वार्थबाधनात्। तथा च कालिदासः 'तत्प्रार्थितं च वनराजिगतेन राज्ञे'त्यादौ। अयमेव 'प्रार्थनाऽधिकबले विपत्फले'ति संरोधार्थं प्रार्थयतिं प्रयुक्तवान्।।२१।।

तत्तस्माद्धेतोर्विक्रम एव न तु नयचर्चयां मतिं कुरु। 'प्रमादोऽनवधानता'। ततो जातं मोहं परिहृत्य ध्रुत्वं त्वमेतज्जानीहि। शत्रूणामलक्ष्म्यस्त्वदनुद्यमनष्टाः।।२२।।

द्विरदानिव दिग्विभावितांश्चतुरस्तोयनिधीनिवायतः।
प्रसहेत रणे तदानुजान्द्विषतां कः शतमन्युतेजसः।। २३।।

अन्वयदीपिका

च विक्रमस्य वैफल्यमित्याह] एतत् वक्ष्यमाणं ध्रुवं निश्चितम् अवेहि जानीहि। [तत्किं वक्ष्यमाणमित्याह] हे राजन् ! विद्विषां शत्रूणां विपत्तयः आपदः त्वदनुत्साहहताः तवानुत्साहेन अव्यवसायेन अनुद्यमेन प्रतिबद्धाः। अतो निःशङ्कं प्रवर्तस्व। अन्यथा प्रागेव <विपद्येरन्निति>भावः। ध्रुवं नित्ये निश्चिते चेति **शाश्वतः**।। २२।।

न चास्माकं शत्रुतः पराभवशङ्का कार्येत्याह **द्विरदानिति।** हे नृप ! द्विषां शत्रूणां मध्ये कः द्विषन् तव अनुजान् बन्धून् रणे सङ्ग्रामे सहेत सोढुं शक्नुयात्। न कोऽपीत्यर्थः। अतो निःशङ्कं प्रवर्तस्वेति भावः। [किं लक्षणान् अनुजान्?] चतुरः। [पुनः किं लक्षणान् अनुजान्?] दिग्विभावितान्। दिक्षु विभाविताः विख्याताः दिग्विभाविताः तान् दिग्विभावितान्। दिक्षु प्रसिद्धानित्यर्थः। [कानिव?] चतुरः द्विरिदानिव। दिग्गजानिव।[किं लक्षणान् द्विरिदान्?]

लघुटीका

मरणाद्या विपत्तयः त्वदनुत्साहेन तवानुद्यमेन हता निवारिता इति। एतदेव हि जानीहि। निश्चितं त्वदीयेनानध्यवसायेन सम्प्रति शत्रूणां विपत्तयो निवारिता निषिद्धाः सन्तीति निश्चितं जानीहि। यदि पुनर्यदैव त्वम् उत्साहं कुरुषे तत्तदैवा निश्चितम्। शत्रूणां विपद आगता एवेत्यर्थः। अवेहीति अवाङ् पूर्वस्य इणो रूपं तत्। ओमाङोश्चेति पररूपम्।।२२।

निःसहायः कथं विक्रमयतीत्याशङ्क्याह- द्विषतां मध्ये कोऽसौ विद्यते यस्तव सम्बन्धिनश्चतुरः चतुःसंख्यान् अनुजान् रणे संग्रामे आयतः आगच्छतः सतः द्विषतां मध्ये कः प्रसहेत पुरःस्थातुमपि शक्नुयात्। [कीदृशान् अनुजान्?] दिक्षु विभावितान्। दिग्विभावितान् दिगन्तविख्यातान् प्रसिद्धान्। तथा शतं मन्यवो यज्ञा यस्य स शतमन्युः इन्द्रस्तस्येव तेजो

जोनराजटीका

सत्यत्यागाभ्युपगमेऽप्यहमेकाकी किं करोमीति राजोक्तिं सम्भाव्याह- दिक्षु विभावितान् प्रसिद्धान् तथा यत आगच्छतश्चतुःसंख्यांस्तवानुजान् द्विषतां मध्यात्को रणे सहेत। समर्थनायां लिङ्। यथा दिग्गजान् यथा च समुद्रान्। शतमन्युवत्तेजो येषां तान्। यद्वा तव [कीदृशस्य?]

ज्वलतस्तव जातवेदसः सततं वैरिकृतस्य चेतसि।
विदधातु शमं शिवेतरा रिपुनारीनयनाम्बुसन्ततिः।। २४।।

अन्वयदीपिका

दिग्विजातान् दिक्षु जातान्। चतुरस्तोयनिधीनिव। समुद्रानिव। [किं लक्षणान् तोयनिधीन्?] आयतान् दीर्घान्। महत इत्यर्थः। अतिबलत्वं गम्भीत्वं चोक्तं भवति। [पुनः किं लक्षणान् अनुजान् ?] शतमन्युतेजसः। शतमन्योरिन्द्रस्य तेज इव तेजो येषां ते शतमन्युतेजसः। तान्। आयतः सम्मुखम् आगच्छतः इत्यनेन शूरत्ववचनम्। मालोपमा।। २३।।

आशीर्वादव्याजेन फलितमाह- **ज्वलितेति।** हे नृप ! रिपुनारीनयनाम्बुसन्ततिः वैरिवनिताश्रुप्रवाहः जातवेदसः वह्नेः शमं शान्तिं विदधातु करोतु। रिपूणां नार्यः रिपुनार्यः, रिपुनारीणां नयनानि रिपुनारीनयनानि। रिपुनारीनयनानाम् अम्बूनि रिपुनारीनयनाम्बूनि।

लघुटीका

येषां ते तथा। सुराधिपसमानविक्रमान्। द्विरदानिव गजेन्द्रतुल्यान्। [कान्?] द्विरदान् दिग्विभावितान् दिग्गजान्। तेऽपि चत्वारः। तथा चतुरस्तोयनिधीनिव महार्णवतुल्यान् दिग्विभावितान्। दिग्विभाविता दुःसहाश्चत्वारश्च। द्वितयेऽप्येते आगच्छन्तः एतान् दिग्गजान् समकालम् आगच्छतः कः प्रसहेत। तथा महार्णवान् दिग्विभावितान् चतुरः समकालम् आगच्छतः कः सोढुं शक्नुयात्। एते द्वितयेऽपि दुःसहा एव। तथा तवानुजा अमी दुःसहा रणे। एतेन निःसहायोऽस्मीति मा भवान् निरुत्साहोऽभूत् <इतिज्ञायते>। २३।

एतस्मिन् पूर्वोक्ते युद्धाय विधीयमाने उत्साहे यत्फलं तदेवाशीर्द्वारेणाह- हे राजन् ! तव चेतसि हृदये सततं सर्वदा वैरिकृतस्य वैराग्नेर्ज्वलतो जाज्वल्यमानस्य सतः शिवेतरा

जोनराजटीका

शतमन्युवत्तेजो यस्य सः। चतुर्ग्रहणं सर्वेषां तुल्यवीर्यत्वप्रतिपादनार्थम्। आयतश्चतुरोऽपी-त्येकवचनान्तं वा व्याख्येयम्।।२३।।

एवं स्वस्य परेषां बलाबलं प्रतिपाद्योपसंहरन्स्फुटमेव शत्रुक्षयमाह- तव चित्ते ज्वलतः शत्रुकृतस्याग्ने रोषरूपस्य शिवेतरा शोकजातत्वादशुभा शत्रुस्त्रीबाष्पधारा शमं करोतु।।२४।।

इति दर्शितविक्रियं सुतं मरुतः क्रोधपरीतमानसम्।
उपसान्त्वयितुं महीपतिर्द्विरदं दुष्टमिवोपचक्रमे।। २५।।

अन्वयदीपिका

रिपुनारीनयनाम्बूनां नयनोदकानां सन्ततिः। धारा। [किं लक्षणा रिपुनारीनयनाम्बुसन्ततिः?] शिवेतरा। शिवात् मङ्गलात् इतरा शिवेतरा अमङ्गला। [किं लक्षणस्य जातवेदसः?] वैरिकृतस्य शत्रुसमुत्थस्य। सततं सर्वदा तव चेतसि हृदये ज्वलतः प्रज्वलतः क्रोधाग्नेरित्यर्थः। वैरिकृतस्य क्रोधाग्नेः वैरिवधमन्तरेण शान्त्यसम्भवात् अवश्यं तद्वधस्त्वया कर्तव्यः [इत्यर्थः]। यथाम्बुसिक्तेनाग्निः शाम्यते तथा शत्रुवधेन क्रोध इत्यौपम्यं गम्यते।। २४।।

इति दर्शितेति। महीपतिः राजा युधिष्ठिरः मरुतः वायोः सुतं भीमं सान्त्वयितुम् अनुनेतुं प्रसादयितुम् उपचक्रमे प्रवृत्तः। [कमिव?] द्विरदमिव। यथा कश्चित्पुमान् द्विरदं गजं

लघुटीका

शिवात् कल्याणात् इतरा अकल्याणा वैधव्यलक्षणा दुःखमयी रिपुनारीनयनाम्बुमयी सन्ततिः त्वदरातिवधूनयनोदकस्रुतिः शमं विदधातु शमयतात्। तद्वत् हृदये ज्वलन्तं वैराग्निं शमयतात्।२४।

अथ महीपतिः युधिष्ठिरो मरुतः सुतं पवनात्मजं भीमसेनम् उपसान्त्वयितुमपनेतुमुपचक्रमे आरभे। [किमुपसान्त्व्य ते]। क्रोधेन परीतम् आक्रान्तं मानसं यस्य स तथा तम्। इति पूर्वोक्तेन वचः प्रपञ्चेन दर्शिता विक्रिया विकारो येन स तथा तम्। [कमिव] दुष्टं द्विरदमिव। यथा हस्तिपकः आविष्कृतविक्रियं कर्णपुच्छचालनसङ्केतेन प्रकाशीकृतविकारं दुष्टं क्रुद्धं द्विरदव्यालं गजं उपसान्त्वयति सामवचोभिरनुनयति न पुनराक्रम्य निर्भर्त्सयति तथा उपसान्त्वितवान् उपचक्रमे इति। 'प्रोपाभ्यां समर्थाभ्याम्' इति आरम्भेऽर्थ आत्मनेपदम्। उपसान्त्वयितुं ववृते इत्यर्थः।।२५।

जोनराजटीका

इत्येवं दर्शिता विक्रिया प्रकृतिभ्रंशः येन तम्। यतो रोषाकुलीकृतचित्तं भीमसेनमुपसान्त्वयितुमनुनेतुं राजा प्रारेभे। यथा हस्तिपको मतङ्गजमनुनेतुमारभते।।२५।।

अपवर्जितविप्लवे शुचौ हृदयग्राहिणि मङ्गलास्पदे।
विमला तव विस्तरे गिरां मतिरादर्श इवाभिदृश्यते।। २६।।

अन्वयदीपिका

सान्त्वयितुं प्रसादयितुं प्रवर्तते। [किं लक्षणं द्विरदम्?] दुष्टम्। मत्तम्। तद्वदित्यर्थः। एतेन भीमस्य बलमेवोक्तं न पुनः बुद्धिरस्तीति। [किं लक्षणं मरुतः सुतम्?] इति दर्शितविक्रियम्। इति पूर्वोक्तप्रकारेण दर्शिता विक्रिया विकारो वचनारम्भः कोपो येन असौ इति दर्शितविक्रियः। तम्। क्रोधपरीतमानसम्। क्रोधेन कोपेन परीतम् आक्रान्तं व्याप्तं मानसं चेतो यस्य सः क्रोधपरीतमानसः। तम्। एतद्विशेषणद्वयं द्विरदपक्षेऽपि समानम्। राज्ञां हि उपकारविशेषाकाङ्क्षया कथमप्यवश्यो जनः मत्तमदः द्विरद इव वशीकरणीयः। न तु त्याज्य इति भावः। उपमालङ्कारः।।२५।।

प्रथमं तावत् स्तुत्यादिभिः प्रसादयति। **अपवर्जितेति**। हे भीम ! तव मतिः बुद्धिः गिरां विस्तरे वाक्प्रपञ्चे प्रथने वा विमला विशदा प्रकटा अभिदृश्यते।[कस्मिन्निव?] आदर्शे

लघुटीका

तदेव उपसान्त्वनमाह- हे भीमसेन ! अस्मिन् गिरां विस्तरे वाक्प्रपञ्चे तव मतिरभिदृश्यते वाक् प्रपञ्चेन तव मतिरनुमीयते। तादृशं तव हृदयं तथाविध एव वाग्विस्तरः। [कीदृशे वाग्विस्तरे?] अपवर्जितो निरस्तो विप्लवो अनर्थादिलक्षणो दोषो यस्मात् स तथा तस्मिन्नथवा अपवर्जितोऽपनीतो विप्लवः सं मोहोऽस्माकं येन स तथा। तस्मिन् तथा शुचौ अपशब्दरहिते। तथा हृदयग्राहिणि मनोहरे तथा मङ्गलानां कल्याणानाम् आस्पदे स्थानेऽभिहितार्थसिद्धिहेतुत्वात् [कस्मिन्निव] आदर्शे इव। आदर्शतुल्ये। अपवर्जितो विप्लवो

जोनराजटीका

क्रुद्धस्योक्तिनिराकरणं प्रथममेव न युक्तमित्यतो वचनं प्रशंसापूर्वमाह- अपवर्जितो विप्लवो बाधो येन तथा शुचौ निर्मले तथा मङ्गलानां स्थाने। अत एव हृदयरञ्जके तव

अन्वयदीपिका

इव दर्पणे इव। [किं लक्षणे गिरां विस्तरे?] अपवर्जितविप्लवे। अपवर्जितः रहितः गतः विप्लवः प्रमाणबाधो यस्य सः अपवर्जितविप्लवः। तस्मिन्। अपवर्जितविप्लवे। किन्तु सप्रमाणिके। [किं लक्षणे आदर्शे?] अपवर्जितविप्लवे। अपवर्जितः गतः बाह्य[मल]सङ्क्रमो विप्लवो यस्य सः अपवर्जितविप्लवः। तस्मिन्। [पुनः किं लक्षणे गिरां विस्तरे?] अत एव शुचौ। लोहशुद्धौ। [किं लक्षणे आदर्शे?] शुचौ लोहशुद्धौ। अत एव हृदयग्राहिणि मनोहरे। आदर्शेऽपि [योज्यम्]। [पुनः किं लक्षणे गिरां विस्तरे ?] मङ्गलास्पदे मङ्गलस्थाने। हितार्थप्रतिपादकत्वात्। [पुनः किं लक्षणे आदर्शे?] मङ्गलास्पदे श्रेयस्करे। मङ्गलवस्तुत्वात्। तथा चोक्तम्-

रोचनं चन्दनं हेम मृदङ्गं दर्पणं मणिम्।
गुरुमग्निं तथा सूर्यं प्रातः पश्येत्सदा बुधः।।

इति पुराणात्। मृदङ्गं मृदङ्गध्वनिं शृणुयात्। अत्र वाचां वैशद्यादेव मतिवैशद्यमनुमीयते। तत्पूर्वकत्वात्तस्येत्यर्थः। अनुमानप्रमाणितोपमालङ्कारः। श्लेष इति केचित् एकस्य वाक्यस्यानेकार्थप्रतीतिरिति। दर्पणे मुकुरादर्शावि**त्यमरः**। विस्तरो विग्रहो व्यासः स तु शब्दस्य विस्तर **इत्यमरः**।। २६।।

लघुटीका

बाह्यमलं यतः। स तथा विप्लवो ह्यत्र बाह्यममङ्गलम्। अत एव शुचौ निर्मले हृदयग्राहिणि हृद्ये रमणीये तथा मङ्गलास्पदे मङ्गलकारिणि मङ्गलकरे। एवं विधे आदर्शे यथा प्रतिबिम्बितं वस्तु दृश्यते तथा तव गिरां विस्तरे विमला भयादिदोषरहिता मतिर्लक्ष्यते। २६।

जोनराजटीका

गिरां विस्तरे मतिर्मलरहिता दृश्यते लक्ष्यते। बुद्ध्यनुसारेणोक्तेः स्फुरणात्। आदर्शे यथा वस्तु विमलं दृश्यते। तत्पक्षे विप्लवस्त्रासः।।२६।।

स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम्।
रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित्।। २७।।
उपपत्तिरुदाहृता बलादनुमानेन न चागमः क्षतः।
इदमीदृगनीदृगाशयः प्रसभं वक्तुमुपक्रमेत कः।। २८।। [युग्मम्]

अन्वयदीपिका

अथ युग्मेनाह- **स्फुटता ने**ति। **उपपत्ति**रिति।। हे भीम ! अनीदृगाशयः <इदं वक्ष्यमाणं वचनम् न ईदृग् ईदृग्गुणोपेतं क्षात्रयुक्तमिदमित्यभिप्रायः यस्य> प्रसभं बलात् वक्तुं कः जनः उपक्रमेत? उपक्रमं कुर्वीत। न कोऽपीत्यर्थः। इत्थं वक्तुम् उपक्रमितैव नास्ति। वक्ता तु दूरापास्त इति भावः। न ईदृग् आशयः इत्थं क्षात्रयुक्त्याभिप्रायो यस्य सः। अनीदृगाशयः। तदेवाह। हे भीम! पदैः सुप्तिङन्तशब्दैः स्फुटता विशदार्थता न अपाकृता? न त्यक्ता। झटित्यर्थप्रतीतेः। तर्हि अर्थगौरवं न भविष्यति। नेत्याह। अर्थगौरवं अर्थाधिक्यं न

लघुटीका

इदमीदृगेवंविधवचनम् अनीदृगाशयः अन्यादृशचित्ताभिप्रायः कः प्रसभं हठात् वक्तुम् उपक्रमेत वक्तुं प्रस्तावयेत्। यादृशमेवैतदोजस्वि वचनं तादृशमेव यस्य हृदयमूर्जस्वलं न स्यात्। स कथमेतद्वक्तुं प्रस्तावयेत्। त्वमेवैतत्सर्वतेज-स्विलक्षणानामाशयो वक्तुं शक्त इत्यर्थः। अत्र च पदैस्स्फुटता प्रकटार्थता नापाकृता न त्यक्ता। अर्थगौरवं न च न। न न स्वीकृतम्, किं तर्हि स्वीकृतमेव। यत्रात्यर्थमुत्तानार्थानि पदानि भवन्ति तत्र नातितरां महार्थता दृश्यते। प्रतीयमानादेरर्थान्तरस्याभावात्। इह तु तदुभयमस्ति। तथा गिरां पृथगर्थता भिन्नार्थता रचिता। अत्र क्वचिदपि पुनरुक्तार्थदूषणं न। क्वचिदपि सामर्थ्यं परस्परसम्बद्धार्थता च नापोहिता। यानि हि पृथगर्थानि तानि सम्बद्धार्थानि। न तथा भवन्ति यथा दशदाडिमादिवाक्ये।

जोनराजटीका

नरम् ईदृग्भवदुक्तसदृश आशयो यस्य सः क इदमीदृग्वचनं वक्तुमुपक्रमेतारभेत। त्वमेवेदृग्वक्तुं समर्थोऽसीत्यर्थः यथाऽऽशयमुक्तिस्फुरणात्। यतः पदैः स्फुटता प्रसादो न त्यक्तः। प्रसन्नपदताऽस्तीत्यर्थः। न च लघ्वर्थानि पदानीत्याह - अर्थगौरवं न न स्वीकृतम्, अर्थगौरववन्त्येवेत्यर्थः। गिरां बहूनां वचनानां पृथग्भिन्नोऽर्थो यस्य तद्भावो रचितः। परस्परसम्बद्धानि वाक्यानि यदि न स्युः पृथगर्थता कथं न स्यादित्याह- गीर्भिः सामर्थ्यं परस्परसम्बन्धो न त्यक्तः। पूर्वोत्तरवाक्यानां सङ्कीर्णार्थता नास्तीत्यर्थः। भवता वचसामुपपत्तिरुपादानं कथितम्। अनुमानेन बलादागमो बार्हस्पत्यादिर्न च क्षतः। युक्तिनिबद्धानि

अन्वयदीपिका

स्वीकृतमिति न। अपि तु स्वीकृतमेव। महार्थत्वात्। हे भीम! त्वया पदानाम् अनन्तरवाक्यानां पृथगर्थता भिन्नार्थता अपुनरुक्तार्थता रचिता कृतेत्यर्थः। वाक्यानां पदस्य श्लिष्टता नास्तीत्यर्थः। तथा च हे भीम! त्वया क्वचिदपि सामर्थ्यम् अन्वययोग्यं गिरामन्योन्यं साकाङ्क्षत्वं न चापोहितं न वर्जितम्। न त्यक्तमित्यर्थः। अन्यथा दशदाडिमादिशब्दवदेकवाक्यता न स्यात्।। २७।।

हे भीम ! त्वया बलात् बलमाश्रित्य उपपत्तिः युक्तिरुदाहृता। उक्ता [कथितेत्यर्थः।] पराक्रमपक्ष एव श्रेयान् इति युक्तिरुक्तेत्यर्थः। बलमाश्रित्य इति ल्यब् लोपे पञ्चमी। युक्तमेवैतन्महावीरस्येति भावः।[तथा च] हे भीम! त्वया अनुमानेन त्वया युक्त्या आगमो नीतिशास्त्रं न क्षतः न हतः। किन्तु आगमाविरुद्धमेवोक्तम्। अन्यथा तद्विरोधादनुमानस्यैवाप्रामाण्यं स्यात्। आगमभङ्गप्रसङ्गादिति भावः। "अभिप्रायश्छन्द आशय" **इत्यमरः**।। २८।।

लघुटीका

इह तु प्रतिवाक्यं पृथक्-प्रयोजनं महासम्बन्धश्च उपपत्तिर्युक्तिः उपपद्यमानता योग्यताबलात् धीशक्तित उदाहृता प्रतिपादिता। अनुमानेन लैङ्गिकेन प्रमाणविशेषेणागमो न क्षतः। आगमस्य क्षतिर्हानिर्न कृता। यत्र हि युक्तिघटनयैव केवलार्थः प्रतिपाद्यते तत्रागमस्य क्षतिर्दृश्यते। यथा बौद्धादौ अनुमानप्रमाणेनैव आगमस्यावेदार्थस्य क्षतिः कृता। अप्रामाण्यं विहितम्। इह तु विपक्षोच्छेदनीयता युक्त्याऽभिहिता। परं न च क्वापि बार्हस्पत्यादिशास्त्रविरोधः कश्चित्। प्रत्यक्षीकृतसकलवस्तुस्वरूपाणाम् ऋषीणाम् उपदेशवचनम् आगमः। न च स्वीकृतमित्यादौ च शब्दः प्रौढिद्योतनार्थः। सा च विरोधच्छायाप्रतीतेः स्वीकृतमिति स्वशब्द आत्मार्थः। स्वीकृतम् आत्मीकृतम् आत्मरूपतां प्रापिताम्। यथा 'पातालतस्तम इवासुरचक्रमुद्यदात्मीकरोतु भुवनत्रितयं क्षणेन'। अत्र पुनः पुरुषोत्तमेन सिन्धुराजं प्रमथ्य लक्ष्मीरात्मीकृता इत्यर्थः। ईदृक् आशयो यस्य स ईदृगाशयः इत्यत्र इदं शब्देऽभिमानधनस्येत्येवमादिभिर्वचनैर्योऽर्थः प्रदर्शितः स निदर्श्यते, न पुनः स्फुटता, न पदैरपाकृता इत्येवमादि। ।२७।२८।

जोनराजटीका

हि वचांस्यागमविरुद्धानि भवन्ति, स हेतुकत्वात्। च शब्दः प्रौढिद्योतनार्थः। प्रौढिश्च स्फुटेष्वपि पदेषु महार्थत्वम्। ये स्वशब्दैर्द्रव्यं प्रत्यनुपसर्जनभावमापन्नास्तैर्गुणैः सह षष्ठी समस्यते इति अर्थगौरवमित्यत्र षष्ठीसमासनिषेधाभावः।।२७,२८।।

अवितृप्ततया तथापि मे हृदयं निर्णयमेव धावति।
अवसाययितुं क्षमाः सुखं न विधेयेषु विशेषसम्पदः।। २९।।

अन्वयदीपिका

यदि साधूक्तं तर्हि तथैव क्रियतामित्याशङ्क्याह- **अवितृप्तयेति**। हे भीम ! यद्यपि त्वया सम्यक् निर्णीयोक्तम्। विचार्य उक्तम्। तथापि मे मम हृदयं निर्णयमेव गाहति। धावति, अनुसरति। अवेक्षत इत्यर्थः। अद्यापि निर्णयस्यानुदयादिति भावः। [कया?] अवितृप्ततया। असन्तुष्टतया। अद्यापि संशयत्वेनेत्यर्थः। [निर्णयानुदये हेतुमाह।] हे भीम! विशेषसम्पदः <अवान्तरभेदभूमानः बहुवाक्यानि> विधेयेषु सन्धिविग्रहादिकर्तव्यपदेषु स्थानेषु प्रयुक्ताः सत्यः सुखं यथा स्यात्तथा अक्लेशेन पुरुषान् अवसाययितुं स्वस्वरूपं स्वयमेव शीघ्रं

लघुटीका

यद्युपपन्नमागमविरोधि चैतद्वचनम्। तत्कथमह्नायैव नानुष्ठीयत इत्याशङ्क्याह- निर्णीतेऽपि त्वया कर्तव्ये तथापि मम सम्बन्धि हृदयं निर्णयमेव धावति निश्चयमेवानुसरति। यदि मया निर्णीतं तत्किमिति निर्णीषतीत्याशङ्क्याह- अवितृप्ततया विशेषेण तृप्तिर्वितृप्तिः। न विशिष्टं मे तृप्तं हृदयं किञ्चिन्मनाक् अभिलषतिं। निर्णयं प्रति कथमवितृप्तिरित्याह- अवसाययितुमित्यादिविशेषसम्पदो विशेषभूयस्त्वं वा विधेयेषु कर्तव्यविषये सुखं शीघ्रम् अवसाययितुं समापयितुं न क्षमा न समर्थाः। एतदुक्तं भवति- यावन्तो विशेषा वक्तव्याः ते सर्वे एव त्वयाऽभिहिताः किन्तु ते एव अतिबाहुल्येन विधेयेषु सन्धिविग्रहादिषु सुखं निश्चयं कारयन्ति। एतदुक्तं भवति- निर्णीतेष्वपि कार्येषु ये विशेषा विशेषपर्यालोच्या एकदा निर्णीताः सन्तो अवसाययितुं इदमित्थमेवेति निश्चयं कृत्वा अनुष्ठातुं न शक्यन्ते निर्णीये। निर्णीये पुनर्विशेषा विशेषपर्यालोच्याः अवलोक्याः इत्यर्थः। यावत्पुनः पुनर्निर्णीताः भवदभिहितमेव तावन्न निरूपयामो नात्राभिधेयमन्यदस्तीति।२९।

जोनराजटीका

एवं भीमोक्तिं स्तुत्वा शनैः शनैर्निराकर्तुमाह- यद्यपि भीमसेनवचनं युक्तं तथाप्यतृप्ततया हेतुभूतया मे हृदयं निश्चयमेव धावति, अन्विष्यति। निराकाङ्क्षं न जातमित्यर्थः। यतो विधेयेषु कर्तव्यवस्तुविषयेषु विशेषसम्पद इदमेव कर्तव्यमित्येवं रूपस्य विशेषस्य सम्पदः, समृद्धयोऽवसाययितुमवस्यन्तीः समाप्तिं प्राप्नुवन्तीः प्रयोक्तुं न क्षमाः निश्चेतुं न शक्यन्ते इत्यर्थः। कर्तव्यसामान्यं सर्वो जानाति। विशेषस्तु दुर्ज्ञानमित्यर्थः।।२९।।

सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।
वृणते हि विमृश्यकारिणं गुणुब्धाः स्वयमेव सम्पदः।। ३०।।

अन्वयदीपिका

प्रत्याययितुं विश्वासम् उत्पादयितुं न क्षमाः न समर्था भवन्ति। अनेकवाक्यत्वात् निर्णयानुदयः सन्धिविग्रहादिषु पुरुषस्य। विषयमात्रसुगमत्वेऽपि तद्विशेषाणां सौक्ष्म्यात् बाहुल्याच्च दुर्ज्ञानत्वात् अद्यापि निर्णयाकाङ्क्षेति तात्पर्यार्थः।। २९।।

विशेषपरिज्ञानमन्तरेणैव प्रवृत्तिरस्तु किं विशेषज्ञानेनेत्याह- **सहसेति।** [पुमानिति शेषः।] हे भीम ! पुमान् पुरुषः क्रियां कृत्यं कार्यं सहसा अविमृश्य अविचार्य न विदधीत न कुर्वीत। सहसेत्याकस्मिकाविमृश्ययोरिति गणव्याख्याने स्वरादिपाठादव्ययम्। [कुतो हेतोः] यतः कारणात् अविवेकः अविमृश्यकारित्वं परम् अत्यर्थम् अत्यधिकम् आपदां कष्टानां पदं स्थानं कारणमित्यर्थः। [व्यतिरेकेणोक्तमर्थमन्वयेनाह।] हे भीम! सम्पदः समृद्धयः श्रियः विमृश्यकारिणं पुरुषं तं स्वयमेव वृणते भजन्ते। वृङ् सम्भक्तावित्यस्य बहुवचने रूपम्। विमृश्य विचार्य करोतीति विमृश्यकारी। तम्। तस्मात् विमृश्यैव प्रवर्तितव्यमित्यर्थः। [किं लक्षणाः सम्पदः?] गुणलुब्धाः गुणगृध्नवः। गृधि अभिकाङ्क्षायाम्।। ३०।।

लघुटीका

सहसा राभसिकतयाऽविवेच्य कार्यं न कुर्यात्। कथमित्याह- अविवेको अविमर्शकः परं केवलम् आपदापदं विपदां स्थनम्। अथवा परमापदां महद्विपदां स्थानम्। विवेकपूर्वव्यवहरतः को गुण इत्याह- हि यस्मात्सम्पदः श्रियो विमृश्यकारिणं विवेच्यकारिणं जनं स्वयमेव वृणते समाश्रयन्ति। कस्मात् यतो गुणलुब्धा गुणानुरागिण्यः श्रियः। विमृश्य कारितैव गुणः। तत्र लुब्धाः। वृञ् क्र्यादिः। वृणते इति रूपम्।।३०।

जोनराजटीका

कर्तव्यविशेषलाभाभावजातामतृप्तिं सामान्योक्त्योपपादयति- निर्विवेकत्वेन क्रियां कार्यं न कुर्यात्, विमृश्य कुर्यादित्यर्थादापतितम्। सहसाकरणस्य पूर्वोक्तविमृष्यकरणस्य चापदागमनरूपं श्रीवरणरूपं च फलं हेतुतयाऽत्रोपन्यस्यति। अविवेकः सहसाकारी विपदां परमतिशयितं पदम्। यद्वा परं केवलं सम्पदो विमृश्यकारिणं विमर्शपूर्वकारिणं स्वयमायासं विनैव वृणते संश्रयन्ति। यतो गुणेषु विवेकादिषु लुब्धाः। विवेकेन श्रीप्राप्तिदर्शनादविवेकेन तु विपद्दर्शनात्सहसा कार्यं न कर्तव्यमित्यर्थः। यद्वा सहसा बलेन परं केवलमविवेकेन

अभिवर्षति योऽनुपालयन् विधिबीजानि विवेकवारिणा।
स सदा फलशालिनीं क्रियां शरदं लोक इवाधितिष्ठति।। ३१।।

अन्वयदीपिका

ननु साहसिकस्यापि कार्यफलसिद्धिर्दृश्यते एव, किं विवेकेनेत्याह। **अभीति।** हे भीम! यः विजिगीषुः पुमान् विवेकवारिणा विवेकजलेन विधिबीजानि कृत्यवस्तूनि अभिवर्षति सिञ्चति। विवेको वारीव विवेकवारि। तेन विवेकवारिणा विधीयन्त इति विधयः। कृत्यवस्तूनि विधिबीजानीव विधिबीजानि। *उपमितं व्याघ्रादिभिः सामान्याप्रयोगे* [२-१-५६] इति समासः। [किं कुर्वन्?] अनुपालयन् प्रतीक्षां कुर्वन्। हे भीम। तु पुनः। सः पुमान् सदा सर्वदा क्रियां कर्मर्च्छति। अधितिष्ठति प्राप्नोत्येव। न कदाचिद्व्यभिचरतीत्यर्थः। [किं लक्षणां क्रियाम्?] फलशालिनीम्। फलं साधननिष्पाद्योऽर्थः। तेन शालते शोभते सा फलशालिनी। ताम्। [कः

लघुटीका

ननु प्राप्तकालायेव कार्याणि सम्यगनुष्ठीयमानानि फलं वितरन्ति किं तत्र विवेकेनान्तरायेण इत्यत आह - विधिबीजानि कार्यवस्तुबीजानि कर्तव्यतया उपक्षिप्तानि यो विवेकवारिणा हेयोपादेयविचारेणानुपालयन् वर्धयन्नभिवर्षति। पुनः पुनः पर्यालोचनम् अभिवर्षणम्। यः कृषीवलो बीजान्युप्त्वा परिपालयन् शोषक्लेदादिदोषात् रक्षन्वारिणा अम्भसाऽभिवर्षति सिञ्चति स फलशालिनीं शरदमासादयति नान्यः। ३१।

जोनराजटीका

त्यक्तविचारः सन् पुरुषः कार्यं न कुर्यात्। मम बलिनः कः परिपन्थीति दर्पात्त्यक्तविमर्शतया कार्ये न प्रवर्तेत इत्यर्थः। हि यस्मादर्थे। आपदां पदम्। विपदाश्रयमपि विमृश्यकारिणं श्रियः स्वयमेव वृण्वन्ति। यद्वाऽस्यां व्याख्यायां परमितरं बलहीनमिति व्याख्येयम्। एतेन द्विरदानिवेत्यत्र श्लोके भीमेन यत्स्वविषयबलप्रशंसा कृता तन्निरस्तम्। प्रथमव्याख्यायास्तु 'द्विषतामुदय' इत्यादिश्लोकद्वयेन सहसैव यद्विपत्प्रतीकारोद्यमः कथितस्तन्निरासः। तथा 'भवन्तमेतर्हि'त्यादि द्रौपद्युक्तेश्च प्रतिक्षेपः सिद्धः।।३०।।

'तदल'मिति भीमोक्तिम'वन्ध्यकोपस्ये'त्यादि द्रौपद्युक्तिं च निरसितुमाह- यो विधयः कार्याण्येव बीजानि शाल्यादीनि विवेकजलेनाभिवर्षति सिञ्चति। अनुपालयन्प्रत्यवेक्षोद्यतः स पुरुषः सफलां क्रियामाश्रयति। यथा लोकः कार्षको जनः। शरदं तत्पक्षे फलं शाल्यादि।।३१।।

शुचि भूषयति श्रुतं वपुः प्रशमस्तस्य भवत्यलङ्क्रिया।
प्रशमाभरणं पराक्रमः स नयापादितसिद्धिभूषणः।। ३२।।

अन्वयदीपिका

कामिव?] लोकः शरदमिव। यथा लोकः कर्षको जनः शरदम् अधितिष्ठति प्राप्नोति। [किं लक्षणाम् शरदं?] फलशालिनीम्। फलेन सस्यादिना शालते सा फलशालिनी। ताम्। "लोकस्तु भुवने जने" **इत्यमरः**। 'सस्यं फलं हेतुकृते' इत्युभयमत्राप्यमरः।। ३१।।

विवेकिनो नियता कार्यसिद्धिरुक्ता। सम्प्रति इदानीं तामेव रुच्यर्थं स्तौति। **शुचि भूषयतीति**। हे भीम ! श्रुतं शास्त्रं श्रवणं कर्तृ वपुर्भूषयति। शरीरम् अलङ्करोति। अन्यथा अविद्वान् जनः शोच्यत इति भावः। [किं लक्षणं श्रुतम्?] शुचि सम्प्रदायशुद्धम्। हे भीम! प्रशमः क्रोधोपशान्तिः। तस्य श्रुतस्य अलङ्क्रिया भवति। अनिर्वचनीया शोभा भवति। अन्यथा सति क्रोधे श्रुतस्य निष्फलत्वादिति भावः। पराक्रमः अवसरे सति प्रशमाभरणं भवति। शौर्यं बलं प्रशमस्य शान्तेः अलङ्करणं भवति। पराक्रमेण प्रशमो भातीत्यर्थः। अन्यथा सर्वैरपि परिभूयते इति भावः। सः पराक्रमः नयापादितसिद्धिभूषणो भवति। नयेन

लघुटीका

स च विवेकः शास्त्राद्भवति। न पुनर्जन्मसहोत्थः कस्यचिदित्याह- शुचिनिर्मलं श्रुतमधीतं वपुः शरीरं भूषयत्यलङ्करोति। तस्य वपुषः प्रशमः शान्तताऽलङ्क्रिया भवति। प्रशमाभरणं प्रशमस्याभरणं पराक्रमः। पराक्रमहीनः पुमान् पशुरिव प्रतिभाति। स पराक्रमो नयेन नीत्या आपादिता कृता सिद्धिरर्थसाधनम् सैव भूषणं यस्य स नयापादितसिद्धिभूषणः। 'अनयेन भवन्ति न श्रियो यदि वा स्युर्न तु तत्र ताः स्थिराः'। प्राकृतास्ता इत्युक्तं भवति। प्रशमस्याभरणं प्रशमाभरणम्। यः खलु शान्तमनसोऽपि नयोपबृंहितपराक्रमः सोऽर्थसाधनम् इत्युक्तम्। नयश्च श्रुतादेव भवति इत्येवं श्रुतमूलमेव साधनम्। शुचि निर्मलम्। 'वक्तृविशेषनिस्स्पृहा' 'गुणगृह्या वचने विपश्चित' इत्येतदपि प्रतिक्षिप्तम्। ३२।

जोनराजटीका

शुद्धं शास्त्रं कर्तृ वपुर्भूषयति। तस्य शास्त्रस्य प्रशमोऽनौद्धत्यं भूषणं भवति, दर्पेण विद्याजातयशोहानेः। पराक्रमः शमस्य भूषणम्। पौरुषं विना शमे दैन्यसम्भावनात्। स पराक्रमः। नयेनापादिता सिद्धिर्भूषणं यस्य सः। नीतिरहिते शौर्ये चापलव्यपदेशापत्तेः।।३२।।

मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनाम्।
सुकृतः परिशुद्ध आगमः कुरुते दीप इवार्थदर्शनम्। ३३।।

अन्वयदीपिका

आपादिता नयापादिता चासौ सिद्धिश्च नयापादितसिद्धिः। नयापादितसिद्धिरेव भूषणम् अलङ्करणं यस्य सः नयापादितसिद्धिभूषणः। नयेन नीत्या आपादिता विवेकपूर्विका या सिद्धिः सैव भूषणम् अलङ्करणं यस्य सः। अन्यथा साहसिकसिद्धेः काकतालीयत्वेन पक्षे पराक्रमवैयर्थ्यं स्यादिति भावः।। ३२।।

विमृश्य कुर्यादित्युक्तम्। तत्र विमर्शोपायः कः इत्युक्ते शास्त्रमेवेत्याह- **मतिभेदेति**। हे भीम ! आगमः शास्त्रं कृत्यविधौ कार्यानुष्ठानविषये विवेकिनां पुरुषाणाम् अर्थदर्शनं कार्यज्ञापनं कुरुते। सम्पादयतीत्यर्थः। [किं लक्षणः आगमः?] सुकृतः सुष्ठु अभ्यस्तः। [पुनः किं लक्षणः आगमः?] परिशुद्धः। परितः सर्वत्र शुद्धः निश्चितः। [क इव?] दीप इव।

लघुटीका

ननु सन्ध्यादिषु षट्सु प्रस्तुतेषु यदेव पुष्यतितरां तदेवानुष्ठीयते। तत्किमसाधनाङ्गेन श्रुतेनेत्याह- कृत्यविधौ गहने दुर्ज्ञाते कार्यवस्तुन्यागमःश्रुतमर्थदर्शनं करोति। इदमिदानीं कर्तव्यमुचितम् इति निश्चयः शास्त्राद्भवतीत्यर्थः। शास्त्रज्ञा एव सन्धिविग्रहादिषु सामयिकतां समयौचित्यं जानन्ति, नान्यः। यतः केचित्सन्धिकर्तव्यतामाहुः, केचिद्विग्रहादीनामेकतममाहुः इत्येवं मतिभेदेन तिरोहिते आवृते कार्येविवेकिनां हेयोपादेयविचारनिपुणानाम् आगमः शास्त्रं दुर्ज्ञाते कार्ये अर्थदर्शनं करोति। विवेकिनां शास्त्रेण कर्तव्यं निश्चीयते। यथा तिरोहिते वस्तुसमूहे सुकृतः तैलवर्तिकोशिकारुचिरत्वेन शोभनः कृतः परिशुद्धः स्थूलशिखो दीपोऽर्थदर्शनं पदार्थदर्शनं कुरुते। बहुभ्यो बहुशोऽभियोगेनानुष्टानमागमस्य। सुकृतत्वं नैर्मल्यं निश्चयः परिशुद्धिः। मतिभेदः तम इव इति व्याघ्रादित्वात् समासः। ३३।

जोनराजटीका

इदं रम्यमिदं रम्यतरमिति सामादिप्रयोगरूपाणां मतानां भेदस्तेन तिरोहिते दुर्निश्चये। यतो गहने दुर्विगाहे करणीयवस्तुनि सुकृतोऽभ्यस्तस्तथा शुद्ध आगमः शास्त्रमर्थस्य तत्त्वस्य दर्शनं कुरुते। शास्त्रमेव परमार्थं दर्शयति इत्यर्थः। यथा दीपः सतिमिरे प्रदेशेऽर्थानां घटपटादीनां दर्शनं करोति।।३३।।

स्पृहणीयगुणैर्महात्मभिश्चरिते वर्त्मनि यच्छतां मनः।
विधिहेतुरहेतुरागसां विनिपातोऽपि समः समुन्नतेः।। ३४।।

अन्वयदीपिका

यथा दीपः जनानाम् अर्थदर्शनं वस्तुप्रतिभासं करोति। [किं लक्षणः दीपः?] सुकृतः शोभनपात्रकृतः। परिशुद्धः सुविहितः प्रवातादिदोषरहितश्च। तैलादिना निर्मलः। [किं लक्षणे कृत्यविधौ।] मतिभेदतमस्तिरोहिते आच्छादिते। कृत्यपरिज्ञाते। मतेः भेदः कृत्यनाशः कार्यविप्रतिपत्तिरित्यर्थः। मतिभेदस्तम इव इति मतिभेदतमः। मतिभेदतमसा तिरोहितः मतिभेदतमस्तिरोहितः। तस्मिन् मतिभेदस्तमस्तिरोहिते। अत एव गहने। दुरवगाहे। दुर्विज्ञाने। तमस्तिरोहिते कृत्यविधौ दीपः अर्थज्ञानं प्रकाशयतीति उपमालङ्कारः। 'आगमः शास्त्र'मिति **विश्वः**।। ३३।।

सुविचार्यानुतिष्ठवतः पुरुषस्य दैवकृतानर्थेऽपि सति न कश्चिदपराध इत्याह- **स्पृहणीये**ति। हे भीम! एवं लक्षणानां पुरुषाणां विनिपातोऽपि दैवकृतानर्थोऽपि दैवकी अनर्थाप्तिः समुन्नतेरभिवृद्धेः

लघुटीका

ननु शास्त्रज्ञानामपि विवेकपूर्वकं व्यवहरतामपि प्रायेण निष्फलाश्चारम्भा दृश्यन्ते इत्याह- स्पृहणीया अभिलषणीया गुणा येषां ते तथा। तैर्महात्मभिः पूर्वैः प्रधानपुरुषैः चरिते सेविते वर्त्मनि मार्गे मनो यच्छतां ददताम् तदीयेनाचारेण व्यवहरतां सतां यदि नाम विधिहेतुः दैवनिमित्तको विनिपातोऽपि कदाचिद् भवेत् तदा स विनिपातोऽपि समुन्नतेः समः। पतन्नपि विशेषलाभसन्निभः। तथा वर्तमानानां विपदपि अभ्युदयतुल्या। [कुतः? किं

जोनराजटीका

विवेकपूर्वं प्रयतमानानां पातोऽपि न दोषायेति प्रतिपादयितुमाह- स्पृहणीयाः श्रद्धेया गुणा येषां तैर्महात्मभिः सेविते मार्गे मनो यच्छता तेन मार्गेण गच्छतामित्यर्थः। विनिपातोऽप्युच्चपदाद्भ्रंशोऽपि समुन्नतेरत्युच्चपदस्थत्वस्य समः। यतो विधिर्न तु शत्रुवो हेतुर्यस्य स तथाऽऽगसामहेतुः। अविद्यमानो हेतुर्हेतुत्वं यत्र सः। अपराधेभ्योऽनुत्पन्न इत्यर्थः। भावप्रधानोऽयं निर्देशः। यथा 'मृदुव्यवहितं तेज' इत्यत्र। यथा वा 'द्व्येकयोर्द्विवचनैकवचने'

अन्वयदीपिका

समः सदृशः तुल्यः। सः पराभवो न भवति। किन्तु समुन्नतिरेवेत्यर्थः। दैविकेषु पुरुषस्यानुपलभ्यमानत्वादिति भावः। [किं लक्षणानां पुरुषाणाम्?] महात्मभिः महानुभावैः सज्जनैः चरिते अनुष्ठिते वर्त्मनि मार्गे आचारे वा मनः यच्छताम्। निदधताम्। सन्मार्गे व्यवहरतामित्यर्थः। [किं लक्षणैः महात्मभिः?] स्पृहणीयगुणैः। स्पृहणीयाः श्लाघ्याः स्तुत्याः गुणाः शौर्यादयो येषां ते स्पृहणीयगुणाः, तैः। [किं लक्षणः विनिपातः?] विधिहेतुः। विधिर्दैवं हेतुः निमित्तकारणं यस्य सः विधिहेतुः। अत एव आगसाम् अपराधानाम् अहेतुः अनिमित्तं दैवादागत इत्यर्थः। "विधिर्विधाने दैवे च"**त्यमरः**। यथाह कामन्दकः

यत्तु सम्यगुपक्रान्तं कार्यमेति विपर्ययम्।

प्रमादस्त्वनुपालभ्यो दैवान्तरितपौरुषः।।

इति व्यतिरेकोपमा। "विनिपातोऽवपातः स्याद्दैवादिव्यसनेष्वि"ति **विश्वः**।। ३४।।

लघुटीका

भूतो विनिपातः।] आगसाम् अहेतुः वाच्यता नहि। नहि तादृशं विनिपातं कश्चिदपराधमध्ये गणयति।३४।

जोनराजटीका

इत्यत्र। द्व्येकयोरित्यस्य द्विवचनान्तत्वज्ञापितो यथा भावप्रधाननिर्देशस्तथेहाप्यन्वयोक्तो हेतुशब्दस्य भावप्रधानो निर्देशः शुक्लदूरादिशब्दवत्। यद्वात्राऽऽगश्शब्देनागस्कृतान्यपयशांसि लक्ष्यन्ते, कार्यकारणोपचारात्। दृश्यते च कार्ये कारणोपचारः। यथा श्रीकण्ठचरिते 'वचो देवीप्रसादीकृतमि'त्यत्र प्रसादशब्देन प्रसादहेतुकं वस्त्वभिधीयते। स्फुरणीयगुणैः श्लाघ्यबन्धनरज्जुभी रथैस्सेविते मार्गे गच्छतां पतनं न दोषः। एतेन 'त्वयात्महस्तेन मही'ति 'द्विषन्निमित्ता यदिय'मिति च द्रौपद्युक्तिं निरस्यति।। क्षत्रियेण द्यूतार्थमाहूतेन द्यूतान्न निवर्तितव्यमिति द्यूतप्रवृत्तोऽहं च्छलात्तैर्यद्वञ्चितस्तन्मम नौन्नत्यभ्रंशकमित्यर्थः।।३४।।

शिवमौपयिकं गरीयसीं फलनिष्पत्तिमदूषितायतिम्।
विगणय्य नयन्ति पौरुषं विहतक्रोधजया जिगीषवः।। ३५।।

अन्वयदीपिका

सम्प्रति यद्विमृश्यं तदाह- **शिवमिति**। हे भीम ! जिगीषवः विजयेच्छवः जयं वाञ्छन्तः पुरुषाः पौरुषं पुरुषकारं पुरुषार्थम् उपायं नयन्ति प्रापयन्ति। पौरुषमुपायेन सह योजयन्तीत्यर्थः। नानिश्चितफलं कुर्वीतेति भावः। [किं कृत्वा?] एवं विधां फलनिष्पत्तिं फलसिद्धिं विगणय्य। फलवत्त्वं निश्चित्येत्यर्थः। [किं लक्षणां फलनिष्पत्तिम्?] गरीयसीम्। प्रभुतां महतीम्। अदूषितायतीम्। अदूषिता अक्षताः आयतीः उत्तरकालो यस्याः सा अदूषितायतीः। ताम्। अक्षतोत्तरकालां स्वन्तामित्यर्थः। [किं लक्षणं पौरुषम्?] शिवम्

लघुटीका

अथ किं पौरुषं नामासीयं नास्त्येव। सम्प्रति गरीयसीमनल्पामदूषितायतिम्। आगामिनि कले हितानुबन्धिनीं एवंविधां फलनिष्पत्तिं कार्यसिद्धिं विगणय्य। विहितक्रोधजयाः सन्तः। क्रोधं च विजित्य जिगीषवः पुरुषाः पौरुषं पुरुषकारं शिवमनुगुणं योग्यं कल्याणोदकम्-औपयिकम् उपायं सामादीनां मध्ये एकतममुपायं नयन्ति प्रापयन्ति। योग्ये उपाये पौरुषं योजयन्ति। पुरुषकारः पराक्रमः उपायं नीयते। यत एवं विधां फलनिष्पत्तिं विगणय्य क्रोधं विजित्य च जिगीषवः पुरुषाः पौरुषं शिवेन कल्याणकारिणा उपायेन सहितमाश्रयन्ते। ननु केवलं तस्मात्त्वमपि कोपं परित्यज्य शिवमुपायमालोचयेत्यर्थः। गरीयसीं फलनिष्पत्तिमित्यनेन यत्र सिद्धेऽर्थे मूषिकाफलं न तदारम्भणीयमिति दर्शयति। एतेन पञ्चाङ्गो मन्त्र एव

जोनराजटीका

विवेकपूर्वेणैव पुरुषकारेण सिद्धिरिति प्रतिपादयितुमाह - जिगीषवो जेतुकामाः पौरुषं कर्मभूतं शिवं शुभमौपयिकं सामाद्यन्यतममुपायं नयन्ति। पौरुषोपायौ समं प्रयुञ्जते इत्यर्थः। [किं कृत्वा?] दूषितायतिं गुरुतरां फलनिष्पत्तिं गणयित्वा विमर्शपूर्वं पौरुषोपायप्रयोगः कार्य इत्यर्थः। यद्वा दूषितामदूषणामायतिं गणयित्वा जेतुकामाः पौरुषं फलसिद्धिं नयन्ति। [पौरुषं किम्?] शिवमौपयिकं फलसिद्ध्यर्थं श्रेष्ठमुपायम्। तत्प्रयोगे फलसिद्धिरवश्यं भवतीत्यर्थः। यद्वा पौरुषं विगणय्यावमन्य शिवमौपयिकं सामादिकं फलनिष्पत्तिं नयन्ति।

अपनेयमुदेतुमिच्छता तिमिरं रोषमयं धिया पुरः।
अविभज्य निशाकृतं तमः प्रभया नांशुमताप्युदीयते।। ३६।।

अन्वयदीपिका

अनुकूलम्, सानुकूलम्। कर्तुः फलदायीत्यर्थः। औपयिकम्। उपाय एव औपयिकः। तम्। [किं लक्षणाः जिगीषवः?] विजितक्रोधरयाः। विजितः निराकृतः त्यक्तः क्रोधस्य रयः वेगो यैस्ते विजितक्रोधरयाः।। ३५।।

यदुक्तं विजितक्रोधरया इति तदवश्यकमित्याह- **अपनेयमिति**। हे भीम ! राज्ञा नृपेण पुरःप्रथमं तिमिरं तमोऽन्धकारम् अज्ञानं धिया विवेकलक्षणया आयुधीकृत्वा अपनेयं प्रणोद्यं निराकरणीयमित्यर्थः। [किं लक्षणेन राज्ञा?।] उदेतुम् उदयं प्राप्तुम् इच्छता। अभ्युदेतुम्

लघुटीका

ज्यायसी शक्तिः। मन्त्रशक्तिरेव प्रभुशक्तितः उत्साहशक्तितश्च ज्यायसी इत्याह। तेन 'प्रभवः' खलु इत्यादि यदुक्तं तत्परिहृतम्। क्रोधान्धो ह्युपायादीन्न पश्यति इति 'विहितक्रोधजया' इत्युक्तम्। उपाय एव औपयिकम्। 'विनयादित्वाट्ठक्'। उपायहृस्वत्वम्। 'कर्तृस्थे चाशरीरे कर्मणी'त्यात्मनेपदम्। सोपसर्गादित्याहुः। 'विनयन्ते न शरीरजन्मनः' इति। तथा च 'क्रोधं विनयते मन्युर्विनयते' इत्याह। रणद्वयं विगणय्येति परित्यागार्थेऽपि लोके प्रसिद्धिः। 'विगणितं त्वया सहास्माभिः', परित्यागः कृतः त्वया। 'विगणिता वयं', परित्यक्ता इत्यर्थः। बहूनां व्याख्यानान्तराणीमानि यदुक्तं तत्सूरिभिर्विचिन्त्य ग्राह्यम्।३५।

उदेतुमिच्छता अभ्युदयेप्सुना राज्ञा पुरः प्रथमत एव रोषमयं तिमिरं रोषाद्धेतोरागतं तमो मोहो धिया बुद्ध्या कृत्वा अपनेयं दूरे परित्याज्यं निरस्यम्। तथा हि तेजस्विनां प्राग्रहे श्रमता सहस्रांशुनापि यावत्प्रभया कृतं पूर्वं निशाकृतं नैशिकं तमोऽवभिद्यापनीयत उदीयते

जोनराजटीका

यद्वा शिवमुपायं फलनिष्पत्तिमदूषितायतिं च गणयित्वा पौरुषं नयन्ति कुर्वन्ति कृतक्रोधजयाः। औपयिकमिति विनयादिभ्यष्ठक्।।३५।।

एवं विवेकं स्तुत्वा रोषं निन्दितुमाह- उदेतुकामेन प्रथमं रोषतमो बुद्ध्या निवार्य दीप्त्याऽन्धकारमनिवार्यसूर्येणापि नोदीयते। उदीयते इत्युत्पूर्वस्य ईञ् गतावित्यस्य रूपम्।

बलवानपि कोपजन्मनस्तमसो नाभिभवं रुणद्धि यः।
क्षयपक्ष इवैन्दवीः कलाः सकला हन्ति स शक्तिसम्पदः।। ३७।।

अन्वयदीपिका

अभिलषता। [किं लक्षणं तमोऽन्धकारम्?] रोषमयम्। रोषादागतमित्यर्थः। आगतार्थे मयडिति मयट्। [तत्र दृष्टान्तमाह।] यथा अंशुमतापि सूर्येण कर्त्रापि प्रभया तेजसा कृत्वा निशाकृतं रात्र्या निहितं न्यस्तं तमो ध्वान्तम् अविभिद्य अनिराकृत्य उपेक्ष्य नोदीयते। किन्तु तमो बिभिद्यैव उदीयते इत्यर्थः। अंशुमतोऽप्येवं स्थितिः किमुताऽन्येषाम् इत्यपि शब्दार्थः।३६।

ननु क्षीणस्यैवं भवतु, बलीयसस्तु रोषादेव कार्यसिद्धिर्भविष्यतीत्यत्राह- **बलवानिति**। हे भीम! बलवानपि गुरुरपि यः नृपः तमसो मोहस्य अभिभवम् आक्रान्तिं न रुणद्धि, न निवारयति सः नृपः सकलाः समस्ताः शक्तिसम्पदः प्रभुमन्त्रोत्साहलक्षणाः तिस्रोऽपि शक्तयः समृद्धयः निहन्ति। नाशयति। [किं लक्षणस्य तमसः?] कोपजन्मनः। कोपात् जन्म यस्य तत् कोपजन्म। तस्य कोपजन्मनः। व्यधिकरणे बहुव्रीहिः। [क इव ?] क्षयपक्ष इव। यथा क्षयपक्षः कृष्णपक्षः सकलाः ऐन्दवीः इन्दुसम्बन्धिनीः कलाः हन्ति। नाशयति। "कला तु षोडशो भाग" **इत्यमरः**। अन्धस्य जङ्घाबलमिव कोधान्धस्य लोकोत्तरमपि सामर्थ्यं

लघुटीका

यावत्तमो न निरस्तं तावन्न उदीयते। किं तु प्रथमं निशासमुद्भूतं तमः अपास्य ततः पश्चादुदीयते। तस्मात् बुध्यारोषः प्रथमत एव त्याज्यः। ३६।

ननु अशक्तानामेषा प्रक्रिया न बलीयसाम्, तेषां प्रकोप एव विद्विषां प्रलयाय इत्याह–बलवानपि बलीयानपि यः कोपजन्मनः कोपसमुत्थस्य तमसः अज्ञानस्य मोहस्याभिभवमाक्षान्तिं न रुणद्धि न निवर्त्तयति स सकलाः समग्राः शक्तिसम्पदः प्रभुमन्त्रोत्साहलक्षणा हन्ति। कोपान्धबुद्धिः किञ्चिदपि कर्तव्यं नावैति। ततः प्रवृद्धा अपि

जोनराजटीका

एतेन 'कथं न मन्युर्ज्वलती'त्यादिकां द्रौपद्युक्तिमपि खण्डयति।।३६।।

रोषतमोग्रस्तानामुदयः कथं नाम स्यादिति प्रतिपादयितुमाह - कोपान्धकारात्पराभवं बलवानपि यो न रुणद्धि स समस्ताः शक्तिसमृद्धीर्हन्ति। यथा कृष्णपक्षः चान्द्रीः कलाः। स तदा तमोमयः।।३७।।

समवृत्तिरुपैति मार्दवं समये यश्च तनोति तिग्मताम्।
अधितिष्ठति लोकमोजसा स विवस्वानिव मेदिनीपतिः।। ३८।।

अन्वयदीपिका

व्यर्थमेवेत्यर्थः। अत्र कालस्य सर्वत्र कारणत्वात् क्षयपक्षस्य कलाक्षयकारित्वमस्त्येव। तमस्तु तत्कालविजृम्भणात्तथा व्यपदेशः। उपमा।। ३७।।

विमृश्यकारिणः क्रियाप्रकारमाह - **समवृत्तिरिति**। सः मेदिनीपतिर्भूपतिः ओजसा बलेन लोकं भुवनम् अधितिष्ठति आक्रामति। [क इव?] विवस्वानिव। सूर्य इव। यथा विवस्वान् सूर्यः ओजसा तेजसा लोकम् आक्रामति तद्वदित्यर्थः। [सः कः?] यः मेदिनीपतिः समवृत्तिः सन् समये सति अवसरे सति मार्दवं मृदुत्वं मृदुवृत्तिमुपैति प्राप्नोति। च अपरम् तिग्मतां तीक्ष्णां वृत्तिं तनोति विस्तारयति। समा वृत्तिर्वर्त्तनं यस्य सः समवृत्तिः। नातिमृदुः नातितिग्मः समवृत्तिरित्युच्यते। सूर्योऽपि समये हेमन्तादौ मृदुर्भवति। तथा समये ग्रीष्मे तिग्मतां तीक्ष्णवृत्तिं च तनोति। सूर्योऽपि मध्याह्नसमये ग्रीष्मादौ च तिग्मवृत्तिर्भवति। तत

लघुटीका

शक्तीः असाववसादयति। यथा क्षयपक्षः कृष्णपक्षः तमसाऽभिभूताः ऐन्दवीश्चान्द्रमसीः सकलाः पञ्चदशापि कलाः शनैः शनैः हन्ति क्षपयति। तमसोऽभिभवमिति कर्तरि षष्ठी। ३७।

कः तर्हि राजा जगतीमाक्रमेदित्याह- यो राजा समवृत्तिः सर्वेषां भूतानां समं वर्तमानो मार्दवमुपैति मृदुरूपो भवति। एवं तर्हि मृदुं मन्येरन् इत्याह- यश्च समये अवसरे तिग्मतां तीक्ष्णतां तनोति सर्वेषां भूतानां समवृत्तिः समं वर्तमानः सन् तिग्मतां तैक्ष्ण्यं च यस्तनोति आविष्करोति। न पुनरकाण्डे एव तिग्मतां तनोति। किन्तु समये प्रस्तावे तिग्मतां तनोति स एवं वर्तमानो मृदुतया उग्रतया च सर्वेषां भूतानां समये समये समं वर्तमानः सन् स राजा ओजसा प्रतापेन लोकमधितिष्ठति आक्रामति। विवस्वानिव सूर्य इव। यथा भगवान् सूर्यः समवृत्तिः सन् समानतया मृदुभावं पूर्वमुपैति भजते समये काले मध्ये दिने ग्रीष्मे वा सर्वेषां भूतानां समानतया तिग्मतां तनोति स एव ओजसा लोकमाक्रामति।३८।

जोनराजटीका

विवेकपौरुषाभ्यामेव सर्वं लभ्यते इत्याह- चयापचयरहितो यो मृदुतामाश्रयति, तथा समये परस्माद्बलाधिक्ये सति यस्तीव्रतां करोति स राजा तेजसा भुवनमाक्रमति यथा विवस्वानर्कः। स च समवृत्तिर्विषुवदादौ वर्तमानो मृदुः समये निदाघादौ तीक्ष्णः।।३८।।

क्व चिराय परिग्रहः श्रियां क्व च दुष्टेन्द्रियवाजिवश्यता।
शरदभ्रचलाश्चलेन्द्रियैरसुरक्ष्या हि बहुच्छलाः श्रियः।। ३९।।

अन्वयदीपिका

एव सर्वदा न मृदुवृत्तिना नातितिग्मवृत्तिना भवितव्यम्। मेदिनीपतिसूर्ययोः साधर्म्योपमा।।३८।।

उक्तस्य प्रकारान्तरकरणे दोषमाह- **क्वेति**। हे भीम! श्रियां सम्पदां चिराय बहुकालं परिग्रहः स्वायत्तीकरणं क्व? दुष्टेन्द्रियवाजिवश्यता क्व? इन्द्रियाणि वाजिन इव इति इन्द्रियवाजिनः। दुष्टाश्च ते इन्द्रियवाजिनश्च दुष्टेन्द्रियवाजिनः। दुष्टेन्द्रियवाजिनां वश्यः वशङ्गतः दुष्टेन्द्रियवाजिवश्यः। दुष्टेन्द्रियवाजिवश्यस्य भावः दुष्टेन्द्रियवाजिवश्यता। क्वेति सम्बन्धः। क्वापि। उभयमेकत्र न तिष्ठतीत्यर्थः। [कुत इत्याह।] हि यस्मात्कारणात् चलेन्द्रियैः अजितेन्द्रियैः पुरुषैः श्रियः लक्ष्म्यः असुरक्ष्याः न सुखेन रक्ष्याः। रक्षितुमशक्या इत्यर्थः। कथञ्चित्प्राप्ताः श्रियोऽपि अविनीतेषु न तिष्ठन्तीत्यर्थः। चलानि चञ्चलानि अवशानि इन्द्रियाणि येषां ते। तैः। [किं लक्षणाः श्रियः?] शरदभ्रचलाः। शरदभ्रवत् शरत्समयमेघवत् चञ्चलाः चपलाः। [पुनः किं

लघुटीका

ननु दुर्नीतानामपि लक्ष्मीः प्रायेण दृश्यते। यथा धार्त्तराष्ट्राणामित्याह– क्व इति महत्यन्तरे। क्व चिराय चिरकालं यावत् श्रियां परिग्रहः श्रियां सम्पदां स्वीकारः। क्व दुष्टेद्रियवाजिवश्यता। दुष्टानामिन्द्रियवाजिनां वश्यता आयत्तता। यो दुष्टानाम् इन्द्रियाश्वानाम् आयत्तः स चिरं श्रीभाजनं न भवति। परिग्रहणं परिग्रहः स्वीकारः। वशं गतो वश्यः। तद्भावो वश्यता। ये हि अजितेन्द्रियास्तेषां प्राक्तनकर्मवशात् यद्यपि श्रीर्भवति तथापि चिरभाविनी न भवति इत्यर्थः। इन्द्रियाश्ववश्यानां (कथं) श्रियः स्थिरा न भवन्तीत्याह- हि यस्मात्। चलेन्द्रियैश्चपलेन्द्रियैः श्रियोऽसुरक्ष्याः। सुखेन अनायासेन रक्षितुं शक्यन्ते सुरक्ष्याः न सुरक्ष्याः असुरक्ष्याः। यतः [कथं भूताः श्रियः?] शरदभ्रचलाः। शरदम्बुदवत् गत्वर्यः। [पुनः किं भूताः] बहुच्छलाः। बहूनि च्छलानि गमनरन्ध्राणि। प्रमादायासान्ताः च्छलं प्रमादः। चलतीति चलः। इन्द्रियाणि वाजिन इव व्याघ्रपादादित्वात्समासः। इन्द्रियवाजिनः अमार्गेण परवशानां नेतृत्वात्। ३९।

जोनराजटीका

चिरं श्रियां परिग्रहः क्व! दुष्टेन्द्रियाण्येव वाजिनस्तेषां क्व! विधेयत्वम्। बहुच्छला अत एव शरन्मेघचपला लक्ष्म्यश्चपलेन्द्रियै रक्षितुं न शक्यन्ते।।३९।।

किमसामयिकं वितन्वता मनसः क्षोभमुपात्तरंहसः।
क्रियते पतिरुच्चकैरपां भवता धीरतयाऽधरीकृतः।। ४०।।

अन्वयदीपिका

लक्षणाः श्रियः?] अत एव बहुच्छलाः अनेकव्याजाः बहुरन्ध्रा इत्यर्थः। "छले तु स्खलिते व्याज" इति **विश्वः**।। ३९।।

कोपस्य दुष्टत्वमुक्त्वा तस्य त्यागमुपदिशति। **किमसामयिकमिति**। हे भीम! भवता त्वया अपांपतिः समुद्रोऽपि किं किमर्थम् उच्चैः अधिकः क्रियते। पराजितं पुनः न उच्चैः कुर्यादित्यर्थः। [किं लक्षणः अपांपतिः?] धीरतया धैर्येण अधरीकृतः। नोच्चैःकृतः पूर्वमिति शेषः। [किं लक्षणेन भवता?] मनसः चित्तस्य क्षोभं विकारं वितन्वता कृतवता। [किं लक्षणस्य मनसः?] उपात्तरंहसः। उपात्तं प्राप्तं रंहो त्वरा येन तत् उपात्तरंहः तस्य उपात्तरंहसः। [किं लक्षणं क्षोभम्?] असामयिकम्। समयो यस्य प्राप्तः स सामयिकः। न सामयिकः असामयिकः। तम्। असामयिकम्। अप्राप्तकालमित्यर्थः। धीरतयेति। धैर्यगुणेनेत्यर्थः। मनसो निर्विकारत्वं धैर्यं वितन्वतेति भीमविशेषणेन <अपांपतिः?>] पदार्थस्योच्चैः कारणहेतुत्वोक्तेः काव्यलिङ्गमलङ्कारः।। ४०।।

लघुटीका

एवमन्वयव्यतिरेकाभ्यां कोपस्य दोषवत्त्वं प्रतिपाद्य प्रकृतमुपसंहरन्नाह- हे भीमसेन! भवता त्वया गाम्भीर्येण धीरतया योऽयमपांपतिः समुद्रः सर्वदाऽधरीकृतो न्यक् कृतः समुद्र इदानीं कथम् उच्चकैः क्रियते। त्वमधरीभवसि। समुद्रो गाम्भीर्येणाधिको भवति। [भवता किं कुर्वता?] उपात्तरंहसो गृहीतकोपस्य मनसोऽसामयिकम् अकाण्डजं क्षोभं संरम्भं

जोनराजटीका

क्रोधो यस्य स्वभावस्तस्योपदेशोऽनर्थको न च भवांस्तथाविध इति प्रतिपादयितुमाह- गृहीतरोषवेगस्य चित्तस्याकालिकं क्षोभं वितन्वता त्वया पूर्वं धैर्येण जितः समुद्रउच्चकैः किं क्रियते? समुद्रस्य काले सति क्षोभदर्शनात्, त्वं तु पूर्वं समयेऽपि नाक्षोभ्यः। अद्य कथमकाले एव क्षुभ्यसे इत्यर्थः। अधरीकृतस्योनीकृतस्योच्चकैः करणमाधिक्यापादन-मयुक्तम्।।४०।।

श्रुतमप्यधिगम्य ये रिपून् विनयन्ते न शरीरजन्मनः।
जनयन्त्यचिराय सम्पदाम् अयशस्ते खलु चापलाश्रयम्।। ४१।।

अन्वयदीपिका

श्रुतमप्येति। हे भीम! ये पुरुषाः श्रुतं शास्त्रम् अधिगम्यापि ज्ञात्वापि रिपून् कामक्रोधादीन् अरीन् न विनयन्ते न नियच्छन्ति। न नियमयन्ति। ते पुरुषाः। खलु निश्चितम्। अचिराय आत्मीयसम्पदां श्रियाम्। अयशः दुष्कीर्तिं जनयन्ति। उत्पादयन्ति। [किं लक्षणम् अयशः?] चापलाश्रयम्। चापलाः चञ्चलाः पुरुषाः आश्रयो आधारो यस्य तत् चापलाश्रयम्। आश्रयदोषादेव श्रियां चञ्चलत्वमस्थैर्यत्वम्। न आत्मदोषादित्यर्थः। अजितारिषड्वर्गस्य कुतः सम्पद इत्यर्थः। [किं लक्षणान् रिपून्?] शरीरजन्मनः। शरीरप्रभवान् शरीरजनितानित्यर्थः।। ४१।।

लघुटीका

वितन्वता आविष्कुर्वता। असमये क्षुभ्यन् अगम्भीर इति गण्यते। यतो गाम्भीर्यस्य लक्षणम्-

'यस्य प्रसादजाकाराः क्रोधहर्षभयादयः।
भावस्था नोपलक्ष्यन्ते तद्गाम्भीर्यमुदाहृतम्।।

समयः प्राप्तो <यस्य> स सामयिकः। 'समयः तदस्य प्राप्तम्' इति ठञ्। रंहो वेगः कोपलक्षणम्। ४०।

न च केवलमकाले क्षोभमातन्वताम् अधीर इत्ययशो जगति प्रथते यावत् सम्पदोऽपि तेषां विनश्यन्तीत्याह- ये पुरुषाः श्रुतमप्यधिगम्य शास्त्रमप्यधीत्य शरीरजन्मन आन्तरानन्तरङ्गजान् शत्रून् रिपून् कामक्रोधलोभमानमदहर्षान् षट् शत्रून् विनयन्ते न, न नियमयन्ति ते पुरुषाः सम्पदां श्रियामचिराय तत्क्षणादेव चापलाश्रयमयशो जनयन्ति। अचिरं गत्वर्यः श्रिय

जोनराजटीका

भवादृशां क्रोधावेशोऽतिनिन्दावह इति प्रतिपादयितुमाह- शास्त्रमप्यधीत्य ये देहस्थान् शत्रून्कोपादीन्न विनयन्ते न नियमयन्ति ते चापलं चपलत्वमाश्रयो निदानं यस्य तदपयशोऽलक्ष्मीणां जनयन्ति। अहो! लक्ष्मीर्लोला यद्गुणवत्स्वपि चिरं न तिष्ठतीति लोको लक्ष्मीं निन्दतीत्यर्थः। श्रीस्तथाविधेषु न तिष्ठतीति तात्पर्यम्।।४१।।

अतिपातितकालसाधना स्वशरीरेन्द्रियवर्गतापनी।
जनवन्न भवन्तमक्षमा नयसिद्धेरपनेतुमर्हति।। ४२।।

अन्वयदीपिका

तथापि क्रोधश्चेत्कार्यनाश इत्याशयेनाह- **अतिपातितेति।** हे भीम ! अक्षमा अक्षान्तिः क्रोधः कर्तृ भवन्तं त्वां जनवत् पृथक् जनमिव हीनजनमिव नयसिद्धेः नयसाध्यात् फलात् अपनेतुं त्याजयितुं नार्हति न योग्यो भवति। असमये क्रोधस्य आत्मसन्तापातिरिक्तं फलं नास्तीत्यर्थः। [किं लक्षणा अक्षमा?] अतिपातितकालसाधना। कालाः समयाः साधनानि सहायादीनि। कालाश्च साधनानि च कालसाधनानि। अतिपातितानि पराजितानि कालसाधनानि यया सा अतिपातितकालसाधना। [पुनः किं लक्षणा अक्षमा?] स्वशरीरेन्द्रियवर्गतापनी। स्वशरीरश्च इन्द्रियवर्गश्च स्वशरीरेन्द्रियवर्गौ। स्वशरीरेन्द्रियवर्गयोः तापनी स्वशरीरेन्द्रियवर्गतापनी, दाहकर्त्रीत्यर्थः।। ४२।।

लघुटीका

इत्यकीर्तिमुत्पादयन्तीत्यर्थः। अजितेन्द्रियतयैव ते स्वयं श्रिय उद्दामयन्ति । तासां तु श्रियां मिथ्यैवायशः। यत एवमजिताभ्यन्तरारातिषड्वर्गाः श्रियां भाजनं न भवन्तीत्यर्थः। ४१।

अतस्त्वमपि क्रोधवशं मा गम इत्याह- अक्षमा क्रोधः। त्वां भवन्तं नयसिद्धेर्नीतिजनिताया अर्थसिद्धेरपनेतुमाक्रष्टुं नार्हति। अनयमार्गान्तरं नेतुं नार्हति। [कीदृक् ? अक्षमा।] अतिपातितोऽतिक्रान्तः कालः समयः साधनानि सहायादीनि च स यया सा तथा। अमर्षवशादकाले एव क्रियारम्भात्कालातिपातो भवति। अमर्षवशात्साधनान्यनपेक्ष्य उद्यमकरणात्साधनातिपातश्च भवति। [पुनः कीदृक्?] स्वस्य शरीरस्य इन्द्रियवर्गस्य च तापनी तापकारिणी। अक्षमाशीलस्य हि रात्रिन्दिवमर्थं भावयतः स्वस्य शरीरस्य इन्द्रियवर्गस्य

जोनराजटीका

अतस्तव कोपवशत्वं न युक्तमित्याह- काल एव साधनं प्राप्त्युपायः। अतिपातितमुल्लङ्घितं यया सा तथा। निजदेहेन्द्रियगणतापप्रदा। अक्षमाऽक्षान्तिरितरजनमिव त्वां नयसिद्धेर्भ्रंशयितुं नार्हति। यथा प्राकृतजनस्य नयसिद्धिभ्रंशः क्रोधेन भवति तथा तव मा भूदित्यर्थः।।४२।।

उपकारकमायतौ भृशं प्रसवः कर्मफलस्य भूरिणः।
अनपायि निबर्हणं द्विषां न तितिक्षासममस्ति साधनम्।। ४३।।

अन्वयदीपिका

अक्षमायाः दोषमुक्त्वेदानीं क्षमायाः उदाहरणमाह - **उपकार** इति। हे भीम! तितिक्षा समं क्षान्तिसमानम् अन्यसाधनम् उपायः नास्ति। यद्यस्ति तर्हि तितिक्षैव साधनं नान्यदित्यर्थः। [किं लक्षणं साधनम्?] भृशम् अत्यर्थम्। आयतेः उत्तरकालस्य उपकारकम्। स्थिरफलहेतुरित्यर्थः। भूरिणः अनेकस्य कर्मफलस्य कार्यसिद्धेः प्रसवः आदिकारणम्। प्रसूयते अनेनेति प्रसवः। अनपायि। स्वयमविनश्यदेवेत्यर्थः। अपायो नाशो न भवतीत्यनपायि। द्विषां शत्रूणां निबर्हणं विनाशकमित्यर्थः। "क्षान्तिः तितिक्षे"**त्यमरः**। न तितिक्षासममित्यनुक्तोपमेया समास अर्थी लुप्तोपमा।। ४३।।

लघुटीका

केवलं सन्ताप उत्पद्यते न पुनरर्थसिद्धिः काचिदिति स्वशरीरेन्द्रियवर्गनापनी। यस्यात्मा एवंविधाया अक्षमाया वशंगतः स इतरजनः। अतः त्वं नीतिमार्गं न्यक्कर्तुं नार्हसीत्यर्थः।४२।

यद्येवमक्षमादोषायाः, क्षमायास्तर्हि को गुण इत्याह- तितिक्षासमं क्षमातुल्यम् अन्यत्साधनं नास्त्येव। साधनान्तरमपि सम्प्रत्येवोपकारि। तथा च किञ्चिदेवाल्पोपकारि भवति। तथा च अल्पीयसः कर्मफलस्योत्पादकं भवति। तितिक्षालक्षणं तु साधनम् [किं भूतम्?] आयतौ आगामिन्यपि काले भृशम् अत्यर्थं बहुतरम् उपकारकं उपकारि। [पुनः किं भूतम्?] भूरिणः प्रभूतस्य कर्मफलस्य क्रियासिद्धेः प्रसव उत्पत्तिस्थानम्। तथा

जोनराजटीका

एवमक्षमादूषणेन भीमस्य समरसंरम्भं निवार्य क्षमाश्रद्धया 'द्विषतामुदय' इत्येतन्निरसितुमाह- आयतौ भाविनि काले भृशमुपकारकं तथा प्रभूतस्य क्रियाफलस्य प्रसवः पुष्पम्। क्षमयैव कार्यफलप्राप्तेः। तथाऽनपायि निरपायम्। शत्रूणां निबर्हणं बाधा वैरिबाधाकरमित्यर्थः। कवचादिभिः शराणामिव क्षमायाः। केनाप्यहतशक्तित्वात् तितिक्षायाः क्षमायाः सदृशं साधनमुपायो नास्ति। क्षमावतां शत्रवः स्वयमेव ग(ल)न्तीत्यर्थः। क्षमायां कृतायां तेन दानमानाभ्यां राज्ञां वशीकरिष्यमाणत्वात्।।४३।।

प्रणतिप्रवणान्विहाय नः सहजप्रेमनिबद्धचेतसः।
प्रणमन्ति सदा सुयोधनं प्रथमे मानभृतां न वृष्णयः।। ४४।।

अन्वयदीपिका

ननु तितिक्षायाः कालक्षेपात् दुर्योधनः सर्वान् राज्ञः वशीकुर्यादित्यत्रोत्तरमाह- **प्रणतिरिति**। हे भीम! वृष्णयः यादवाः सदा सर्वकालं सुयोधनं दुर्योधनं न प्रणमन्ति। सुहृद्भावेन नमन्ति, किन्तु कालमपेक्षन्त इत्यर्थः। यतः [किं लक्षणाः वृष्णयः?] मानभृताम् अभिमानवतां प्रथमे अग्रेसराः। 'प्रथमचरमे'त्यादिना जसि विकल्पः। सुयोधनः स्वयम् अभिमानी। साभिमानोऽन्यान् न सहते इत्यर्थः। [किं कृत्वा?] नः अस्मान् विहाय त्यक्त्वा। [किं लक्षणान् नः?] प्रणतिप्रवणान्। प्रणामप्रवणान्। प्रणतौ प्रवणः प्रणतिप्रवणः। तान् प्रणतिप्रवणान्। नम्रानित्यर्थः। सुयोधनो न तथेति भावः। [पुनः किं लक्षणाः वृष्णयः?]

लघुटीका

साधनान्तराणि द्विषां निबर्हणानि सत्यं, किन्तु सापायानि तानि। परं तितिक्षाख्यं तु साधनं द्विषां निबर्हणं घातानां शत्रूणामुच्छेदकारि। अनपायि निरत्ययम् अपायो विद्यते यस्मिन् तदपायि। न अपायि अनपायि। निर्दोषम्। एतेना'नुपालयताम् उदेष्यती' इति यदुक्तं तत्परिहृतम्। यस्मात् इहाक्षमाऽनवसरे विपदेऽयशस्या। ४३।

यदि सम्प्रति तितिक्षामेवाश्रयामहे तदस्मासु निरुद्यमेषु रिपूणां परिणते समस्तमण्डले परत एकाकिनः किं करिष्याम इत्याशङ्क्याह- वृष्णयो यदवो नोऽस्मान्विहाय अपास्य सुयोधनं सदा न प्रणमन्ति। अन्ये राजानः कार्ये सम्प्रति तं प्रणमन्ति। वृष्णयस्तु न। कदाचिदपि तं न प्रणमन्तीति वाक्यार्थः। कथमस्मानेव प्रणमन्तीत्यत्र विशेषणद्वारेण कारणमाह- [किं भूतान्नः?] प्रणतिप्रवणान्। वयं हि तेषां प्रणत्याऽवनत्या प्रवणा अभिमुखाः। [तान् किं भूतान्नः।] सहजेन ज्ञातेयसमुत्थितेन प्रेम्णा स्नेहेन निबद्धं चेतो येषां ते तथा तान्। यतः तु

जोनराजटीका

निःसहायानामस्माकं का सिद्धिरित्याशङ्क्याह- प्रणत्या प्रवणान्स्निग्धान्नस्त्यक्त्वा वृष्णयो दुर्योधनं सदा न नमन्ति यतः सहजेन प्रेम्णा निबद्धमस्मदेकविषयीकृतं चेतो येषां तथा मानिनामाद्याः।।४४।।

सुहृदः सहजास्तथेतरे मतमेषां न विलङ्घयन्ति ये।
विनयादिव यापयन्ति ते धृतराष्ट्रात्मजमात्मसिद्धये।। ४५।।

अन्वयदीपिका

सहजप्रेमनिबद्धचेतसः। सहजः अकृत्रिमः प्रेम स्नेहः। सहजञ्च तत् प्रेम च सहजप्रेम। सहजप्रेम्णा निबद्धं संलग्नं चेतोऽन्तःकरणं येषां ते सहजप्रेमनिबद्धचेतसः। अस्मासु विषये गाढस्नेहाः लग्नचेता इत्यर्थः। सुयोधने तु न तथेत्यर्थः। कार्यवशात् एवं तं भजन्ते इत्यर्थः। अनुशगस्त्वस्यास्मास्वेवेत्यर्थः। सति यादवसाहाय्ये न किञ्चिदस्माकम् असाध्यं भवेदिति भावः।।४४।।

किञ्च कारणान्तरमाह। **सुहृदे**ति। पुनः किमुवाचेत्याह। हे भीम! ते सर्वे दुर्योधनोपजीविनोऽपि नराः राजानः धृतराष्ट्रात्मजं दुर्योधनं यापयन्ति। सेवन्ते इति कोऽर्थः? कालं गमयन्ति गमयिष्यन्तीत्यर्थः। उत्प्रेक्षते। विनयादिव। यादवानुकूल्यादिव। कालं गमिष्यन्ति। कार्यकालेऽपि वृष्णिपक्षप्रवेशिन एवेत्यर्थः। [किमर्थम्?] आत्मसिद्धये। स्वजीवनार्थम्। वृत्तिसिद्ध्यर्थमित्यर्थः। ते के ये एषां वृष्णीनां यादवानां सुहृदः मित्राणि च अपरे ये सहजाः

लघुटीका

[किंभूतास्ते?] मानभृतामहंकारिणां। प्रथमे आद्याः प्रधानभूताः। यत्नतोऽपि ते न नमन्ति। एवंविधाश्च ते अस्माकं पक्ष्याः। अतस्ततोऽन्यैः किं प्रयोजनमस्माकमित्येतदप्युक्तं भवति। नः इति द्वितीयाबहुवचनम्।४४।

येषां वृष्णीनां यदूनां ये सहजाः सुहृदः ये मातृपक्ष्या बान्धवाः तथा इतरे ये कृत्रिमाः सुहृदः ये च राजानः येषां वृष्णीनां मतमभिप्रेतं न विलङ्घयन्ति नावमन्यन्ते। किन्तु ये वृष्णिभिः सहैकमतीभूता वर्तन्ते। एतेषामाश्रिताः सर्वे ते धृतराष्ट्रात्मजं सुयोधनम् आत्मसिद्धये आत्मसिद्ध्यर्थं विनयादिव यापयन्ति गमयन्ति। [कथं विनयादिव?] कृत्रिमविनयेन एवैनं

जोनराजटीका

केवलैर्वृष्णिभिः कियत्साहाय्यमित्याह- ये सहजा नः सुहृदः सखायः तथा ये सहृद्भ्य इतरे तस्य शत्रवः। अथवा नः सहजाः सुहृदस्तथेतरे कृत्रिमाः सुहृद इति व्याख्येयम्। एषां सुहृदामितरेषां च ये मतं नोल्लङ्घयन्ति ते विनयादिव न पुनस्तात्त्विकविनयात्।

अभियोग इमान्महीभुजो भवता तस्य कृतः कृतावधेः।
प्रविघाटयिता समुत्पतन् हरिदश्वः कमलाकरानिव।। ४६।।

अन्वयदीपिका

सहजाताः पितृमातृपक्ष्याः तथा इतरे कृत्रिमसुहृदः। तथा च ये एतेषां वृष्णीनां मतं वृष्णिपक्षं न विलङ्घयन्ति। नातिक्रमन्ति। ते द्वयेऽपि पुरुषाः दुर्योधनोपजीविनोऽपीति शेषः।। ४५।।

किन्तु नायमभियोगकाल इत्याशयेनाह- **अभियोग** इति। हे भीम! अभियोगः अभिमानः इमान् पूर्वोक्तान् महीभुजो राज्ञः प्रतिघाटयिता। भेत्स्यतीत्यर्थः। [किं लक्षणोऽभियोगः?] भवता त्वया तस्य सुयोधनस्य कृतः विहितः अवघात इति शेषः। [किं लक्षणस्य तस्य?] कृतावधेः। कृतः अवधिः परिभाषितकालो यस्य सः कृतावधिः। तस्य कृतावधेः सुयोधनस्य। कर्मणि षष्ठी। "अवधिस्त्ववधाने स्यात्सीम्नि काले बलेऽपि चेति" **विश्वः**। "अभियोगस्तु शपथे स्यादार्द्रे च पराभवे" **इत्यमरः**। [क इव?] हरिदश्व इव। यथा हरिदश्वः सूर्यः

लघुटीका

यापयन्ति सेवन्ते। सम्प्रति कालापेक्षतया प्रीत्या इव यापयन्ति, न तु परमार्थतस्तस्य प्रीत्या इत्यर्थः। ४५।

भवता त्वया कृतावधेः पूरितसमयस्य तस्य सुयोधनस्य त्वया कृतोऽभियोग उद्यमो युद्धायोत्साहः। इमान्महीभुजो राजानः पूर्वोक्तान् वृष्णीन् वृष्णीनां सम्बन्धिनः सुहृदश्च पक्षीयाश्च एतान् राज्ञः प्रविघाटयिता। तस्मात्सुयोधनादिमान् राज्ञोऽचिरेणैव भेदयिष्यति। तं विहायास्माभिस्सह सङ्गमिष्यन्ति। ते राजानः साम्प्रतं तमनुवर्तमानास्सन्ति। [कः कानिव?] हरिदश्वः कमलाकरानिव। यथा समुत्पतन् समुद्यन्नेव हरिदश्वः सूर्यः कमलाकरान् कमलवनानि

जोनराजटीका

दुर्योधनमात्मसिद्ध्यर्थं यापयन्ति अस्मत्कृतामेवावधिं प्रतीक्षन्ते इत्यर्थः। अथवा एषां वृष्णीनां ये सुहृदस्तथेतरे तथैवैषां मतं नोल्लङ्घयन्ति ते सदा दुर्योधनं न नमन्ति।।४५।।

अवधावतीते कार्यसिद्धावुपपत्तिमाह- कृतोऽतीतोऽवधिर्यस्य तस्य त्वया कृतोऽभियोग आक्षेप एतान्राज्ञो भेदयिता। लुट्। 'यथोदयन्नर्कः पद्माकरान्विघटयति'। तस्येति। 'षष्ठी चानादरे' इति षष्ठी।।४६।।

उपजापसहान्विलङ्घयन् स विधाता नृपतीन्मदोद्धतः।
क्षमते न जनोऽप्यधः क्रियां किमु लोकाधिकधाम राजकम्।। ४७।।

अन्वयदीपिका

समुत्पतन्नेव उद्यन्त उदयं प्रापन्नेव कमलाकरान् कमलसमूहान् उद्घाटयति। प्रविघाटयति। भेत्स्यतीत्यर्थः।। ४६।।

अथापनयने वृष्णिपक्षाः तं त्यजिष्यन्तीत्याह। **उपजापेति**। पुनः किमुवाचेत्याह। हे भीम! सः दुर्योधनः नृपतीन् अन्यानपि नृपान् उपजापसहान् भेदयोग्यान् विधाता। भेत्स्यति। भेदं करिष्यतीत्यर्थः। सहन्त इति सहाः। उपजापस्य भेदस्य सहाः उपजापसहाः। तान् उपजापसहान्। [किं कुर्वन्?] तेषां नृपतीनां विलङ्घयन् मदात् अवमानयन् अवगणयन्नित्यर्थः। [किं लक्षणः सः?] यतः मदोद्धतः मदेन उद्धतः मदोद्धतः। राज्यमदेनेत्यर्थः। "उद्धतो दुर्वृत्ता"विति **विश्वः**। "भेदोपजापा"वि**त्यमरः**। अवमानितो जनः सुभेद्य इति भावः। [न च ते सहिष्णव इत्याह।] हे भीम! प्राकृतोऽपि जनः हीनोऽपि लोकः अधः क्रियताम्

लघुटीका

प्रविघाटयति विकासयति। प्रविघाटय(यि?)ता इति घटिश्चौरादिकः। ४६।

ननु तद्विघटने यत्नान्तरमारम्भणीयमित्याह- एवं वृष्णीनां तत्सुहृदां चात्मीकरणे यत्नान्तरमेव न करणीयम्, येऽप्येते राजानस्तमनुवर्तन्ते तानपि भेदयिष्यामः। कथं भेदयितुं शक्या इत्याह- सुयोधनो मदोद्धतः सन् स एव नृपतीन् राज्ञो विलङ्घयन् उपजापसहान् भेदयोग्यान् करिष्यति। कथमपमानिताः सन्तो भेद्या भविष्यन्तीत्याह- हि यस्माज्जनोऽपि प्राकृतोऽधःक्रियामपक्रियामपमाननं न क्षमते न सहते। किम्? सुलोकाधिकधाम। लोकेभ्योऽधिकं धाम तेजो यस्य तद्राजकं कथमधःक्रियां पराभवं सहेत, यां प्राकृतोऽपि लोको न सहते। किमु किं पुनरित्यर्थः। राज्ञां समूहो राजकम्। अपमानिता कथं भेद्या इति दर्शयति। एतेन वयमवधिप्रान्ते निस्सहायाः कथमुद्योगं करिष्यामः इत्येतत्परिहृतम्। यत एवमुक्तेन न्यायेन

जोनराजटीका

न केवलमेते एव भिद्यन्ते यावदस्मत्क्षमयाऽन्येऽपीति दर्शयितुमाह- मदोद्धतत्वादन्यानपि राज्ञोऽवमन्यमानः स भेदसहान् कर्ता। युक्तमेतत्। सामान्यजनोऽप्यधः क्रियां तिरस्कारं न सहते। राजकं राजसमूहोऽधः क्रियां किमु सहेत। यतो लोकादधिकं धाम यस्य तत्।।४७।।

असमापितकृत्यसम्पदां हतवेगं विनयेन तावता।
प्रभवन्त्यभिमानशालिनां मदमुत्तम्भयितुं विभूतयः।। ४८।।

अन्वयदीपिका

अपमानं न सहते न क्षमते। तर्हि राजकं राजसमूहः किमुत न सहते इति किमु वक्तव्यमित्यर्थः। [किं लक्षणं राजकम्?] लोकाधिकधाम लोकोत्तरप्रतापम्। तथा च सति कृत्स्नमेव राजमण्डलम् अस्मानेव अवलम्बयिष्यते इति भावः। अत्र कैमुतिकन्यायेनार्थान्तरन्यासोऽलङ्करः।।४७।।

ननु प्रथमे सर्गे 'सखीनिवे'त्यादिवनेचरोक्तरीत्या तस्य मदसम्भावना कथमित्यत्राह **असमापितेति।** हे भीम! अभिमानशालिनाम्। अहङ्कारिणां पुरुषाणां विभूतय एव सम्पद एव मदम् अहङ्कारं चित्तविकारम् उत्तम्भयितुं वर्धयितुं प्रभवन्ति समर्था भवन्ति। सम्पद एव वर्धयन्तीत्यर्थः। [किं लक्षणं मदम्?] तावता स्वल्पेन कार्यकारणपर्यन्तेनेति विशेषः। विनयेन हतवेगम्। प्रतिबद्धवेगमित्यर्थः। न तु स्वरूपतो हतम्। [किं लक्षणानामभिमानशालिनाम्?]

लघुटीका

वयं ससहायाः स तु निस्सहायो भविष्यति। ननु मदमत्तस्सन् स एव नृपतीन् राज्ञः पदे पदे विलङ्घयन्नपमानयन् स्वयमेव विधास्यति इति कथमुच्यते। यावता 'सखीनिवेत्यादिना न तेन सज्यं क्वचिदुद्यतं धनुरित्यादिना चरेण तस्य सर्व एव राजानस्तस्य गुणै रक्तास्सन्तो निश्चला वशमागताः इत्युक्तम्। ४७।

इदानीमेव नृपतीनां विलङ्घनं कथं युज्यते? नृपतय उपजापसहाः कथमित्याशङ्क्याह- ये प्रकृत्याऽभिमानशालिनोऽहङ्कारिणः तेषां विभूतयः एव सम्पद एव मदमुत्तम्भयितुं प्रभवन्ति मदं वर्द्धयितुं समर्था भवन्ति। [किं भूतं मदम्?] कृत्रिमेण कार्यार्थमाश्रितेन। तावता स्वल्पेन विनयेन सम्प्रति हतवेगम्। प्रतिस्खलितवेगम्। तावता इति शब्देन विनयस्य कृत्रिमत्वमल्पत्वं चोक्तम्। हतवेगं मदम्। वेगशब्देन मदस्य सहजत्वं प्रचुरत्वं चोक्तम्।

जोनराजटीका

नीतिज्ञस्य तस्य कथं मदोद्धतत्वमित्याशङ्क्याह - अभिमानेन ये शालन्ति तेषां मदमुत्तम्भयितुमुद्रेचयितुं वर्धयितुं लक्ष्म्यः प्रभवन्ति। मदस्योत्तम्भनापेक्षा कस्माद्धेतोर्भवतीत्याह- तावताऽसमापनरूपेणाल्पेनेत्यर्थः। विनयेन हतो वेगो यस्य सः तेषाम्। विनयः कथं भवेदित्याह- असमापिताः कृत्यानां सम्पदो बाहुल्यानि यैः। यावन्न कार्याणि सम्पन्नानि

मदमानसमुद्धतं नृपं न वियुङ्क्ते नियमेन मूढता।
अतिमूढ उदस्यते नयान्नयहीनादपरज्यते जनः।। ४९।।

अन्वयदीपिका

असमापित-कृत्यसम्पदाम्। असमापिता समाप्तिं न नीता कार्यसम्पत् कृत्यसम्पद्यैस्ते असमापितकृत्यसम्पदः। तेषाम्। असमापितकृत्यसम्पदाम्। अकृतकृत्यानामित्यर्थः। कार्यसमाप्तिपर्यन्तं स्वल्पजनः तूष्णीं न तिष्ठतीत्यर्थः। अत एव सर्वथा सम्पदः पृथक्जनं दुर्जनं विकारयन्तीति भावः।। ४८।।

अथ मदस्य अनर्थत्वं श्लोकद्वयेनाह। **मदेति। अपराग** इति। हे भीम! सहिष्णुना सहनशीलेन विजिगीषुणा पुरुषेण महानपि रिपुः उन्मूलयितुं मूलादुद्धर्तुं सुकरः सुलभः सुसाध्यः। [सुकरोन्मूलन इत्यर्थः। किंवत्?] तरुवत्। तरुः इव। अत्र वतिप्रत्यय इवार्थे। यथा केनचित्पुरुषेण महानपि तरुः उन्मूलयितुं पातयितुं सुलभः। [किं लक्षणो रिपुः?]

लघुटीका

कृतकृत्यानां यदि विभूतिरेव मद उत्तम्भितः स्यात्तत्का क्षतिरित्याह- किं भूतानामसमापिता अपारिता कृत्यसम्पत्कार्यसमूहो यैः ते तथा। अपारितकार्यजातानामन्तरेव विभूतय एव मदमुत्तम्भयन्ति। स च सुयोधनोऽस्मज्जिगीषया सम्प्रति विनयमवलम्ब्य कार्यं साधयति। अनन्तरमसमापितकार्यसमूहस्यैवास्य श्रिय एव मदं जनयिष्यन्ति।।४८।

यद्यभिमानशालिनां विभूतयो मदं वर्धयितुं प्रभवन्ति तत्किमित्याह- मदो हर्षः संपज्जनितो विभूतिसमुत्थः। मानोऽहंकारः स्वाभाविकः। ताभ्यां समुद्धतमुन्मत्तं नृपं नियमेनावश्यं भावेन मूढता मौर्ख्यं न वियुङ्क्ते न जहाति। मदमानाभ्यां समुद्धतो मूढः सन् न किञ्चिदपि कार्यमवैति इत्यर्थः। ततः किमित्याह- अतिमूढः सन्कार्यविवेचनायामशक्तः

जोनराजटीका

तावत्कृत्रिमेण विनयेन मन्दीकृतं मदं कार्यसिद्धौ लक्ष्म्योऽभिमानिनामुत्तम्भयन्तीत्यर्थः। अस्मत्क्षमया तस्य लक्ष्मीप्राप्तौ सत्यां विनयापगमेन मदवृद्धिर्भवतीत्यर्थः।।४८।।

एवं सति न केवलं राजान एव तस्मादि्भद्यन्ते यावत्प्रजा अपि विघटन्ते इत्याह- मदमानाभ्यां समुद्धतं राजानं मूढता ध्रुवं न त्यजति। नयोऽतिमूढं त्यजति, नयवर्जिताज्जनोऽपरक्तो भवति।।४९।।

अपरागसमीरणेरितः क्रमशीर्णाऽऽकुलमूलसन्ततिः।
सुकरस्तरुवत्सहिष्णुना रिपुरुन्मूलयितुं महानपि।। ५०।।

अन्वयदीपिका

अपरागसमीरणेरितः। अपगतः रागोऽनुरागः प्रीतिः यस्मात् असौ अपरागः। अपरागः समीरण इव। अपरागः समीरणेन ईरितः नोदितः। प्रजाऽवैमनस्यम् अनुराग इत्यर्थः। [पुनः किं लक्षणो रिपुः?] क्रमशीर्णाकुलमूलसंहतिः। क्रमेण शनैः शनैः परिपाट्या बुद्धिविशेषेण शीर्णा शिर्णीभूताऽऽकुला त्वरितप्राया। आकुलानां मूलपुरुषाणाममात्यादीनां संहतिः प्रकृत्यादिः स्वजनवर्गसमूहो यस्या असौ क्रमशीर्णाकुलमूलसन्ततिः। [किं लक्षणो तरुः?] अपरागसमीरणेरितः। अपरागसदृशः समीरणो वायुः तेन ईरितः। शिथिलीकृतः। [पुनः किं लक्षणो तरुः?] क्रमशीर्णाकुलमूलसन्ततिः। क्रमेण शीर्णा शीर्णीभूता। शनैः जीर्णत्वात् आकुला शिथिला मूलसंहतिः मूलसमूहो यस्य सः। <किञ्च> हे भीम! मूढता अज्ञत्वं

लघुटीका

सन्नयान्न्यायमार्गादुदस्यतेऽपगच्छति। ततोऽपि किमित्याह- नयहीनाद्दुर्नीतान्नृपाज्जनो लोकोऽपरज्यते, सर्व एव लोको विरज्यते। उदस्यते इत्युपसर्गादस्यत्यूह्योर्वेति वाच्यम् (वा) ७-१-७ इत्यात्मनेपदम्। रुचादित्वादपरज्यते इति। दैवादिक उभयपदी।।४९।

एवमपि किमित्याह- सहिष्णुना क्षमाशीलेन पुरुषेण महानपि रिपुरुन्मूलयितुं सुकरः क्लेशेन उन्मूल्यते। उत्सादयितुं शक्य इत्यर्थः। [किं भूतम्?] यतः जनापराग एव समीरणो वायुस्तेन ईरितश्चालितपदः। अत एव क्रमेण शनैश्शनैः शीर्णा उत्थायोत्थाय गता आकुला अनवस्थिता मूलसन्ततिः। मूलजालं भृत्यजनता। मौलभृत्यसुहृत्-श्रेणिद्विषदाटविकषड्विधबलस्य सन्ततिः। भृत्यजनता यस्य स तथा। एवंविधो रिपुः सहिष्णुना क्षमाशीलेन उन्मूलितुमुत्सादयितुं

जोनराजटीका

पूर्वोक्तजनापराग एव समीरणस्तेनेरितश्चालितोऽत एव क्रमेण शीर्णा विशरारवः सम्पन्ना अखिला मूलसन्ततयो मौलवर्गा यस्य स राजा महानपि वृक्ष इवोन्मूलयितुमुत्खानितुं सुकरः। सुखेन तथा विधो राज्यात्पात्यते इत्यर्थः। तरुपक्षे मूलानि पादाः।।५०।।

अणुरप्युपहन्ति विग्रहो नृपमन्तः प्रकृतिप्रकोपजः।
अखिलं हि हिनस्ति भूधरं तरुशाखान्तरघर्षजोऽनलः।। ५१।।

अन्वयदीपिका

कार्याकार्यपरिज्ञानाभावत्वम्। नृपं राजानं नियमेन अवश्यं न वियुङ्क्ते। न मुञ्चति। न जहातीत्यर्थः। [किं लक्षणं नृपम्?] मदमानसमुद्धतम्। मदो दर्पः मानः अहङ्कारः। मदश्च मानश्च मदमानौ। मदमानाभ्यां समुद्धतः मदमानसमुद्धतः। तं मदमानसमुद्धतम्। उत्कटमित्यर्थः। तया मूढतया। [किं स्यादित्याह] अतिमूढः नयात् नीतिमार्गात् उदस्यते उत्क्षिप्यते। पात्यत इत्यर्थः। <किञ्च> जनो लोकः नयहीनात् नीतिरहितात् राज्ञः सकाशात् अपरज्यते विरक्तो भवतीत्यर्थः।। ४९-५०।।

ननु अन्तर्भेदमात्रेण कथं साध्यस्तत्राह- **अणुरिति।** हे भीम! अणुरल्पीयानपि विग्रहः विरोधः वैरः नृपम् अपहन्ति नाशयतीत्यर्थः। [किं लक्षणो विग्रहः?] अन्तःप्रकृतिप्रकोपजः। अन्तःप्रकृतयः अमात्यादयः। अन्तःप्रकृतीनां प्रकोपः अन्तः प्रकृतिप्रकोपः।

लघुटीका

सुकरः सुखेनाक्लेशेनोत्साद्यते। किञ्च तत्तरुवद्यथा- तरुर्वृक्षो महानपि समीरणेनेरितः चालितः सन् क्रमेण शनैः शनैः शीर्णा क्षीणा आकुला विलोला मूलसन्ततिर्मूलजालं यस्य सः। एवं विधो वृक्षः उन्मूलयितुं सुकरः सुखेनोन्मूल्यते उत्साद्यते।५०।

कथं प्रकृतिविरागमात्रेण शत्रोर्मूलच्छेदः स्यादित्याह- अन्तः प्रकृतयोऽमात्या जनपदश्च। तत्प्रकोपजस्तदपराधजन्यः समुत्थो विग्रहो विरोधोऽणुरपि स्वल्पोऽपि राजानं नृपम् उपहन्ति नाशयति। एतदेव दृष्टान्तेन दर्शयति। हि यस्मात्। तरूणां शाखान्तराणां घर्षणेन जातोऽनलः समुत्पन्नोऽग्निः अखिलं समग्रं भूधरं पर्वतं हिनस्ति दहति। न बाह्योऽग्निः। एवमन्तः प्रकृतिविभागजः स्वल्पोऽपि विग्रहो राज्ञां महतीं बाधां जनयति।।५१।

जोनराजटीका

निजाः प्रभोरौद्धत्येन विरक्ताः प्रकृतयः किं कुर्युरित्याह- अन्तःप्रकृतयोऽमात्या जनपदाश्च तेषां प्रकोपाज्जातोऽल्पोऽपि विग्रहः प्रभुमुपहन्ति। यथा तरुशाखान्तानां निघर्षाद्घर्षणाज्जातोऽग्निः समस्तं शैलं दहति।।५१।।

मतिमान्विनयप्रमाथिनः समुपेक्षेत समुन्नतिं द्विषः।
सुजयः खलु तादृगन्तरे विपदन्ता ह्यव(वि)नीतसम्पदः।। ५२।।

अन्वयदीपिका

अन्तःप्रकृतिप्रकोपाज्जातः अन्तःप्रकृतिप्रकोपजः। प्रकृतिः पञ्चभूतेषु स्वभावे मूलकारणे। छन्दः कारणगुह्येषु जन्त्वमात्यादिकेष्विति **वैजयन्ती**। [क इव?] अनल इव। यथा अनलोऽग्निः अखिलं भूधरं गिरिं हिनस्ति ज्वलयति दहतीत्यर्थः। [किं लक्षणः अनलः?] तरुशाखान्तनिघर्षजः।। तरूणां शाखाः तरुशाखाः। तरुशाखानाम् अन्ताः तरुशाखान्ताः तरुशाखान्तानां निघर्षः सङ्घर्षः तस्माज्जातः। अत्रोपमानोपमेयसमानधर्माणां बिम्बप्रतिबिम्बतया निर्देशात् दृष्टान्तालङ्कारः।।५१।।

तथापि वर्धमानं शत्रुं कथम् उपेक्षते इत्याशङ्क्य दुर्विनीतत्वादित्याह- **मतिमानिति।** हे भीम! मतिमान् बुद्धिमान् प्राज्ञः पुमान् द्विषः शत्रोः समुन्नतिं वृद्धिं समुपेक्षेत। उपेक्षां कुर्यादित्यर्थः। [किं लक्षणस्य द्विषः?] विनयप्रमाथिनः। विनयं प्रमथ्नातीति विनयप्रमाथी। तस्य दुर्विनीतस्येत्यर्थः। [उपेक्षायाः फलमाह।] तादृक् अविनीतो रिपुः अन्तरे रन्ध्रे सुजयः सुखेन जेतुं शक्यः। हे भीम! यस्मात्कारणात् अविनीतसम्पदः अविनीतलक्ष्यः विपदन्ताः।

लघुटीका

यत एवं मदमानोद्धतं नृपं मूढता न जहाति। मूढश्च नयं जहाति। नयहीनस्य च लोको विरज्यते। विरक्तपौरश्च उन्मूलयितुं सुशक्यः। अतो हेतोर्मतिमान्प्राज्ञः पुरुषो विनयप्रमाथिनोऽविनयवतः शत्रोर्द्विषः समुन्नतिं राज्यलाभादिलक्षणां समुपेक्षते। औदासीन्येन स्थितोऽवलोकयेत्। खलु यस्मात्तादृक् शत्रुरन्तरे रान्ध्रे अन्तः प्रकृतिप्रकोपजे सुजयः सुखेन जीयते। कथमित्याह- हि यस्मादविनीतसम्पदोऽविनीतानां सम्पदो विपदन्ताः आपदन्ताः। ५२।

जोनराजटीका

'अनुपालयतामुदेष्यती'मिति निरसितुमाह - विनयत्यागिनः शत्रोरौन्नत्यं प्राज्ञः समुपेक्षेत। तदौन्नत्यनाशे यत्नं न कुर्यात्। तादृग्विनयप्रमाथी छिद्रे सति सुजयो विरक्तप्रकृतित्वादिति भावः। युक्तमेतत्। अविनीतानां श्रियो विपदन्ते परिणामे यासां ता भवन्ति।।५२।।

लघुवृत्तितया भिदां गतं बहिरन्तश्च नृपस्य मण्डलम्।
अभिभूय हरत्यनन्तरं शिथिलं कूलमिवापगारयः।। ५३।।

अन्वयदीपिका

विपत् आपत् अन्ते अवसाने परिपाके यासां ताः विपदन्ताः। अविनीतस्य दुर्नयस्य पुरुषस्येत्यर्थः। सम्पदः समृद्धयः।। ५२।।

कथं दुर्विनीतस्य शत्रोः सुजयत्वमित्याशङ्क्य भेदजर्जरितत्वादित्याह। **लघुवृत्तितयेति।** पुनः किमुवाचेत्याह। अनन्तरः सन्निहितः अनिहितोऽक्षतो विजिगीषुः पुमान् नृपस्य राज्ञः मण्डलं राज्यं राष्ट्रं हरति स्वायत्तं करोति। [किं कृत्वा?] अभिभूय। आक्रम्य आकलय्येत्यर्थः। [किं लक्षणं नृपस्य मण्डलम्?] लघुवृत्तितया। स्वस्य दुर्वृत्तिः बहिः मित्रादिजनपदेषु। अन्तर्मध्ये अमात्यादिषु च भिदाङ्गतं भेदं प्राप्तम्। [कः? किमिव?] आपगारयः शिथिलकूलमिव। यथा आपगारयः नदीवेगः शिथिलं कूलं तटं हरति त्यजतीत्यर्थः। [किं लक्षणं कूलम्?]

लघुटीका

ततः परेषां किं सिध्यतीत्याह- लघुवृत्तितया नीतिबाह्येन नृपस्य मण्डलं सैन्यं भिदां गतं भेदं प्राप्तं सन्तम् अनन्तरः शत्रुसमीपदेशस्थः शत्रुरभिभूयाक्रम्याहरति स्वीकरोति। [क्व भेदं प्राप्तम्?] बहिरन्तश्च। बहिर्मित्रपक्षे अन्तश्चामात्येषु जनपदे च। यथा नदीकूलं बहिरन्तश्च भेदं प्राप्तमत एव शिथिलं निवृत्तकाठिन्यम्। अनन्तरो निकटवर्ती। तदीय एव प्रवाहो हरति स्थित्वा नयति। आपगा नदी तस्या रयो वेगः। एवं 'प्रणतिप्रवणान्विहाय न' इत्यादिवाक्येन। अतः प्रकृतिप्रकोपः कथितः। सम्प्रति उपेक्षमाणः कालान्तरेषु सुसाध्यः सुयोधनः सम्पत्स्यते इति कुर्वता 'द्विषतामुदय' इत्यादि यदुक्तं तत्परिहृतम्।५३।

जोनराजटीका

अत्रोपपत्तिमाह- बहिः प्रजारूपमन्तःप्रकृतिरूपं मण्डलमनन्तरोपगतच्छिद्रो राजा पराजित्य न तु च्छलादि कृत्वा हरति। यतो लघुवृत्ततया विनयत्यागेन भिदां गतं विभिन्नम्। यथाऽनन्तरो विच्छेदरहितः प्रवाहो बहिरन्तश्च शिथिलं तटं हरति। तत्पक्षे लघुवृत्तता गुरुत्वाभावः।।५३।।

अनुशासितमित्यनाकुलं नयवर्त्माऽऽकुलमर्जुनाग्रजम्।
स्वयमर्थ इवाभिवाञ्छितस्तमभीयाय पराशरात्मजः।। ५४।।

अन्वयदीपिका

लघुवृत्तितया उदकस्य वेगेन शीघ्रगत्या बहिरन्तश्च भिदां गतम्। जर्जरीभूतमित्यर्थः। उपमालङ्कारः।। ५३।।

अनुशासतमिति। पराशरात्मजो वेदव्यासः तं युधिष्ठिरम् अभीयाय प्राप्तवान्। [किं लक्षणं तम्?] अनाकुलम् अनाविलम् असङ्कीर्णं यथा भवति तथा। अर्जुनाग्रजं भीमसेनम् इति पूर्वोक्तरीत्या अनुशासतम् उपदिशन्तं शिक्षयन्तम्। अर्जुनस्य अग्रजः भीमसेनः तम्। जक्षादित्वात् नुमभावः। [किं लक्षणम् अर्जुनाग्रजम्?] नयवर्त्माकुलम्। नीतिमार्गे व्याकुलं व्यग्रम् अरिनिकारक्षुब्धमित्यर्थः। [किं लक्षणः पराशरात्मजः?] उत्प्रेक्षते- राज्ञा युधिष्ठिरेण अभिवाञ्छितः आकाङ्क्षितः स्वयम् आगतोऽर्थ इव। स्वयं प्राप्तः मनोरथ इव। उत्प्रेक्षालङ्कारः।।५४।।

लघुटीका

एवं समये वर्तमाने पराशरात्मजः कृष्णद्वैपायनः तं युधिष्ठिरमभीयाय। अभिमुखम् आजगाम। [किं कुर्वाणं तम्] इति पूर्वोक्तेन प्रकारेणानुशासनं प्रतिबोधयन्तम्। किमित्यसावनुशिष्यते? इत्याह। न वर्त्मनि नीतिमार्गे आकुलमनिश्चितम् अर्जुनाग्रजं भीमम् इति। पूर्वोक्तेन अनुशासनं प्रतिबोधयन्तम्। सोऽपि किमिति तमनुशास्तीत्याह- अनाकुलं यथा भवति। नयवर्त्मनि निश्चितमित्यर्थः। [कीदृग् भगवान्] अभिवाञ्छितोऽभिलषितोऽर्थः स्वयं मूर्त्तिमानिव प्रीतिकारित्वात्। अनुशासतमिति नाभ्यस्ताच्छतुरिति'नुमभावः'। ५४।

जोनराजटीका

आकुलं क्षुभितं सन्तं भीमं नयवर्त्म नीतिशास्त्रमुपदिशन्तं राजानं व्यासः स्वयमुपागमत्। अनाकुलमित्युपदेशक्रियाविशेषणम्। नयवर्त्माकुलमित्येकं पदं वा। अत उत्प्रेक्षते- अभिलषितोऽर्थ उदयलक्षण इत्यर्थः। तेनैव राजर्षिणा पाण्डवानामुदयप्राप्त्यर्थमुपायस्य सन्दर्शनात्। स्वयं मूर्त इति वा व्याख्येयम्।।५४।।

मधुरैरवशान्निलम्भयन्नपि तिर्यञ्चि शमं निरीक्षितैः।
परितः पटु बिभ्रदेनसां दहनं धाम विलोकनक्षमम्।। ५५।।
सहसोपगतः सविस्मयं तपसां सूतिरसूतिरेनसाम्।
ददृशे जगतीभुजा मुनिः स वपुष्मानिव पुण्यसञ्चयः।। ५६।।

अन्वयदीपिका

अथ श्लोकद्वयेन मुनिं विशिनष्टि-मुनिं वर्णयति। **मधुरैरिति,सहसोपगतेति**। जगतीभुजा राज्ञा युधिष्ठिरेण सः मुनिः वेदव्यासः सविस्मयं यथा भवति तथा हृद्देशे दृष्टः। [सविस्मये हेतुमाह] [गर्भितं विशेषणमाह। किं लक्षणो मुनिः?] सहसा उपगतः अतर्कितमागतः। अकस्मादागत इत्यर्थः। [किं कुर्वन् सन्?] परितः सामस्त्यभावेन निरीक्षितैः अवलोकनैः तिर्यञ्चि मृगपक्ष्यादीनि व्याघ्रप्रभृतीनि शमं शान्तिं <नि> लम्भयन् प्रापयन्। सर्वेषां मृगव्याघ्रादीनां प्राणिनां निर्वैरत्वं कुर्वन्। तस्मिन्नागते व्याघ्रादयोऽपि शान्ताः बभूवुरिति भावः। तथा सम्मतिमाह-

स्वभाववैराण्यपि यान्ति शन्तिं विवेकिनो यत्र वसन्ति सन्तः।

लघुटीका

मधुरैरनुल्बणैर्निरीक्षितैर्दृष्टिपातैः कृत्वा अवशानि विनेतुमशक्यानि तिर्यञ्चि अपि शमं लम्भयन्। तथा एनसां पापानां दहनपटु निर्मलं धाम तेजो बिभ्रता। [क्व?] परितः समन्तात् विकस्वरम्। [पुनः किम्भूतम्?] धाम विलोकनक्षमम्। दर्शनयोग्यम्। एतेनान्यस्मादाग्नेयादेस्तेजसो वैलक्षण्यं पृथक्लक्षणत्वं तदीयस्य तेजस उक्तम्।५५।

एवंभूतो मुनिः सहसोपगतोऽतर्कितोपपन्नो जगतीभुजा युधिष्ठिरेण ददृशे दृष्टः। [कीदृङ्मुनिः] तपसां सूतिः प्रभवः। तथा एनसामसूतिः पापानामजन्मा। [क इव उत्प्रेक्षते?]

जोनराजटीका

मुधुरैराश्वासकारिभिर्निरीक्षितैर्वीक्षणैस्तिर्यञ्चि शमं लम्भयन् प्रापयन्। अवशानि शमस्यानायत्तानि तद्दृष्टिपातमात्रेणैव सिंहादीनामपि शमो जात इत्यर्थः। सामान्यग्रहणार्थस्तिर्यञ्चीति नपुंसकेन निर्देशः। तथैनसां पापानां पट्वत्यर्थं दहनं भस्मतापादकं च। विलोकने क्षमं योग्यं न तु तेजोऽन्तरवद्द्रष्टुमशक्यं धाम बिभ्रत्।।५५।।

राज्ञा स राजर्षिः साश्चर्यं वीक्षितः। यतः सहसाऽचिन्तितमुपागतः प्राप्तः। अचिन्तित गमने किमाश्चर्यमित्याह- तपसां सूतिरुत्पत्तिः। विपदामसूतिर्जन्माभावः। यथा हि मर्तुर्मरणमित्यत्र

अथोच्चकैरासनतः परार्ध्यादुद्यन् सधूतारुणवल्कलाग्रः।
रराज कीर्णाऽऽकपिशांशुजालः शृङ्गात्सुमेरोरिव घर्मरश्मिः।। ५७।।

अन्वयदीपिका

विवेकिनां चेतसि मत्सरश्चेद्धा! किं वा विधेयं तरणौ तमश्चेत्।। [पुनः किं लक्षणो मुनिः?] तपसां सूतिः प्रभवः प्रवर्तक इत्यर्थः। तथा तेनैव प्रकारेण एनसां पापानाम् आपदाम् असूतिः अप्रभवः निवर्तक इत्यर्थः। धाम बिभ्रत् स्वकीयं तेजो दधत्। [किं लक्षणं धाम?] पटु उज्ज्वलं निर्मलम्। एनसां पापानां दहनं निवर्तकम्। दह्यते अनेनेति दहनम्। विलोकनक्षमं दर्शनीयम्। वह्न्यादिविलक्षणमिति भावः। [किं लक्षणैः निरीक्षितैः?] मधुरैः मनोहरैः। [किं लक्षणानि तिर्यञ्चि?] अवशानि। न विद्यते वशः आयत्तत्वं वशता येषां तानि अवशानि प्रतिकूलानीत्यर्थः। 'वशमायत्ततायाञ्चे'ति **विश्वः**। [पुनः किं लक्षणो मुनिः उत्प्रेक्ष्यते?] वपुष्मान् मूर्तीभूतः पुण्यसञ्चय इव। उपागतः पुण्यराशिरिव। उत्प्रेक्षालङ्कारः।। ५५-५६।।

अथोच्चकैरिति। अथानन्तरं मुनिदर्शनानन्तरं सः युधिष्ठिरः रराज। शुशुभे।[किं कुर्वन् सन्?] आसनतः उद्यन् सिंहासनात् उत्तिष्ठन्। [किं लक्षणात् आसनतः?] उच्चकैः उन्नतात्। परार्ध्यात् श्रेष्ठात्। [अत एव किं लक्षणः सः?] विधूतारुणवल्कलाग्रः। विधूतानि

लघुटीका

वपुष्मान् मूर्तिमान् पुण्यसञ्चय इव पुण्यराशिरिव। शरीरसहितसुकृतसम्भारतुल्य इव। [कथं ददृशे?] सविस्मयं साश्चर्यम् अतर्कितमागतत्वात् सविस्मयं ददृशे। ५६।

तं भगवन्तं सहसा आगतं दृष्ट्वा स राजा उच्चकैरुच्चैस्तरात्तथा परार्ध्यान्महामूल्यात्सुवर्णमयादासनतः आसनादुद्यन् उत्थिष्ठन् सन् रराज शुशुभे। [किं भूतः?] धूतं चलितमरुणं रक्तं वल्कलाग्रं यस्य स तथा। [क इव] घर्मरश्मिरिव। यथा सुमेरोः शृङ्गाच्छिखरादुद्यन्

जोनराजटीका

हि मर्तुर्मरणं सम्पादयतीति लक्ष्यते तथेहापि - सूतिशब्देन सूतिं करोतीति लक्ष्यते। क्रियातत्कर्त्रोरभेदोपचारात्। अत्र एवोत्प्रेक्षते- वपुष्मान्मूर्तः पुण्यसञ्चय इव।।५६।।

अथ ऋषिदर्शनान्तरं परार्ध्याच्छुचेरुन्नतादासनादुदतिष्ठंस्तथा धूतं कम्पितमरुणं काषायत्वाद्वल्कलाग्रं येन सः। ऋषेः रजःसम्पर्कशङ्कयेति भावः। स रराज यथा मेरुशृङ्गादुद्यन्क्षिप्तलोहितातपोऽर्कः। भाविन्या उदयप्राप्तेरुपक्षेपार्थमुद्यन्नादित्य उपमानतया निबद्धः।५७।

अवहितहृदयो विधाय सोऽर्हामृषिवदृषिप्रवरे गुरूपदिष्टाम्।
तनुगतमलञ्चकार पश्चात्प्रशम इव श्रुतमासनं नरेन्द्रः।। ५८।।

अन्वयदीपिका

अरुणानि वल्कलाग्राणि यस्य सः विधूतारुणवल्काग्रः। [क इव?] घर्मरश्मिरिव। यथा घर्मरश्मिः सूर्यः राजते तद्वदित्यर्थः। [किं कुर्वन् सन्?] सुमेरोः शृङ्गात् उद्यन् सन् उत्तिष्ठन् सन्। [किं लक्षणः घर्मरश्मिः?] कीर्णाऽऽकपिशांशुजालः। कीर्णं प्रसृतम् आकपिशम् अंशुजालं किरणसमूहो यस्य सः कीर्णाकपिशांशुजालः। उपमा।। ५७।।

अविहितेति। स नरेन्द्रो युधिष्ठिरः ऋषिवत् आसनम् अलञ्चकार। अशोभयत्। [किं कृत्वा?] ऋषिप्रवरे मुनिश्रेष्ठे अर्हां पूजां विधाय कृत्वा पश्चात्। [किं लक्षणां पूजाम्?] गुरूपदिष्टां शास्त्रीयां शास्त्रोक्तामित्यर्थः। [पुनः किं भूताम्?] ऋषिवत् ऋषिमर्हतीति ऋषियोग्यम्। [किं लक्षणः सः?] अवहितहृदयः। अप्रमत्तचित्तः। [किं लक्षणम् आसनम्?] तदनुमतम्। तेन ऋषिणा व्यासेन अनुमतम् अनुज्ञातम्। दत्ताज्ञमित्यर्थः। [कः? किमिव?] प्रशमः श्रुतमिव। यथा प्रशमः शान्तिः श्रुतं शास्त्रं श्रवणम् अलङ्करोति। मुनेः आज्ञयोपविष्टवानित्यर्थः।। ५८।।

लघुटीका

उदयमानो घर्मांशुः सूर्यो राजते। [कीदृक्] कीर्णं क्षिप्नम् आकपिशमीषत्पाटलम् अंशुजालं येन स तथा। उच्चकैः परार्ध्यादित्यासनविशेषणम्। 'परार्ध्यमुत्तममनर्घ्यम्'।।।५७।।

स राजा ऋषिप्रवरे ऋषिपुङ्गवे अर्हां विधाय ऋषिवत्पूजामर्घादिकां विधाय तेन स भगवतः अनुज्ञातमत्र उपविशेत्यनुज्ञातमासनं पश्चादलञ्चकार। आसनं भेजे। [किं भूतः] अवहितं सावधानं तदेकाग्रं हृदयं यस्य सः। [तथा कीदृशीम् अर्हां?] गुरूपदिष्टां गुरुणा पुरोधसा उपदिष्टां कथिताम्। [किमिव?] प्रशमः श्रुतमिव। यथा प्रशमः शान्तता तमधीतमलङ्करोति।५८।

जोनराजटीका

सावधानचित्तः स मुनिरिव न तु राजेव। राजर्षौ पुरोहितोपदिष्टं पूजां कृत्वा युधिष्ठिरो राजर्षिसमादिष्टमासनं राजर्षिनिवेशनात्पश्चादशोभयत् यथा विनयः शास्त्रम्।।५८।।

व्यक्तोदितस्मितमयूखविभासितौष्ठ-
स्तिष्ठन्मुनेरभिमुखः स विकीर्णधाम्नः।
तन्वन्तमिद्धमभितो गुरुमंशुजालं
लक्ष्मीमुवाह सकलस्य मृगाङ्कमूर्तेः।। ५९।।

अन्वयदीपिका

व्यक्तोदितेति। सः नरेन्द्रो युधिष्ठिरः मृगाङ्कमूर्तेः चन्द्रमसः लक्ष्मीं शोभाम् उवाह वहति स्म। मृगाङ्कः मूर्तौ यस्य सः। तस्य। [किं लक्षणस्य मृगाङ्कमूर्तेः?] सकलस्य सम्पूर्णस्य। षोडशकलात्मकस्य। [पुनः किं लक्षणस्य मृगाङ्कमूर्तेः?] गुरुं बृहस्पतिम् अभिमुखं सम्मुखं तिष्ठतः वर्तमानस्य स्थितस्य। [किं लक्षणं गुरुम्?] इद्धं दीप्तम् अंशुजालम् अभितः सर्वत्र वितन्वन्तं विस्तारयन्तम्। [किं लक्षणो नरेन्द्रः?] मुनेः व्यासस्य अभिमुखं सम्मुखं तिष्ठन् वर्तमानः। [किं लक्षणस्य मुनेः?] विकीर्णधाम्नः। विकीर्णं विस्तारितं धाम तेजो येन असौ विकीर्णधामा। तस्य। [किं लक्षणस्य मृगाङ्कमूर्तेः?] विकीर्णधाम्नः। [किं लक्षणः नरेन्द्रः?] व्यक्तोदितस्मितयूखविभावितौष्ठः। व्यक्तोदितैः स्फुटोद्गतैः स्मितमयूखैः

लघुटीका

स राजा मुनेरभिमुखस्तिष्ठन् स मृगाङ्कमूर्तेः चन्द्रस्य लक्ष्मीं शोभामुवाह दधौ। [किं भूतः?] व्यक्तं स्फुटम् उदिताः प्रसूताः ये स्मितस्य मयूखाः हसितस्यांशवः तैर्विभासितौ धवलीकृतौ ओष्ठौ यस्य सः। व्यक्तोदितस्मितमयूखविभासितौष्ठः। [किं भूतस्य मुनेः?] विकीर्णं विक्षिप्तं धाम तेजो येन स विकीर्णधामा तस्य विकीर्णधाम्नः। [कीदृशस्यमृगाङ्कमूर्तेः?] गुरुं बृहस्पतिमभितः बृहस्पतेः पुरस्तादुपविष्टस्य चन्द्रस्य सम्बन्धिनीं शोभां बभारेत्यर्थः। [कीदृशं गुरुम्?] इद्धं दीप्तम् अंशुजालम्। तन्वन्तं विस्तारयन्तम्। मृगाङ्कः चिह्नं यस्याः

जोनराजटीका

राजर्षेः पूजां कुर्वतो राज्ञो हर्षोत्पत्तिद्वारेण भक्तिमाह - स्फुरत्तेजसो मुनेरग्रे तिष्ठन्नत एवानन्दवशात्प्रकटोत्पन्नहसितांशुशोभिताधरः स राजा सम्पूर्णस्य चन्द्रस्य शोभां प्राप।

अन्वयदीपिका

हास्यकिरणैः विभासितौ शोभान्वितौ ओष्ठौ यस्य सः। व्यक्तं यथा स्यात्तथा उदितं यत् स्मितं मन्दहासस्तस्य मयूखैः किरणैः विभासितः ओष्ठो यस्य सः। अभितः परित इत्यादिना द्वितीया। अभितोऽभिमुखं तिष्ठत इति शेषः।। ५९।।

।। इति श्रीनृसिंहविरचितायाम् अन्वयदीपिकायां किरातार्जुनीयटीकायां द्वितीयस्सर्गः समाप्तः ।।

लघुटीका

सा मृगाङ्कमूर्तिः। मृगाङ्कमूर्तेः बिम्बं यस्य मृगाङ्कमूर्तिः। तस्य स मृगाङ्कमूर्तेः 'अभितः परितः'(वा) इत्यादिना गुरुमिति द्वितीया।५९।

।। इति प्रकाशवर्षकृतौ किरातार्जुनीयमहाकाव्यलघुटीकायां द्वैपायनागमनो नाम द्वितीयः सर्गः।।

जोनराजटीका

[कीदृशस्य ?] गुरुं बृहस्पतिमभितो वर्तमानस्य इद्धमंशुनिकरं विस्तारयन्तम्। ऋषिर्बृहस्पतेरुपमानं, धाम्नोंऽशवः, राज्ञश्चन्द्रः, हासः पूर्णत्वस्य। पूर्णत्वे दीप्तिमयत्वादिति भद्रम्।।५९।।

।। इति श्रीजोनराजकृतायां किरातार्जुनीयटीकायां द्वितीयः सर्गः।।

***

[अथ तृतीयः सर्गः]

ततः शरच्चन्द्रकराभिरामैरुत्सर्पिभिः प्रांशुमिवांशुजालैः।
बिभ्राणमानीलरुचं पिशङ्गीर्जटास्तडित्वन्तमिवाम्बुवाहम्।। १।।

अन्वयदीपिका

तत इति। त्रिभिः श्लोकैः मुनिं विशिनष्टि। वर्णयतीत्यर्थः। ततस्तदनन्तरम् उपवेशानन्तरं धर्मात्मजो युधिष्ठिरः मुनिं वेदव्यासं प्रति वक्ष्यमाणं वाक्यम् आबभाषे उवाचेति चतुर्थश्लोकेनान्वयः। [किं लक्षणः धर्मात्मजः?] तदभ्यागमने हेतुं कारणं परीप्सुः जिज्ञासुः। वेदव्यासस्य यदागमनं तस्मिन् आगमने आगमनविषये कारणं ज्ञातुमीप्सुरित्यर्थः। [किं लक्षणं मुनिम्?] सुखोपविष्टम्। सुखेन स्थितमित्यर्थः। उत्प्रेक्षते- अंशुजालैः स्वकीयकिरणसमूहैः प्रांशुम् उन्नतं सन्तमिव स्थितमिव। [किं लक्षणैः अंशुजालैः?] शरच्चन्द्रकराभिरामैः आह्लादकारकैः। शरदि चन्द्रः शरच्चन्द्रः। शरच्चन्द्रस्य कराः किरणाः शरच्चन्द्रकराः। शरच्चन्द्रकरा इव

लघुटीका

ततोऽनन्तरं धर्मात्मजो युधिष्ठिरः सुखोपविष्टं सुखासीनं मुनिमाबभाषे उवाच। [किमर्थमाबभाषे?] तदभ्यागमने तस्य मुनेरभ्यागमने हेतुं परीप्सुः जिज्ञासमानः। [किं भूतं मुनिम्?] शरदि चन्द्रस्य करा इवाभिरामैः शरदिन्दुमयूखसुन्दरैः सान्द्रैरुत्सर्पिभिः ऊर्ध्वं प्रसृतैरंशुजालैः। अंशुसमूहैः प्रांशुमिव उच्चैस्तरमिव लक्ष्यमाणम्। पुनः कीदृशम्? आनीला श्यामा रुक् यस्य स आनीलरुक्। तं तथा। पुनरपि कीदृशम्? पिशङ्गीर्लोहिनीः, पीता जटा दधानम्। अत एव किं भूतम्? तडित्वन्तम्, विद्युन्मालायुक्तम्। अम्बुवाहमिव जलधरमिवाम्बुवाहः श्याम एव भवति।१।

जोनराजटीका

धर्मात्मज इत्यन्तं वाक्यम्। आह्लादकत्वस्वभावात् शरदिन्दुसुन्दरैरुत्सर्पिभिरूर्ध्वगमनशीलैः। तेजस ऊर्ध्वगमनस्वभावात्। अंशुजालैः करणभूतैरुन्नतमिव। अथवांऽशुजालैरिवोन्नतमिति योज्यम्। आनीलरुचं तपः क्लेशवशादिति भावः। तथा निःस्नेहत्वात्पिशङ्गीर्जटा दधतम्। अत एव नित्यं विद्युत्सहितं मेघमिवेति कल्पितोपमा। तडिद्वन्तमिति नित्ययोगे मतुपो विधानात्।।१।।

प्रसादलक्ष्मीं दधतं समग्रां वपुःप्रकर्षेण जनातिगेन।
प्रसह्य चेतःसु समासजन्तमसंस्तुतानामपि भावमार्द्रम्।। २।।

अन्वयदीपिका

अभिरामाः तैः। अभिरामैः मनोहरैः। उत्सर्पिभिः। उत् ऊर्ध्वं सर्पन्ति ते उत्सर्पन्तः तैः उत्सर्पिभिः। ऊर्ध्वं प्रसारिभिः। [पुनः किं लक्षणं मुनिम्?] आनीलरुचम्। आनीला कृष्णा रुक् कान्तिर्यस्य सः आनीलरुक्। तम्। कृष्णवर्णमित्यर्थः। [पुनः किं लक्षणम्?] बिभ्राणं दधानम्। [किं लक्षणाः जटाः?] पिशङ्गीः पिङ्गलवर्णाः। मुनिम् उत्प्रेक्षते- अम्बुवाहमिव। जलदमिव स्थितम्। [किं लक्षणम् अम्बुवाहम्?] तडित्वन्तम्। विद्युत्सहितं समानम्। अर्थोत्प्रेक्षा।। १।।

प्रसादेति। [पुनः किं लक्षणं मुनिम्?] समग्रां सम्पूर्णां प्रासादलक्ष्मीं दधतं धारयन्तम्। प्रसादः सौम्यता। प्रसादस्य लक्ष्मीः प्रसादलक्ष्मीः। तां प्रसादलक्ष्मीं सम्पदं दधानम्। वपुः प्रकर्षेण आकारसम्पदा आकृतिसौन्दर्येण असंस्तुतानामपि अपरिचितानामपि जनानां मनस्सु चेतस्सु आर्द्रं भावं स्नेहभावं चित्ताभिप्रायं प्रसह्य बलात् समासजन्तम्। कुर्वन्तमित्यर्थः। लगयन्तम्। किं वक्तव्यम् ?। प्रसन्नाकारेण सर्वः स्निह्यतीति भावः। [किं लक्षणेन वपुःप्रकर्षेण?] जनातिगेन। जनम् अतिगच्छतीति जनातिगः। तेन जनातिगेन लोकातिशयिना।। २।।

लघुटीका

किं भूतम्? समग्रां परिपूर्णां प्रसादलक्ष्मीं मैत्रीं शोभां दधतं धारयन्तम्। किं भूतम्? जनातिगेन सकललोकातिशायिना वपुःप्रकर्षेण आकारविशेषेण कारणभूतेन असंस्तुतानामपि अपरिचितानामपि अज्ञातपूर्वाणामपि चेतःसु हृदयेषु प्रसह्य बलादार्द्रं भावं विनयनप्रभावम् आसजन्तम् उत्पादयन्तम्। एतदुक्तं भवति-येऽपि हि भगवान्द्वैपायनोऽयमिति न जानते तेषामपि तदीयं वपुर्विशेषमेव पश्यतां कोऽप्ययमिति भक्तिप्रवणं मनो भवति।२।

जोनराजटीका

लोकातिशायिनाऽऽकारविशेषेण पूर्णां प्रसादश्रियं दधतं न त्वन्यमुनिवद्दुरीक्ष्यत्वम्। ते हि तपःक्लिष्टत्वाद्दुरीक्ष्याः। तथार्द्रभावतायामपरिचितानां चेतस्स्वार्द्रभावं सौम्यत्वं हठात्समासजन्तं संक्रामयन्तम्। तद्दर्शनाद्धिंस्त्रैरपि प्रसाद एवाशंसित इत्यर्थः।।२।।

अनुद्धताकारतया विविक्तां तन्वन्तमन्तः करणस्य वृत्तिम्।
माधुर्यविस्रम्भविशेषभाजा कृतोपसम्भाषमिवेक्षितेन।। ३।।

अन्वयदीपिका

अनुद्धतेति। [पुनः किं लक्षणं मुनिम्?] अनुद्धताकारतया शान्ताकारतया लिङ्गेन अन्तः करणस्य चेतसः वृत्तिं तन्वन्तं द्योतयन्तम्। अनुद्धतः सौम्यः आकारः आकृतिर्यस्यासौ अनुद्धताकारः। अनुद्धताकारस्य भावः अनुद्धताकारता। तया। आकार एव तस्य चित्तस्य शुद्धिं कथयति। ईक्षितेनैव दर्शितेनैव कृतोपसम्भाषम्। कृता उपसम्भाषा भाषणं येन सः कृतोपसम्भाषः। तम्। उत्प्रेक्षते- दृष्टिविशेषेणैव <कृतो>पसम्भाषमिव स्थितः। [किं लक्षणेन ईक्षितेन?] माधुर्यविस्रम्भविशेषभाजा। माधुर्यं स्वभावसौम्यत्वम्। विस्रम्भो विश्वासः। माधुर्यञ्च विस्रम्भश्च माधुर्यविस्रम्भौ। तयोः विशेषः अतिशयः। तं भजतीति माधुर्यविस्रम्भविशेषभाक्। तेन माधुर्यविस्रम्भविशेषभाजा। [किं लक्षणां वृत्तिम्?] पूतां शान्तामित्यर्थः। "विविक्तौ पूतविजना"**वित्यमरः।** स्रभि विश्वासे।। ३।।

लघुटीका

पुनः किं कुर्वन्तम्? न उद्धतो गर्विष्ठ आकारो यस्य स तथा। अनुद्धताकारस्य भावः अनुद्धताकारता। तया अनुद्धताकारतया सौम्यरूपतया विविक्तां वीतरागाम् अन्तःकरणस्य मनसो वृत्तिं स्वभावं तन्वन्तं प्रकटयन्तम् इति सौम्याकारत्वात् रागद्वेषादिरहितहृदयोऽयमिति प्रतीयते इत्यर्थः। माधुर्यं सौम्यता। विस्रम्भो विश्वासः। तयोर्विशेषोऽतिशयः। तं भजते इति तेन माधुर्यविस्रम्भविशेषभाजा। ईक्षितेन अवलोकितेन। कृतोपसम्भाषमिव। कृत उपसम्भाषः कुशलप्रश्नो येन स तथा तम्। सौम्यविश्वासयोरतिशययुक्तेन अवलोकितेन विहितकुशलप्रश्नमिव। ३।

जोनराजटीका

न केवलमाकारेणैव प्रसन्नतां दधतं यावदनुद्धताकारतया सौम्यमूर्तित्वेन मनोवृत्तिं विविक्तां निष्पापां द्योतयन्तम्। आकारस्य प्रसादक्रौर्ययोर्मनोऽनुवर्तित्वात्। माधुर्येण सौम्यत्वेन विस्रम्भविशेषं विश्वासाधिक्यं भाजयतोत्पादयता। वीक्षणेन कृतकुशलप्रश्नमिव। कुशलप्रश्नेन यावान्विश्वासो जायते तावांस्तद्दृष्टिपातमात्रेणेत्यर्थः।।३।।

धर्मात्मजो धर्मनिबन्धिनीनां प्रसूतिमेनःप्रणुदां श्रुतीनाम्।
हेतुं तदभ्यागमने परीप्सुः सुखोपविष्टं मुनिमाबभाषे।। ४।।(कलापकम्)
अनाप्तपुण्योपचयैर्दुरापा फलस्य निर्धूतरजाः सवित्री।
तुल्या भवद्दर्शनसम्पदेषा वृष्टेर्दिवो वीतबलाहकायाः।।५।।

अन्वयदीपिका

धर्मात्मज इति। श्रुतीनां वेदानां प्रसूतिं प्रभवम्। आदिकारणम्। [किं लक्षणानां श्रुतीनाम्?] एनः प्रणुदाम्। पापच्छिदाम्। क्विप्। धर्मनिबन्धिनीनाम्। धर्मं निबध्नन्तीति धर्मनिबन्धिन्यः। तासां धर्मनिबन्धिनीनाम्। अग्निहोत्रादिधर्मप्रतिपादिकानाम्। "श्रुतिः स्त्री वेद आम्नाय" **इत्यमरः**। परीप्सुः जिज्ञासुः। आप्नोतेः सन्नन्तादुप्रत्ययः।। ४।।

किमुवाचेत्याह। **अनाप्त** इति। हे मुने! एषा भवद्दर्शनसम्पत् भवतो <दर्शनरूप> सम्पत्तिः<तस्याः>लाभः दिवः गगनस्य अन्तरिक्षस्य वृष्टितुल्या पर्जन्यसमानाऽभवत्। भवतः दर्शनं भवद्दर्शनम्। भवद्दर्शनस्य सम्पत् भवद्दर्शनसम्पत्। [किं लक्षणायाः दिवः?]

लघुटीका

पुनः कीदृशम्? एनः पापं प्रणुदन्तीति हरन्तीति एनः प्रणुदः। तासां तथा। धर्मं विधिविशेषं निबध्नन्तीति उपदिशन्तीति धर्मनिबन्धिन्यः, तासाम् एवंविधानां श्रुतीनां वेदानां प्रसूतिम् उत्पत्तिस्थानम्। विधिविशेषो धर्म उच्यते। प्रसूयतेऽस्मादिति प्रसूतिः।४।

किमुवाच इत्याह- हे भगवन् ! एषा भव दृर्शनसम्पत्। भवतो दर्शनं भवद्दर्शनम्। तदेव सम्पत् विभूतिः। वीतबलाहकाया दिवो निरभ्राकाशाद्या वृष्टिः तस्याः तुल्या सदृशा।

जोनराजटीका

धर्मं निबन्धयन्ति व्यवस्थापयन्ति तथैनःपापं प्रणुदन्ति तासां श्रुतीनां प्रसूतिमाविष्करणे हेतुं तथा सुखं यथा भवति तथोपविष्टं मुनिं युधिष्ठिरोऽवदत्। यतस्तस्य मुनेरभ्यागमने हेतुं परीप्सुः प्राप्तुकामः।।४।।

एषा भवतो दर्शनलक्ष्मीस्तुल्या भवति। कस्याः? वीतबलाहकाया दिवो वृष्टेः। निर्मेघादाकाशाद्वर्षणस्याचिन्तितोपनतत्वादिति भावः। सादृश्यं विशेषणद्वारेणापि दर्शयति। अनाप्तः पुण्योपचयो यैरपुण्यवद्भिर्दुर्लभा तथा फलस्य जयस्य शाल्यादेश्च सवित्र्युत्पादयित्री। निर्धूतं रजो धूलिः रजोगुणश्च यया।।५।।

अद्य क्रियाः कामदुघाः क्रतूनां सत्याशिषः सम्प्रति भूमिदेवाः।
आसंहृतेरस्मि जगत्सु जातस्त्वय्यागते यद्बहुमानपात्रम्।। ६।।

अन्वयदीपिका

वीतबलाहकायाः। वीताः निर्गताः बलाहकाः मेघाः यस्याः सा वीतबलाहका। तस्याः वीतबलाहकायाः। वारि वहन्ती बलाहका मेघाः। मेघवर्षणवदतर्कितोपपन्नं युष्मद्दर्शनं सर्वथा कस्यचित् श्रेयःकारणमित्यर्थः। अस्माकमिति शेषः। [किं लक्षणा भवद्दर्शनसम्पत्?] अनाप्तपुण्योपचयैः पुरुषैः दुरापा दुष्प्रापा। अनाप्तः अकृतः पुण्योपचयो धर्मसङ्ग्रहो यैस्ते अनाप्तपुण्योपचयाः तैः। अनाप्तपुण्योपचयैः। अकृतपुण्यसङ्ग्रहैः पुरुषैः दुर्लभेत्यर्थः। कृतपुण्यैरेव पुरुषैः प्राप्यते। [अपरा किं लक्षणा भवद्दर्शनसम्पत्?] फलस्य भाविनः फलस्य सवित्री श्रेयस्करी। निर्धूतरजाः। निर्धूतः रजः रजोगुणो यया सा निर्धूतरजाः। अन्या फलसवित्री सरजस्का भवति। फलपुष्पनिदानम्। तच्च रजः। "रजो रजोगुणे धूलौ परागावर्तयोरपी"ति **विश्वः**।।५।।

पुनः किमुवाचेत्याह। **अद्य क्रिया** इति। हे मुने! अद्य क्रतूनां यागानां क्रियाः अनुष्ठानानि कामदुघाः जाताः। नः अस्माकमिति शेषः। कामान् अभिलाषान् दुहन्तीति

लघुटीका

भवतो दर्शनमिति कर्मणि षष्ठी। कीदृक् दर्शनसम्पत् वृष्टिश्च? उभयं विशिनष्टि। अनाप्तपुण्योपचयैर्दुरापा। अनुपचितसुकृतसम्भारैः पुरुषैः दुर्लभा तथा निर्धूतरजाः। निर्धूतमपनीतं राजोगुणविशेषो धूलिश्च यया सा तथा। पुनश्च कीदृक्? फलस्य स्वर्गापवर्गादेर्धान्यादेश्च सवित्री जनयित्री।५।

अद्य क्रियाः कामदुघाः मनोवाञ्छितदायिन्योऽद्य सञ्जाताः इत्यद्य ज्ञातम्। भूमिदेवा ब्राह्मणाश्च सम्प्रति इदानीं सत्याशिषः सत्याशीर्वचनाः। त्वय्यागतेऽस्मि अहम् आसंहृतेः आसंहारकालात् कल्पन्ताद्यावत्। यत् जगत्सु त्रिजगति बहुमानपात्रं बहुगौरवपात्रं जातः।

जोनराजटीका

क्रतूनां राजसूयादीनां क्रिया अनुष्ठानानि कामदुघा अभिलषितप्रदा इति यत्तदद्य भवति। जातमितिवा लिङ्गपरिणामः। भूमिदेवा ब्राह्मणाः सत्याशिष इति यत्तत्संप्रति भवति। जातं वा प्रादुर्भूतम्। यतः आसंसारं यावदहं भुवनेषु बहोर्मानस्यादरस्य पात्रं स्थानं

श्रियं विकर्षत्यपहन्त्यघानि श्रेयः परिस्नौति तनोति कीर्तिम्।
सन्दर्शनं लोकगुरोरमोघं तवात्मयोनेरिव किं न दत्ते।। ७।।

अन्वयदीपिका

कामदुघाः फलप्रदाः। हे मुने ! अद्य इदानीं भूमिदेवाः ब्राह्मणाः सत्याशिषः जाताः। सत्या तथ्या आशीः आशीर्वादो येषां ते सत्याशिषः। ब्राह्मणाशिषोऽद्य फलिताः। "द्विजात्यग्रजन्मभूमिदेववाडवाः। विप्राश्च ब्राह्मणा **इत्यमरः**। यस्मात्कारणात्। अस्मीति अहम्। आ संहृतेः आसंसारं जगत्सु लोकेषु बहुमानपात्रं जातः। बहुमानस्य मान्यतायाः आधारत्वम् आश्रयत्वं प्राप्तः। संहृतेः आ इति आसंहृतिः। तस्याः आ संहृतेः। आसंसारम्। यावत् संसारमित्यर्थः। [कस्मिन् सति?] मुनौ त्वयि आगते सति। मां प्रति इति शेषः। अस्मीत्यहमर्थे निपात्यते। आङ्-मर्यादाभिविधौ च। सकलसत्कर्मभूतं त्वदागमनं येन मे जगन्मान्यते इति भावः।। ६।।

श्रियमिति। हे मुने! लोकगुरोः तव अमोघं सफलं सन्दर्शनं किं न धत्ते? किं किं न करोति? अपि तु सर्वं करोतीत्यर्थः। [तत् किं किं? तदाह] - श्रियं लक्ष्मीं विकर्षति।

लघुटीका

यज्ञानां ब्राह्मणाशिषां चैतत्फलं यदहो! पुण्यभाक् युधिष्ठिरो यस्य स्वयं भगवान् कृष्णद्वैपायनो गृहमागमदिति। एवंविधायाः प्रशस्यतायाः भाजनतां गतोऽहमायुगान्तात्। कामम् अभिमतं फलं दुहन्ति पूरयन्तीति कामदुघाः। 'दुहेः कब्घश्च' [३-२-७०]।६।

किं किं न ददाति अपि तु सर्वमेव ददातीत्यर्थः। तथाहि - तव दर्शनं श्रियं विकर्षति लक्ष्मीम् आनयति, अघानि पापानि अपहन्ति, स्फोटयति, श्रेयः परिस्नौति कल्याणमावहन्ति, कीर्तिं तनोति विस्तारयति। भगवान् अस्य गृहमागत इति कीर्तिं विस्तारयति।

जोनराजटीका

जातः। एतदेव हि यज्ञानुष्ठानस्य ब्राह्मणाशिषां च फलं यन्मानलाभः। त्वदागमनेन पापक्षये जाते सति शत्रुक्षयस्यावश्यं भावित्वान्मानप्राप्तिर्भविष्यति इति भावः। मया यज्ञेषु तर्पिता द्विजातयो यामाशिषमकुर्वंस्तत्फलमद्यैव जातमित्यर्थः।।६।।

मानोत्पत्तिकारणं स्फुटयितुमाह - आत्मयोनेर्ब्रह्मण इव लोकानां गुरोस्तव दर्शनं किं न दत्ते। सर्वमेव ददातीत्यर्थः। यतोऽमोघं सफलम्। तथा हि त्वद्दर्शनं लक्ष्मीं शत्रुभ्य आकर्षति पापानि हन्ति, शुभं दत्ते, यशो विस्तारयति। लोकद्वयेऽपि शुभावहमित्यर्थः।।७।।

श्च्योतन्मयूखेऽपि हिमद्युतौ मे न निर्वृतं निर्वृतिमेति चक्षुः।
समुज्झितज्ञातिवियोगखेदं त्वत्सन्निधावुच्छ्वसतीव चेतः।। ८।।

अन्वयदीपिका

आकृष्य ददाति। अघानि पातकानि दुःखानि अपहन्ति। दूरीकरोति। नाशयतीत्यर्थः। "अंहो दुःखव्यसनेष्वघमि"**त्यमरः**। तथा श्रेयः पुरुषार्थं परिस्नौति स्रवति। कीर्तिं यशश्च तनोति। विस्तारयति। किं बहुना सर्वं सम्पादयतीत्यर्थः। [कस्येव?] आत्मयोनेरिव। यथा आत्मयोनेः ब्रह्मणः सन्दर्शनं सर्वसम्पत्साधकं भवति।। ७।।

पुनः किमुवाचेत्याह। **श्च्योतदि**ति। हे मुने! हे भगवन्! मे चक्षुः दृष्टिः त्वत्सन्निधौ तव समीपे निर्वृतिं सुखम् एति प्राप्नोति। [किं लक्षणं चक्षुः?] हिमद्युतौ चन्द्रमसि न निर्वृतम् अनवाप्तसुखम्। न अवाप्तं सुखं येन तत् अनवाप्तसुखम्। [किं लक्षणे हिमद्युतौ?] श्च्योतन्मयूखेऽपि सुधास्राविकरेऽपि। श्च्योतन्तः सुधास्राविणः मयूखाः किरणाः यस्य असौ श्च्योतन्मयूखः।

लघुटीका

कस्येवऽऽत्मयोनेरिव- स्वयंभुव इव। यथा आत्मयोनेर्जगद्गुरोः सन्दर्शनं किं न धत्ते? अपि तु सर्वमपि ददातीत्यर्थः। एतत्पूर्वोक्तं करोति। अमोघ इति न्यङ्कादित्वात् <न्यङ्क्वादीनां च-७.३.५३>हस्य घः।७।

वान्धवविप्रयोगात् दुःखवशाद्यच्चक्षुश्च्योतन्मयूखेऽपि हिमद्युतौ प्रसरकिरणेऽपि शशिनि निर्वृतं न प्रीतम्। तच्चक्षुरिदानीं निर्वृतिमेति, आह्लादं भजते। तथा च त्वत्सन्निधौ चेत् उच्छ्वसतीव विकासमिव भजते। [किं भूतम्?] समुज्झितः त्यक्तो ज्ञातीनां बान्धवानां वियोगस्य खेदो येन तत् तथा। त्वत्सन्निधौ बान्धववियोगखेदमपि चेतो न भजते, प्रत्युत

जोनराजटीका

न केवलं त्वद्दर्शनेन मानोत्पत्तिर्यावत्सुखमपीति दर्शयितुमाह- श्च्योतन्तः सुधास्राविणो मयूखा यस्य तस्मिंश्चन्द्रेऽपि न निर्वृतमप्राप्तसुखं नेत्रमद्य सुखं लभते। यतः समुज्झितज्ञातिवियोगखेदं त्यक्तबन्धुविरहग्लानि। यतस्त्यक्तबान्धवविश्लेषशोकं चित्तं त्वत्सन्निधावुच्छ्वासमिव प्राप्नोति। सर्वबन्धुसंयोगाद्भवद्दर्शनमधिकमित्यर्थः। न केवलं शरीरेणैवाद्य सुखं यावच्चेतसाऽपीत्यर्थः।।८।।

निरास्पदं प्रश्नकुतूहलित्वमस्मास्वधीनं किमु निःस्पृहाणाम्।
तथापि कल्याणकरीं गिरं ते मां श्रोतुमिच्छा मुखरीकरोति।। ९।।

अन्वयदीपिका

तस्मिन् श्च्योतन्मयूखे। हे स्वामिन्! तथा मे चेतः अन्तःकरणं त्वत्सन्निधौ तव समीपे उच्छ्वसतीव। उच्छ्वासं प्राप्नोतीव। प्राणितीवेत्युत्प्रेक्षा। [किं लक्षणं चेतः?] समुज्झितज्ञातिवियोगखेदम्। समुज्झिताश्च ते ज्ञातयश्च समुज्झितज्ञातयः। तेषां वियोगः तेन खेद वियोगखेदो वा येन तत् त्यक्तबन्धुविरहदुखितम्। खिन्नमित्यर्थः। "सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः" **इत्यमरः**।। ८।।

निरास्पदमिति। हे मुने! प्रश्नकुतूहलित्वं निरास्पदम्। आश्रयरहितं निराश्रयम्। आगमनप्रयोजनप्रश्नो निरास्पदमित्यर्थः। प्रश्ने कुतूहलमस्यास्तीति प्रश्नकुतूहली प्रश्नकुतूहलिनः भावः प्रश्नकुतूहलित्वम्। [निरास्पदे हेतुमाह] - यस्मात्कारणात् निस्स्पृहाणाम्। निर्गता स्पृहा येभ्यः ते। तेषां मुनीनाम् अस्मासु अस्मत्सदृशेषु जनेषु अधीनम् आयत्तं किमु? न किमपीत्यर्थः। न किञ्चिदस्माल्लभ्यमित्यर्थः। आधारत्वविवक्षायां सप्तमी। यद्यप्येवं तथापीच्छा

लघुटीका

चक्षुराह्लादं भजते। चेतश्च उच्छ्वासं भजते। श्च्योतन्तः प्रसरन्तो मयूखा यस्य सः श्च्योतन्मयूखः शशी। तत्र विषयसप्तमी। हिमद्युतौ श्च्योतन्मयूखेऽपि सतीति वा। भावेऽपि सप्तमी।८।

किमागमनप्रयोजनम् इति एवंविधं प्रश्नकुतूहलित्वम्। प्रश्नाय कुतूहलयुक्तत्वम्। निरास्पदं निर्विषयम्। भगवदागमनप्रयोजनप्रश्नं प्रति कुतूहलमेव अस्माकं नास्तीत्यर्थः। कथमित्याह- निःस्पृहाणामस्मासु अधीनम्। ये निःस्पृहाः मुमुक्षवः तेषामस्मासु विषये

जोनराजटीका

कस्माद्धेतोर्भवानागत इति प्रश्ने कुतूहलं निरास्पदं निष्प्रतिष्ठं न युक्तमित्यर्थः। यतः किमु? किं वस्तु निःस्पृहाणामस्मासु राजस्वधीनमायत्तम्, न किञ्चिदित्यर्थः। यद्यपि वीतरागत्वाद् भवतामागमनप्रयोजनप्रश्नो न युक्तस्तथापि मङ्गलावहां तव वाचंश्रोतुं लोभो मां मुखरीकरोति त्वद्वाक्यश्रवणलोभादागमनप्रयोजनं पृच्छामीत्यर्थः। पृच्छतोऽवश्यमुत्तरं देयमित्यर्थः।।९।।

इत्युक्तवानुक्तिविशेषरम्यं मनः समाधाय जयोपपत्तौ।
उदारचेता गिरमत्युदारां द्वैपायनेनाभिदधे नरेन्द्रः।। १०।।

अन्वयदीपिका

मां मुखरीकरोति वाचालं करोति। प्रेरयतीत्यर्थः। किं कर्तुम्? ते तव गिरं वाणीं श्रोतुम् आकर्णयितुम्। [किं लक्षणां गिरम्?] कल्याणकरीम्। अस्मद्धितैकहेतुम्। कल्याणं श्रेयः करोतीति कल्याणकरी। ताम्। निस्स्पृहस्यापि तव वाक्यमस्मद्धितकारित्वात् श्रोतव्यमित्यर्थः। मुखकुञ्जेभ्यः रप्रत्ययः <रप्रकरणे खमुखकुञ्जेभ्य उपसङ्ख्यानम् वा-३.१.९८>।। ९।।

इत्युक्तेति। द्वैपायनेन व्यासेन नरेन्द्रो युधिष्ठिरः इति वक्ष्यमाणां गिरं वाचम् अभिदधे अभिपूर्वाद्दधातेद्व्यर्थकत्वाद्द्विकर्मकत्वम्। उक्तः। [किं लक्षणां गिरम्?] उदाराम् अर्थवतीम्। द्विर्गता आपो यस्मिन् तत् द्वीपम् द्व्यन्तरुपसर्गेभ्योऽप ईत् (६.३.९७)। द्वीपम् अयनं स्थानं जन्मभूमिर्यस्यासौ द्वीपायनः। द्वीपायन एव द्वैपायनः। स्वार्थे अण् वक्तव्यः [प्रज्ञादिभ्यश्च ५.४.३८] इति। [किं कृत्वा?] जयोपपत्तौ जयसिद्धौ मनः समाधाय। जयसिद्धिम् अपेक्ष्य।

लघुटीका

अधीनम् आयत्तम्। किं प्रयोजनमस्तीत्याह- ये हि सस्पृहाः तेषां राजायत्तं कार्यं भवति, निःस्पृहाणां न खलु भवति। यद्येवं तर्हि तूष्णीमास्थ इत्याह- यद्यप्येवं तथापि कल्याणकरीं श्रेयोविधायिनीं त्वदीयां गिरं श्रोतुं या इच्छा सा मां मुखरीकरोति वक्तुं प्रेरयति। न हि प्रश्नं विना प्रतिवचनमुपपद्यते। 'वाक्यं वक्तरि अधीनम्' इति वार्त्तिककारवचनादधीनशब्दः।९।

इत्युक्तवान् नरेन्द्रो द्वैपायनेन मुनिना गिरमभिदधे वाचमूचे इत्येतावद्वाक्यम्, इतराणि क्रियाकारणानि। उक्तिविशेषेण वचनवैचित्र्येण रम्यं रमणीयम् इति। उक्तवान् इति क्रियाविशेषणं वा। किं कृत्वा गिरमभिदधे? जयोपपत्तौ जयाभ्युपाये मनः समाधाय बुद्धिं विनिवेश्य। किं भूतो नरेन्द्रः? उदारचेताः उदारं, बृहद्विपुलं चेतो यस्य स तथा। किं भूतां गिरम्?

जोनराजटीका

द्वैपायनेन व्यासेन राजा वाचमभिदधे। कीदृशम् उक्तिविशेषेण रम्यमित्येवमागमन-हेतुप्रश्नमुक्तवान्। किं कृत्वा? जयोपपत्तौ जयस्योपादाने मनः समाधाय भावयित्वा। समाधाने राजा व्यासो वा कर्तृत्वेन व्याख्येयः यत उदारचेताः।।१०।।

जिगीषतां[१] जन्मवतामलघ्वीं यशोवतंसामुभयत्र भूतिम्।
अभ्यर्हिता बन्धुषु तुल्यरूपा वृत्तिर्विशेषेण तपोधनानाम्।। ११।।

अन्वयदीपिका

राज्ञः इति शेषः। [किं लक्षणो नरेन्द्रः?] अमुना प्रकारेण उक्तिविशेषरम्यं चारु मनोहरं यथा भवति तथा उक्तवान् उवाचेत्यर्थः। उक्तेर्विशेषो वैचित्र्यम्। उदारचेताः महामनाः।। १०।।

आदौ तावत् स्वस्य माध्यस्थ्यदोषं श्लोकद्वयेन परिहरति। **चिचीषतामिति।** हे नृप! यस्मात् कारणात् जन्मवतां पुरुषाणां बन्धुषु ज्ञातिषु तुल्यरूपा एकप्रकारा वृत्तिः व्यवहारः अभ्यर्हिता। उचिता योग्येत्यर्थः। तर्हि मादृशां तपोधनानां तु विशेषेण नियमेन अभ्यर्हिता योग्या। [किं लक्षणानां जन्मवताम्?] अलघ्वीं महतीं भूतिं श्रेयः। उभयत्र। इह लोके अमुत्र परलोके चिचीषतां चेतुं सङ्ग्रहीतुम् इच्छताम्। चिनोतेः सन्नन्तात् शतृप्रत्ययः। [किं लक्षणां भूतिम्?] यशोऽवतंसाम्। यश एव अवतंसो भूषणं यस्याः सा। ताम्। कीर्तिभूषणाम्। तथापि तुल्यकृत्यौचित्येऽपि।११।।

लघुटीका

अत्युदाराम् अतिशयेन उदारा उन्नता तां तथा। योऽनादिद्वैपायनशब्दः सङ्केतितः स एवात्र प्रवृत्तिनिमित्तनिरपेक्षः। एवं सति नडादिषु द्वीपाशब्दः सत्यवतीपर्यायः पठितव्यः। द्वीपायाः सत्यवत्या अपत्यं द्वैपायनः। नडादित्वादायनण्। सात्यवतेयः। विद्यया समासादितसाधनेनार्जुनेन धार्तराष्ट्रा उन्मूलयिष्यन्ते, तां विद्यां दातुमहमागतः इत्यनेनागमनप्रयोजनं वक्ष्यति।। १०।

तत्र इदमाशङ्क्यते। अथ कस्मात्सदृशे ज्ञातेये तपोधनस्य सतः क्वचिदेकस्मिन्नेव पक्षपात इत्याह– जन्मवतां शरीरिणाम् उभयत्र इह लोके परलोकेऽपि अलघ्वीं गरीयसीं भूतिं जिगीषतां जेतुमिच्छतां बन्धुषु विषये तुल्यरूपा समस्वभावा वृत्तिर्वर्त्तनमभ्यर्हिता योग्या। बन्धुषु समं वर्त्तमानो लोकद्वयेऽपि पूज्यते इत्यर्थः। ये पुनः तपोधना नीरागद्वेषाः तेषां

जोनराजटीका

स्वागमने श्लोकाभ्यामुपपत्तिमाह- जन्मवतां देहिनां वृत्तिर्वर्त्तनं बन्धुविषये तुल्यरूपाऽभ्यर्हिता पूजिता। उभयत्र लोकद्वये कीर्त्तिभूषणां श्रियं प्राप्तुकामानां बन्धुषु समदृष्ट्या यशःश्रियौ भवत इत्यर्थः। तपोधनानां निःस्पृहाणां तु विशेषेण जिगीषुसकाशादाधिक्येन

१. चिचीषताम् इति अन्वयदीपिकापाठः।

तथापि निघ्नं नृप ! तावकीनैः प्रह्वीकृतं मे हृदयं गुणौघैः।
वीतस्पृहाणामपि मुक्तिभाजां भवन्ति भव्येषु हि पक्षपाताः।।१२। (युग्मम्)

अन्वयदीपिका

हे नृप! अतः कारणात् मे हृदयं मम चेतो निघ्नं त्वदायत्तं त्वदधीनं वर्तते। अत इति कुतः? यत् यस्मात् कारणात् तावकीनैः त्वदीयैः गुणौघैः गुणसमूहैः मे हृदयं चित्तं प्रह्वीकृतम्। नम्रीकृतम् आवर्जितम्। अधीनो निघ्न आयत्त **इत्यमरः**। [ननु निस्स्पृहस्य कोऽयं पक्षपात इत्यत आह।] वीतस्पृहाणामपि। वीतरागाणामपि विरक्तानामपि भव्येषु साधुषु पक्षपाताः स्नेहाः भवन्ति। [किं लक्षणानां निस्स्पृहाणाम्?] मुक्तिभाजां मुमुक्षूणाम्। न तु साध्वनुग्रहो महतां माध्यस्थ्यभञ्जक इति भावः।। १२।।

लघुटीका

ज्ञातिषु साम्येन वृत्तिर्विशेषेण सुतरां प्रशस्यते। कीदृशीं विभूतिम्? यशोवतंसाम्। यश एवावतंसो भूषणं यस्याः सा तथा ताम्। तच्च समवृत्तिताजनितम्।११।

यद्यप्येवं तथापि तावकीनैस्त्वदीयैर्गुणौघैः गुणसमूहैः मे मम हृदयं प्रह्वीकृतं नामितम् आवर्जितमित्यर्थः। कीदृशं हृदयम्? निघ्नम् अस्ववशं गुणपराधीनमित्यर्थः। विप्रतिषिद्धमेतदित्याह- वीतस्पृहाणामपि निष्कामानामपि मुक्तिभाजां मुमुक्षूणां भव्येषु गुणवत्सु पक्षपाता अनुरागा भवन्ति। किमत्र कुर्मो गुणानामेतत्फलमित्यर्थः। यदि वयं गुणिनः स्याम धृतराष्ट्रोऽस्मासु मनागपि पक्षपातं कुर्यात्। १२।

जोनराजटीका

बन्धुषु वृत्तिः सदृशी पूजिता, वैषम्येन दर्शनस्य लोभमूलत्वात्।।११।।

नृपेत्यमन्त्रणं राज्यप्राप्तिसूचकम्। यद्यपि तपस्विनां बन्धुषु दृष्टिः सदृशी युक्ता तथापि तावकीनैस्त्वदीयैर्गुणोघैर्मे हृदयं प्रह्वीकृतमेकपक्षीकृतं स्वपक्षतां नीतम्। यतो निघ्नं गुणायत्तम्। त्वद्गुणदर्शनेन समदृष्टिस्त्वय्येव निविष्टेत्यर्थः। यदि तपस्विनां बन्धुविषया समा दृष्टिरुचिता तत्कथं भवान्मयि स्नेहपर इत्याह - निस्स्पृहाणामपि मुक्तिपराणां भव्येषु गुणिष्वेव पक्षपातः। भवन्तः सगुणा दुर्योधनादयस्ते निर्गुणा इति भवत्स्वेव पक्षपातो युक्तः। भव्यगेयेति <पा. ३.४.६८ निपातनात्> भव्यशब्दः साधुः।।१२।।

सुता न यूयं किमु तस्य राज्ञः सुयोधनं वा न गुणैरतीताः।
यस्त्यक्तवान्वः स वृथा बलाद्वा मोहं विधत्ते विषयाभिलाषः।। १३।।

अन्वयदीपिका

उपालम्भे कारणमाह। **सुता न यूय**मिति। यः स धृतराष्ट्रः वः युष्मान् वृथा निष्कारणमेव त्यक्तवान्। [यदि सुताः गुणाधिकाश्च कथमत्याक्षीदित्यत्राह] विषयाभिलाषः भोगतृष्णा बलात् हठात् मोहमविवेकं विधत्ते करोति। विषयाभिलाषातिरिक्तः कश्चित्त्यागे हेतुर्नास्ति। [अथ नृपस्य गुरुतां प्रकाशयितुं धृतराष्ट्रस्य दुश्चेष्टाम् उद्घाटयति।] यूयं भवन्तः तस्य राज्ञो धृतराष्ट्रस्य सुताः पुत्राः किमु न भवन्ति? भवन्त्येव, सुता एवेत्यर्थः। वा अथवा गुणैः शौर्यादिभिः सुयोधनं न अतीताः नातिक्रान्ताः? अपि तु अतिक्रान्ताः। अतिक्रान्ता एवेत्यर्थः। कर्तरि क्तः। अत्र कार्यकारणसमर्थनरूपोऽर्थान्तरन्यासः।। १३।।

लघुटीका

न तु राष्ट्रान्निर्वासयेत् इत्याशङ्क्याह- इह परित्यागकारणमनात्मीयत्वं निर्गुणता च। तद्द्वयमपि भवत्सु नास्ति। तथाहि- तस्य राज्ञो धृतराष्ट्रस्य यूयं किं पुत्रा न भवत। किं वा यूयं गुणैः कृत्वा सुयोधनं न अतीताः अनतिशयिताः? यतः स धृतराष्ट्रो वो युष्मान् त्यक्तवान्। वा अथवार्थे। अथवा विषयाभिलाषो विषयेषूपरि योऽभिलाषो गृध्नुः स बलान्मोहं विधत्तेऽज्ञानं जनयति। १३।

जोनराजटीका

न च धृतराष्ट्रादयः केवलं निर्गुणा यावद्दोषमया एवेत्याह- स धृतराष्ट्रो वा युष्मान्यत्त्यक्तवान् तद्वृथा। बलाद्वा मोहं विधत्ते अयुक्तमेवेत्यर्थः। यतो यूयं तस्य धृतराष्ट्रस्य पुत्राः किमु न भवथ, पुत्रा एवेत्यर्थः। धर्मशास्त्रेषु भ्रातृपुत्रस्यापि पुत्रातिदेशात्। पुत्रोऽपि यदि निर्गुणः किं तेनेत्याह - यूयं दुर्योधनं गुणैः किमु वा नातीताः जितवन्तः दुर्योधनाद्यूयमधिकगुणा इत्यर्थः। गुणवतः पुत्रस्य दुर्लभत्वादत्यक्तव्या अपि यूयं तेन राज्ञा यत्त्यक्तास्तदयुक्तं कृतमित्यर्थः। यद्वा यूयं तस्य यत्पुत्रा यद्दुर्योधनातिगाश्च ततो हेतोः स वो वृथा त्यक्तवानिति योज्यम्। वा पक्षान्तरविषयेषु। भोगेष्वभिलाषो मोहं युक्तायुक्तविमर्शाभावरूपं विधत्ते। स्वकीयत्वे सगुणत्वे च स्वीकारहेतौ सत्यपि स वो यत्त्यक्तवांस्तदनुचितम्। एवं तेषु धृतराष्ट्रादिषु दोषवत्सु सत्सु भवत्सु च गुणशालिषु भवत्स्वेव पक्षपातो युक्तः।।१३।।

जहातु नैनं कथमर्थसिद्धिः संशय्य कर्णादिषु तिष्ठते यः।
असाधुयोगा हि जयान्तरायाः प्रमाथिनीनां विपदां पदानि।। १४।।

अन्वयदीपिका

अथ राज्ञः युधिष्ठिरस्य उत्साहवर्द्धनाय शत्रुहानिं दर्शयति। **जहात्विति**। हे नृप! अर्थसिद्धिः कार्यसिद्धिः फलनिष्पत्तिः एनं धृतराष्ट्रं कथं न जहातु ? कथं न त्यजतु ? अपि तु त्यजत्वेव। यः धृतराष्ट्रः संशय्य सन्दिह्य सन्देहं प्राप्य शल्यकर्णादिषु तिष्ठते। कर्णादीन् दुर्मन्त्रिणः [सन्दिग्धार्थे] निर्णेतृत्वेन अवलम्बते इत्यर्थः। हिः युक्तौ। हि यस्मात्कारणात् असाधुयोगाः दुर्जनसंसर्गाः जयान्तरायाः जयविघातकाः, विपदां कष्टानां पदानि स्थानानि भवन्ति। न केवलम् अर्थघातिनः किन्तु अनर्थकारिणश्च। [किं लक्षणानां विपदाम्?] प्रमाथिनीनां दुःखोत्पादनशीलानाम्। प्रमथ्नन्तीत्येवं शीलाः तासाम्। धृतराष्ट्रोऽपि दुर्जनविधेयत्वाद्विनंक्ष्यतीति भावः।। १४।।

लघुटीका

किमत्र क्रियते यत्तु यूयं तेन परित्यक्ताः स तस्यैव महाननर्थ इत्याह- एवं धृतराष्ट्रम् अर्थसिद्धिः कथं न जहातु कथमत्याक्षीत् येन किं कृतम्? यः संशय्य संशयितो भूत्वा कर्णादिषु तिष्ठते निर्णयति। यः संशयितो भूत्वा कर्णादीन् सन्देहपदनिर्णयार्थं पृच्छति। कर्णादयो यस्य स मन्त्रिणः तमर्थसिद्धिः कथं न हासीत्। तं सम्पदः केन प्रकारेण मा यासिषुः यदि कर्णादयो निर्णेतारः। एतावता अर्थसिद्धिः किमिति तं जहातीत्याह- हि यस्माद्। असाधुयोगाः असाधुभिः सह ये सम्बन्धाः ते विपदां पदानि आपदां स्थानानि। किं भूताः असाधुयोगाः? जायान्तरायाः। जयस्य विघ्नभूताः। कीदृशीनां विपदाम्? प्रमाथिनीनां प्रमथ्नन्ति निर्मूलयन्तीति अभीक्ष्णम् इति प्रमाथिन्यः। जहातु इति 'प्रैषातिसर्गप्राप्तकालेषु

जोनराजटीका

अलमुपालम्भेन। तन्निराकृता वयं वनेष्वेव लुठाम इति माऽवमंस्था इत्याह- कार्यसिद्धिरेनं राजानं कथं न त्यजतु योऽर्थसिद्धिषु संशय्य सन्दिह्य कर्णादिषु तिष्ठते। कर्णादीन्स्थेयीकृत्य कार्यसाधने प्रवर्तते इत्यर्थः। कर्णादीनां स्थेयत्वेन कथं श्रीस्तं त्यजतीत्याह- खलसंसर्गाः प्रमथनशीलानां विपदां पदानि स्थानानि भवन्ति। यतो जयस्यान्तराया विघ्नाः। कर्णः परमखलस्तं पृष्ट्वाऽर्थसाधने प्रवर्तमानं दुर्योधनं श्रीस्त्यजत्येवेत्यर्थः। तिष्ठते इति

पथश्च्युतायां समितौ रिपूणां धर्म्यां दधानेन धुरं चिराय।
त्वया विपत्स्वप्यविपत्तिरम्यमविष्कृतं प्रेम परं गुणेषु।। १५।।

अन्वयदीपिका

एवं शत्रोरनर्थं सूचयित्वा राज्ञोऽर्थसिद्धिं सूचयति। **पथश्च्युतायाम्**इति। हे नृप! त्वया परम् उत्कृष्टं गुणेषु शान्त्यादिविषयेषु प्रेम स्नेहः आविष्कृतं प्रकटितम्। दुःसहमपि सोढवता त्वया साध्वनुष्ठितमित्यर्थः। [किं कुर्वता त्वया?] रिपूणां शत्रूणां समितौ सभायां चिराय चिरं धुरं भारं दधानेन धारयता। [किं लक्षणां धुरम्?] धर्म्याम्। धर्मात् अनपेता धर्म्या ताम्। [किं लक्षणायां समितौ?] पथः मार्गात् च्युतायां भ्रष्टायाम्। दुरात्मनो दुश्शासनस्य। द्रौपदीसङ्ग्रहणे साहसमङ्गीकृतवतामित्यर्थः। 'सभासमितिसंसद' **इत्यमरः**। [किं लक्षणं प्रेम] विपत्स्वपि आपत्स्वपि। अविपत्ति। न विद्यते विपत्तिर्नाशो यस्य तत् अविपत्ति अविनाशीत्यर्थः। [पुनः किं लक्षणं प्रेम?] अत एव रम्यं मनोहरम्। अत्र विभावनालङ्कारः। असत्यामपि सामग्र्यां कार्योत्पत्तिः विभावना।। १५।।

लघुटीका

कृत्याश्च इति'(पा.३.३.१६३) प्राप्तकाले लोट्। अर्थसिद्धेः परित्यक्तुं कथं मा प्राप्तकालोऽभूत्। तिष्ठते इति प्रकाशनस्थेयाख्ययोरित्यात्मनेपदम् <पा.१.३.२३>।। १४।

एवं तु जहता तेनात्मान एव विरुद्धं कृतम्। त्वया तु तद्वचनमनुतिष्ठता साधु कृतमिति दर्शयितुमाह- त्वया विपत्स्वपि गुणेषु परं प्रेमाविष्कृतं, गुणानुरागिता प्रकटीकृता। किं कुर्वता? पथश्च्युतायां सम्मार्गात् अपेतायां रिपूणां सम्बन्धिनां समितौ सभायां धर्म्यां धर्मयुक्तां धुरं चिराय चिरकालं यावत् दधानेन बिभ्रता सन्मार्गाणाम् अपेतानाम् अधार्मिकाणाम् अरीणां मध्ये धर्ममेव पालयता त्वया लोके गुणवानिति चिरं यशः प्रथितमित्यर्थः। कीदृक्

जोनराजटीका

प्रकाशनप्रतिज्ञास्थेय इत्यात्मनेपदम्। खलानां संसर्गमात्रमपि विपन्मूलम्। तेषां प्रमातृत्वारोपेण श्रीः कथं न नश्यतीति तात्पर्यम्।।१४।।

पाण्डवस्य गुणान्विवक्षुराह- तव यद्गुणेषु प्रेम परं महान् रागस्तत्त्वया प्रकटीकृतम्। यतः पथश्च्युतायां मार्गत्यागिन्यामपि रिपूणां समितौ वर्गे समूहे विषये विपत्कालेऽपि धर्म्यां

विधाय विध्वंसमनात्मनीनं शमैकवृत्तेर्भवतश्छलेन।
प्रकाशितत्वन्मतिशीलसाराः कृतोपकारा इव विद्विषस्ते।।१६।।

अन्वयदीपिका

विधाय इति। हे नृप! ते तव विद्विषः शत्रवः कृतोपकारा इव उपकृतवन्त इव लक्ष्यन्ते ज्ञायन्ते। कृतः उपकारो यैस्ते कृतोपकाराः। यतः अपकारोऽप्युपकार एव संवृत्तः। यत्सौजन्यमसौजन्यञ्च जगति सुव्यक्तमासीदित्यर्थः। [किं कृत्वा?] छलेन कपटेन भवतः तव विध्वसम् अपकारं विधाय। [कथंभूतस्य भवतः?] शमैकवृत्तेः शम एव एका मुख्या वृत्तिर्वर्त्तनं यस्य सः शमैकवृत्तिः। तस्य शमैकवृत्तेः। अपरोपतापिनः। [किं लक्षणं विध्वंसम्?] अनात्मने हितम् आत्मनि हितं न भवतीति अनात्मनीनः। तम् अनात्मनीनम्। स्वस्यैव असद्धेतुम्। [किं लक्षणाः विद्विषः?] प्रकाशितत्वन्मतिशीलसाराः। तव मतिश्च शीलञ्च साराश्च त्वन्मतिशीलसाराः। प्रकाशिताः त्वन्मतिशीलसाराः यैस्ते प्रकाशितत्वन्मतिशीलसाराः।

लघुटीका

प्रेम? अविपत्तिरम्यम्। अविद्यमाना विपत्तिर्यस्मात् तदविपत्ति। अत एव रम्यम् अविपत्त्या वा रम्यम्। चिराय चिरम् इत्यर्थः। धर्मादनपेता धर्म्या, ताम्। समितिः सभा धूः क्रियाधूः। धूरिव धूः। १५।

यदि गुणेष्वहं प्रेम नाकरिष्यं कथमन्यथा विद्विषो मां पर्यभ्यभविष्यन् इत्याह- विद्विषस्तव कृतोपकारा इव। किं कृत्वा? च्छलेन च्छद्मना भवतः तव विध्वंसं पराभवं कृत्वा। कथं विध्वंस एव उपकाराय इत्याह- किं भूताः? प्रकाशितत्वन्मतिशीलसाराः।

जोनराजटीका

धर्मानुवर्तिनीं स्थितिं दधता। यद्वा विपत्स्वपि विपत्कालेऽपि त्वया गुणेषु प्रेम परं रागः केवलं प्रकटीकृतम्। अविपत्तौ सम्पत्तौ रम्यम् अथवाऽविपत्त्यक्षयमिति योज्यम्। अविपत्तौ विपदभावे रम्यमिति वा योज्यम्।।१५।।

भवतश्छलेन विध्वंसं पराजयं कृत्वा अत एवानात्मने हितं शत्रवस्तवोपकारमिवाकुर्वन्। यतः प्रकाशितः त्वन्मतेः शीलसारौ यैः। यतः शमैकवृत्तेः सत्यनिष्ठस्य यदि न शत्रवस्तव च्छलेन पराजयं कुर्युः का तव सत्यपरत्वेन कीर्तिः स्यात्। तथा परिभूतोऽपि त्वं यत्सत्यपर एवातो महती कीर्तिर्जातेत्यर्थः।।१६।।

लभ्या धरित्री तव विक्रमेण ज्यायांश्च वीर्यास्त्रबलैर्विपक्षः।
अतः प्रकर्षाय विधिर्विधेयः प्रकर्षतन्त्रा हि रणे जयश्रीः।। १७।।

अन्वयदीपिका

प्रकाशितयोः त्वन्मतिशीलयोः तव प्रज्ञासद्वृत्तयोः सारः प्रकर्षो यैस्ते इति वा। प्रकशितौ तव मतेः शीलसारौ स्वभावस्थिरते यैस्ते इति वा। मतिं बुद्धिप्रकर्षं, शीलम् आचरणप्रकर्षं, सारं दृढांशप्रकर्षं प्रकाशयन्त इत्यर्थः।। १६।।

अथ कार्यांशमाह। **लभ्ये**ति। हे नृप! तव विक्रमेण पराक्रमेण धरित्री वसुधा लभ्या प्राप्तव्या। वसु दधातीति वसुधा। तवेति कृत्यानां कर्तरि षष्ठी। तव त्वया लभ्या। विपक्षोऽपि शत्रुरपि ज्यायान् प्रशस्यतरः। [कैः कृत्वा?] वीर्यस्य बलैः कृत्वा। वीर्यञ्च अस्त्राणि च बलानि वीर्यास्त्रबलानि। तैः। वीर्यं शौर्यम् अस्त्राणि आग्नेयादीनि बलानि सैन्यानि येषां ते। अतः कारणात् उपायः विधिः विधेयः कर्तव्यः। [किमर्थम्?] प्रकर्षाय आधिक्याय उत्कर्षायेत्यर्थः। हि यस्मात् कारणात्। रणे सङ्ग्रामे जयश्रीः विजयलक्ष्मीः प्रकर्षतन्त्रा उत्कर्षप्रधाना।

लघुटीका

शीलं धर्मप्रधानता। सारो दृढत्वम्। प्रकाशितौ प्रकटीकृतौ तव मतेः शीलसारौ यैस्ते तथा। अत एव कृतोपकारा इव। गुणवत्ताप्रकाशनम् उपकारः। किं भूतम्? विध्वंसमनात्मनीनम्। आत्मने हितम् आत्मनीनम्। न आत्मनीनम् अनात्मनीनम्। आत्मनेऽहितम्। किं भूतस्य भवतः? शमैकवृत्तेः। शमे एव एकस्मिन् वृत्तिर्व्यापारो यस्य स तथा। तस्य। एतदुक्तं भवति। लोके दौर्जन्यप्रथनात् तैः आत्मन एवोपद्रवः कृतः। त्वत्केन यशःप्रकाशनेन उपद्रवोऽपि कृतस्तैः उपकार इव कृतः। १६।

यदि तैः आत्मा दुर्जन इत्यहं गुणवानिति जगति प्रकाशितं ततः किमित्याह- त्वया अवश्यमेव प्राप्या। त्वया धरित्री लभ्या। त्वया अवश्यमेव पृथिवी प्राप्या। कथम्?

जोनराजटीका

अत[illegible] स्वागमनस्य कारणे दिङ्मत्रं विवक्षुराह- विक्रमेण कारणेन तव कर्तुर्धरित्री राज्यं लभ्या प्राप्या। विपक्षः शत्रुवर्गो वीर्येणास्त्रेण बलेन ज्यायानधिकः। च शब्दः प्रौढिद्योतनार्थः। अतोऽस्माद्धेतोः स्वस्य प्रकर्षायाधिकार्थाय विधिः प्रयत्नो युष्माभिः कार्यः। युक्तमेतत्। रणे जयलक्ष्मीः प्रकर्षस्तन्त्रं साधनं यस्याः। य एवाधिकः स एव जयतीत्यर्थः।।१७।।

त्रिःसप्तकृत्वो जगतीपतीनां हन्ता गुरुर्यस्य स जामदग्न्यः।
वीर्यावधूतः स्म तदा विवेद प्रकर्षमाधारवशं गुणानाम्।। १८।।

अन्वयदीपिका

प्रकर्षसाध्या। "तन्त्रं प्रधाने सिद्धान्ते" **इत्यमरः**। बलिन एव जयः न दुर्बलस्येति भावः।। १७।।

अथ श्लोकचतुष्टयेन विपक्षस्य ज्यायस्त्वं वर्णयति- **त्रिस्सप्तेति।** सः जामदग्न्यः परशुरामः यस्य भीष्मस्य वीर्यावधूतः सन् पराक्रमाभिभूतः सन् अम्बिकादिस्वयंवरे पराजयसमये गुणानां शौर्यादीनां प्रकर्षम् अतिशयम् आधारवशम् आश्रया <यत्तं> विवेद जज्ञे। स्वविद्यायाः स्वशिष्ये भीष्म एव स्वस्मादपि प्रकर्षाधानदर्शनादिति भावः। [किं लक्षणः जामदग्न्यः?] यस्य भीष्मस्य गुरुः शास्त्रोपदेष्टा अस्त्रविद्योपदेष्टा प्रसिद्धः। यतः त्रिःसप्तकृत्वः जगतीपतीनां

लघुटीका

विक्रमेण पराक्रमेण। परं न चायमेव विक्रमकालो यस्माद्वीर्येण पराक्रमेणास्त्रैर्मन्त्रविशेषैः बलेन शरीरेण गुणविशेषेण विपक्षः सुयोधनो ज्यायान् अधिकतरः। तत्किमित्याह- यस्माद्वीर्यास्त्रबलैर्विपक्षो ज्यायान्। अतो हेतोः प्रकर्षाय अतिशयार्थं विधिर्विधेयः। कथं प्रकर्षाय क्रियाविशेषः कार्य इत्याह- तदेव विपक्षस्य ज्यायस्त्वं दर्शयितुमाह-यस्माद्रणे प्रकर्षादिना जयश्रीः। य एव प्रकृष्टः तमेव रणे जयश्रीर्भजते इत्यर्थः। च शब्दो हिशब्दश्च यस्मादर्थः। १७।

स भीष्मो रणे धनुर्धुन्वन् धनुरास्फालयन् कस्य मनो भयैकप्रवणं भयैकविषयं न कुर्यात्? विशेषणद्वारेण विश्वेषां भयावहत्वं दर्शयति। गुणानां यः प्रकर्षोऽतिशयः स

जोनराजटीका

शत्रुपक्षस्य वीर्याधिक्यं दर्शयितुमाह- त्रीन्वारांस्त्रिः त्रिगुणान्सप्तैकविंशतिवारान्? राज्ञां हन्ता स प्रसिद्धो जामदग्न्यो रामो यस्य गुरुरस्त्रमन्त्रोपदेष्टा तदाऽस्त्रोपदेशकाले येन वीर्येण करणभूतेनावधूतो निर्जितः सन् गुणानामस्त्रकौशल्यादीनां प्रकर्षमाधारस्योप-देशस्य न पुनरुपदेष्टुर्वशमायत्तं विवेद स्माज्ञासीत्। गुरुमपि मां मच्छिष्योऽप्ययं जितवानतः पात्रापेक्षैव गुणवृद्धिरिति <परशु>रामो निश्चितवानित्यर्थः। विवेदेति विदो लटो वेति <३.४.८३>णल्।।१८।।

यस्मिन्ननैश्वर्यकृतव्यलीकः पराभवं प्राप्त इवान्तकोऽपि।
धुन्वन्धनुः कस्य रणे न कुर्यान्मनो भयैकप्रवणं स भीष्मः।।१९।।(युग्मकम्)

अन्वयदीपिका

हन्ता। हिंसकः। त्रिस्सप्तवारान् इति त्रिस्सप्तकृत्वः। एकविंशतिकृत्वः। जमदग्नेः अपत्यं पुमान् जामदग्न्यः। 'स्मेत्यव्ययं पादपूरणे' इति **विश्वः**।। १८।।

यस्मिन्निति। हे नृप! सः भीष्मः रणे सङ्ग्रामे। कस्य ? योद्धमात्रस्यापि कुर्यादेवेत्यर्थः। [किं कुर्वन्?] धनुः धुन्वन्। आस्फालयन् सन्। [सः कः?] यस्मिन् भीष्मे [इति कोऽर्थः?] भीष्मे विषये अन्तकोऽपि यमोऽपि पराभवं तिरस्कारं प्राप्त इव आसीत्। [किं लक्षणः अन्तकः?] अनैश्वर्यकृतव्यलीकः अनीश्वरस्य भावः अनैश्वर्यम्। असामर्थ्यम्। तेन कृतं व्यलीकं दुःखं येन असौ जनितवैलक्ष्यः। दुःखे वैलक्ष्ये व्यलीकमिति **यादवः**।। १९।।

लघुटीका

आधारवशः इति तम्। यस्य गुरुर्जामदग्न्यः तदा युद्धकाले विवेद स्म ज्ञातवान्। कीदृक् जामदग्न्यः? वीर्यावधूतः। यदीयेन वीर्येणावधूतः परिधूतः सन्। यत्सङ्क्रान्ता एवास्त्रज्ञानादयोऽत्र गुणाः। ते चैवम् अस्मद्गुणतो विशिष्टाः यदहमनेन पराजितः प्रसह्य। किं कृतोऽयं प्रकर्षः स्यादिति रूप्याधारकृत इति निश्चिकाय। पुनः कीदृक् जामदग्न्यः? त्रिस्सप्तकृत्वो जगतीपतीनां हन्ता। एकविंशतिवारान् राज्ञां हन्ता इत्यनेन गुणगरीयस्त्वं कथितम्। सप्तवारान् कृत्वा सप्तकृत्वः। त्रीन्वारान् त्रिः। सप्तवारान् त्रिरावर्तान् कृत्वा एकविंशतिर्भवति। एकविंशतिकृत्वो राज्ञां हन्ता इत्यर्थ इत्यनेन जगत्प्रसिद्धतां दर्शयति। अन्यच्च कीदृक् भीष्मः? यस्मिन् भीष्मेऽन्तकोऽपि मृत्युरपि पराभवं प्राप्त इव। यत्र कृतान्तोऽपि परिभवमाप। का च कथा अन्येषु? कुतः कीदृक्। अन्तकः अनैश्वर्येण अप्रभविष्णुतया कृतं व्यलीकं यथा येन।

जोनराजटीका

युग्मम्। यस्मिन्भीष्मेऽनैश्वर्येण प्रभविष्णुत्वाभावेन कृतं व्यलीकमधिक्षेपो यस्य सः। भीष्मस्य स्वेच्छामरणात्। यशोऽपि यस्मिन्यद्विषये पराभवमिव प्राप्तः स भीष्मो धनुराकर्षश्चेतो भयैकसक्तं कस्य न कुर्यात्?। यस्य भीष्मस्य स्वेच्छायत्तं मरणं तेन सह युद्धं मरणाय पराजयाय वेत्यर्थः।।१९।।

सृजन्तमाजाविषुसंहतीर्वः सहेत कोपज्वलितं गुरुं कः।
परिस्फुरल्लोलशिखाग्रजिह्वं जगज्जिघत्सन्तमिवान्तवह्निम्।। २०।।

अन्वयदीपिका

सृजतामिति। हे नृप! वः युष्माकं मध्ये कः गुरुं द्रोणाचार्यं सहेत। सोढुं शक्नुयात्। न कोऽपीत्यर्थः। [किं लक्षणं गुरुम्?] आजौ सङ्ग्रामे इषुसहस्रं शरसमूहान् सृजन्तं मुञ्चन्तम्। कोपज्वलितम्। कोपेन दीप्तम्। उत्प्रेक्षते- अन्तवह्निमिव स्थितम्। कल्पान्तानलमिव वर्तमानम्। [किं लक्षणं वह्निम्?] परिस्फुरल्लोलशिखाग्रजिह्वम्। परि आसमन्तात्। परिस्फुरन्त्यः सर्वत्र प्रसरन्त्यः लोलाश्चपलाः। शिखाग्राण्येव जिह्वा रसना यस्य सः परिस्फुरल्लोलशिखाग्रजिह्वः। तम्। अत एव जगज्जिघत्सन्तम्। जगल्लोकम् अत्तुमिच्छन्तम्। अदेः सन्नन्तात् शतृप्रत्ययः। अत्तुमिच्छति जिघत्सति जिघत्सन्तम्। उत्प्रेक्षालङ्कारः।। २०।।

लघुटीका

सोऽनैश्वर्यकृतव्यलीकः। ईशाञ्चक्रे न भीमस्य मृत्युस्त्रिभुवनेश्वरः इत्यागमः। एवंविधो भीष्मः साङ्ख्ये रणे सर्वस्यैव मनसि भयमावहेदित्यर्थः।१८।१९।

तथा युष्माकं मध्ये कोऽसौ विद्यते यो गुरुं द्रोणम् आजौ संग्रामे शरसंहतीः सृजन्तं बाणावलीर्वितन्वन्तं सन्तं सहते। किं भूतम्? कोपज्वलितं कोपेन जाज्वल्यमानम्। एवंविधं कमिव अन्तवह्निमिव युगान्तानलमिव। किं भूतम्? परिस्फुरल्लोलशिखाग्र-जिह्वम्। परिस्फुरन्ति देदीप्यमानानि लोलानि चञ्चलानि शिखाग्राणि ज्वालाप्रान्ता एव जिह्वा यस्य स तथा। किं कुर्वन्तम्? जगज्जिघत्सन्तम्। जगदत्तुम् इच्छन्तं जिघत्सन्तम्। एवंविधो यो युगान्तवह्निः तत्तुल्यम् शरसन्ततीनां शिखानां च सादृश्यात्।२०।

जोनराजटीका

रणे शरधारा वर्षन्तं गुरुं द्रोणं वः युष्माकं मध्याद्वः सम्बन्धी वा कः सहेत न कश्चिदित्यर्थः। अत्रोत्प्रेक्षते-विलसच्चपलज्वालाजिह्वं कृत्वा विश्वं जिघत्सन्तमत्तुकाममिव कल्पान्ताग्निम्। उपमानतया वा युगान्तवह्निमिति व्याख्येयः।।२०।।

निरीक्ष्य संरम्भनिरस्तधैर्यं राधेयमाराधितजामदग्न्यम्।
असंस्तुतेषु प्रसभं भयेषु जायेत मृत्योरपि पक्षपातः।। २१।।

अन्वयदीपिका

निरीक्ष्येति। हे युधिष्ठिर! मृत्योरपि अन्तकस्यापि यमस्यापि प्रसभम् अत्यर्थं भयेषु भीतिषु पक्षपातः परिचयोऽनुभवः जायेत उत्पद्येत। मृत्युरपि यमोऽपि अस्मात्कारणात् बिभीयादिति। किमुतान्य इति भावः। [किं लक्षणेषु भयेषु?] कदाचिदपि असंस्तुतेषु अपरिचितेषु अननुभूतेषु। [किं कृत्वा?] राधेयं कर्णं निरीक्ष्य दृष्ट्वा। राधायाः *<कुन्त्याः>* अपत्यं पुमान् राधेयः। तं राधेयम्। [किं लक्षणं राधेयम्?] संरम्भनिरस्तधैर्यम्। संरम्भेण कोपेन निरस्तं निराकृतं परेषां शत्रूणां धैर्यं निर्विकारचित्तत्वं येनासौ संरम्भनिरस्तधैर्यः। तम्। परधैर्यापहारिणम्। आराधितजामदग्न्यम्। आराधितः शुश्रूषितः जामदग्न्यो भार्गवः परशुरामो येनासौ आराधितजामदग्न्यः। तम्। जामदग्न्यादधीतशस्त्रशास्त्ररहस्यम्। अत्र भयसम्बन्ध-रहितस्य मृत्योः भयसम्बन्धाभिधानान् असम्बन्धे सम्बन्धरूपातिशयोक्तिरलङ्कारः।। २१।।

लघुटीका

संरम्भः क्षोभः। तेन निरस्तं परित्यक्तं गाम्भीर्यं धैर्यं मर्यादा येन संरम्भान्निरस्तधैर्यः। तं तथा आराधितजामदग्न्यम्। आराधितं सम्यगस्त्रवेदविद्यामधीयमानेन प्रसादितो जामदग्न्यो येन स तथाभूतः। तम्। एतेन सम्यगस्त्रवेदविज्ञानत्वं दर्शितम्। अन्यथा संरम्भनिरस्तधैर्योऽपि भृशं कुपितोऽपि किं कुर्यात्?। एवं भूतं राधेयं राधापुत्रं कर्णं निरीक्ष्य दृष्ट्वा। असंस्तुतेष्वपरिचितेष्वननुभूतेषु भयेषु प्रसभं हठान्मृत्योरपि यमस्यापि पक्षपातो जायेत। मृत्युरपि भयमार्गे पतेत्। मृत्युरप्यतर्कितं बिभीयादित्यर्थः। भिन्नकर्तृकेषु प्रायेण क्त्वा दृश्यते। यथा

जोनराजटीका

विश्वस्य ग्रासकत्वादपरिचितेष्वपि भयेषु यमस्य पक्षपातो जायेत। सम्भावनायां लिङ्। बलाद्यमं भीतय आविशन्तीत्यर्थः। यमोऽपि कथं बिभेतीत्याह - संरम्भेण क्षोभेन निरस्तं त्यक्तं धैर्यं गाम्भीर्यं येन तं, संरम्भत्यक्तधैर्यं राधेयं कर्णं दृष्ट्वा यत आराधितो जामदग्न्यो रामो येन तम्। अयमत्र भावः - भार्गवेण रणे कुमारः पराजित इत्यागमेषु प्रसिद्धिः। अतः पुत्रस्य कुमारस्य पराजयद्वारेण तत्पितुरीशस्यापि पराजयं सम्भावयन्यमो भार्गवशिष्यात्क्रुद्धात्कर्णाद्बिभेति। मम संहारक्षमो हर एतैः पराजितः, एते क्रुद्धं मामपि हन्युरिति यमः कर्णशत्रूणां मारणसंपादनेन सेवापर इति तात्पर्यम्। कृदभिहितो भावो

यया समासादितसाधनेन सुदुश्चरामाचरता तपस्याम्।
एते दुरापं समवाप्य वीर्यमुन्मूलितारः कपिकेतनेन।। २२।।

अन्वयदीपिका

अथानन्तरं करणीयं मुनेरागमनञ्च श्लोकद्वयेनाह। **यया समासादितेति। महत्वयोगेति।** हे नृप! हे प्रदानोचित! हे दानपात्रभूतफलभाक्! अहं तां विद्यां दातुम् आगतोऽस्मि। [किमर्थम्?] महत्त्वयोगाय। प्रकर्षलाभाय। [किं लक्षणां विद्याम्?] देवतानाम् इन्द्रादीनाम्

लघुटीका

'सञ्चित्य सञ्चित्य हि जीवलोके त्रयः पदर्था हृदयं प्रविष्टाः।
इक्षोर्विकारा मतयः कवीनां वराङ्गनापाङ्गविलोकितं च'।।

निरीक्ष्य यानि भयानि तद्विषये पक्षपातो जायेत इत्येवं वा समानकर्तृता प्रतिपाद्या। एवं हि 'य एव मृत्युः निरीक्ष्यते स एव बिभेती'ति भयनिरीक्षणयोः एक एव कर्ता। कृद्विहितो भावः क्रियावद्भवतीति भयशब्दः क्रियावाची, यथा भोक्तुं पाकः, भुक्त्वा गमनं, कृत्वा विरतिः। २१।

एवं विपक्षस्य ज्यायस्त्वं प्रतिपाद्य तदुत्कर्षो यथा भवति तदागमनप्रयोजनाख्यानपूर्वकं दर्शयन् तमाह– हे नृप ! अहं तां विद्यां दातुम् उपागतोऽस्मि। किमर्थम्? महत्त्वयोगाय। प्रकर्षातिशयप्राप्त्यर्थम्। किंभूतां विद्याम्? महामहिम्नां महाप्रभावाणां नृपदेवतानां इन्द्रप्रभृतीनाम् आराधनीम्। अथवा नृप इत्यामन्त्रणपदम्। किं भूतां विद्याम्? प्रदानोचितभूरिधाम्नीं प्रदाने

जोनराजटीका

द्रव्यवद्भवतीत्यत्र द्रव्यं भवतीति कर्तव्येवत्करणं स्वधर्मपरित्यागभावप्रतिपादनार्थम्। कृदभिहितस्य च भावस्य स्वधर्मः क्रियात्वम्। अतो भयशब्दस्य क्रियात्वादभ्रंशे सति क्रियायाश्चापेक्षत्वाद्यमस्य विभीतिक्रियायां कर्तृत्वं ज्ञेयम्। एवं सति निरीक्ष्य यमो बिभेति इत्येकोऽर्थः सिद्धः। अतो निरीक्षणरूपायाः क्रियायाः पूर्वस्याबिभेति क्रियायाश्चोत्तरस्या यम एवैकः कर्त्तेति समानकर्तृकयोरिति क्त्वो ल्यपि निरीक्ष्येति रूपम्।।।२१।।

एवं शत्रुषु वीर्यादिप्रकर्षं सन्दर्श्य तेभ्यः पाण्डवानामाधिक्यप्रतिपादनार्थं पाण्डवानां विद्यादानरूपमागमनप्रयोजनं साक्षाद्विवक्षुराह- तां विद्यां दातुमुपदेष्टुमहमागतः। किमर्थं? महत्वस्य प्रकर्षस्य योगाय प्राप्त्यर्थम्। यतो महान्महिमा यासां याभ्यो वा तासां राजदेवतानां

महत्त्वयोग्याय महामहिम्नामाराधनीं तां नृप ! देवतानाम्।
दातुं प्रदानोचित! भूरिधाम्नीमुपागतः सिद्धिमिवास्मि विद्याम्।।२३।।(युग्मकम्)

अन्वयदीपिका

आराधनीम्। आराध्यते इति आराधनी ताम् आराधनीम्। सम्पादयित्रीम्। [पुनः किं लक्षणां विद्याम्?] भूरिधाम्नीम्। महाप्रभावाम्। ऐन्द्रमन्त्ररूपाम्। [किं लक्षणानां देवतानाम्?] महामहिम्नाम्। महान् महिमा यासां ताः। तासाम्। महानुभावानाम्। प्रदाने उचितं भूरि धाम यस्याः सा। ताम्। एकपदं वा। [कामिव?] सिद्धिमिव। साक्षात्कार्यसिद्धिमिव। विद्यायाः अमोघशक्तित्वोक्तिः। [अत एव] हे प्रदानोचित! हे दानपात्रभूत! फलदातृत्वस्य पात्रत्वोक्तिः। [तां काम्?] यया विद्यया कृत्वा कपिकेतनेन अर्जुनेन एते पूर्वोक्ताः भीष्मादयः योद्धारः उन्मूलयितारः निर्मूलाः करिष्यन्ते। उन्मूलयन्तीत्यर्थः। कपिः हनुमान् केतनं चिह्नं यस्य सः। तेन। [पुनः किं लक्षणेन कपिकेतनेन?] तपस्यां तपश्चर्यां चरता कुर्वता। [किं लक्षणां तपस्याम्?] दुश्चराम् अतिदुस्तराम्। [पुनः किं लक्षणेन कपिकेतनेन?] समासादितसाधनेन। समासादितं प्राप्तं पाशुपतास्त्ररूपं साधनं येन सः। तेन। [किं कृत्वा?] अस्य युधिष्ठिरस्य वीर्यं पराक्रमं दुरापं दुर्बलं समवाप्य

लघुटीका

उचितो योग्यो भूरिधामा महातेजाः सत्त्वाधिकोऽर्जुन एव एवंविधो यस्याः सा तथाविधा ताम्। कामिव सिद्धिमिव। अभीष्टार्थनिष्पत्तिमिव। तां कां विद्याम्? यया सुदुश्चरां तपस्यां तपःक्रियाम् आचरता कुर्वता सतासमासादितसाधनेन। सम्यगर्जितपाशुपताद्यस्त्रग्रामेण। त एव दुरापं दुर्लभं वीर्यं पौरुषातिशयं समवाप्य प्राप्य कपिकेतनेन अर्जुनेनैते भीष्मादय उन्मूलितारः उन्मूलयिष्यन्ते। तामेवंविधां विद्यां दातुम् अर्जुनायैवाहम् आगतोऽस्मीति। उन्मूलितारः कर्मणि लुट्। तपश्चरणं तपस्या। तपसः 'कर्मणो रोमन्थतपोभ्यां

जोनराजटीका

सेवनीयम्। अतः प्रदानायोचितो युक्तो भूरिधामा तेजस्वी यस्याः तेजोरहितेनोग्रदेवताना-माराधयितुमशक्यत्वात्। तां विद्याम्। काम्? यया करणभूतया समासादितं प्राप्तं साधनं तपश्चरणोपायो येन। अतः सुदुश्चरां तपस्यां तपः कुर्वता सताऽर्जुनेन दुष्प्रापं वीर्यं प्राप्यते शत्रव उन्मूलितारो हन्तारः उन्मूलितार इति कर्मणि लुटिरूपम्।२२।।२३।। युग्मम्।।

इत्युक्तवन्तं व्रज साधयेति प्रमाणयन्वाक्यमजातशत्रोः।
प्रसेदिवांसं तमुपाससाद वसन्निवान्ते विनयेन जिष्णुः।। २४।।

अन्वयदीपिका

ज्ञात्वा। अन्यथा उन्मूलयितुमशक्य इति भावः।। २२।। २३।।

इत्युक्तवन्तमिति। जिष्णुः जयनशीलोऽर्जुनः विनयेन अनौद्धत्येन तं मुनिं व्यासम् उपाससाद प्राप। [किं कुर्वन्?] हे अर्जुन! त्वं व्रज गच्छ साधय, अनुष्ठानं कुरु इत्येवं रूपम् अजातशत्रोः धर्मराजस्य वाक्यं प्रमाणयन् प्रमाणीकुर्वन्। [किं लक्षणं मुनिम्?] इति पूर्वोक्तप्रकारेण उक्तवन्तं भाषमाणम्। [पुनः किं लक्षणं मुनिम्?] प्रसेदिवांसम्। प्रसन्नम्। [क इव?] अन्ते वसन्निव। छात्र इव। यथा अन्तेवासी शिष्यः विनयेन स्तुत्या कृत्वा गुरुम् उपासीदति। तद्वत्। 'अन्तेवासिनौ शिष्या'वि**त्यमरः**।। २४।।

लघुटीका

वर्तिचरोः'<३.१.१५> इति क्यङ्।।२२।२३।

भगवदादिष्टं कार्यं व्रज गच्छ, साधय निष्पादय इत्येवं विधम् अजातशत्रोः युधिष्ठिरस्य सम्बन्धि वाक्यं वचनं प्रमाणयन्ननुतिष्ठन् सन् जिष्णुरर्जुनः तं मुनिम् आससाद। समीपे उपाविशदित्यर्थः। कीदृशं मुनिम्? प्रसेदिवांसं प्रसन्नं प्रसादाभिमुखम्। कथमुपाससाद? विनयेन प्रह्वतयाऽन्ते वसन्निव शिष्य इव तम्। यथाऽन्तेवासी शिष्यो विनयेन गुरुम् उपासीदति निकटीभवति तथा उपाससाद। तथा व्रजेति पूर्ववल्लोकोक्तिरेव न तु गमनमेव विधीयते तस्याः प्रस्तुत्वात्।२४।

जोनराजटीका

इति पूर्वोक्तयुक्त्योक्तवन्तं प्रसेदिवांसं तं व्यासं जिष्णुरर्जुनो विनयेनोपाससादागमत्। अत उत्प्रेक्षते- अन्तेवसन् सच्छिष्य इव। अर्जुनस्य व्याससमीपगमनेन तेजस्विमानितां दर्पमाशङ्क्याह- त्वं व्रज, त्वं साधयेति युधिष्ठिरस्य वाक्यमाज्ञां प्रमाणयन् प्रमाणं कुर्वन्, न तु तेजस्वित्वं स्वात्मनि सम्भावयन्। हेतावर्थे शतृप्रत्ययः।।२४।।

निर्याय विद्याथ दिनादिरम्याद् बिम्बादिवार्कस्य मुखान्महर्षेः।
पार्थाननं वह्निकणावदाता दीप्तिः स्फुरत्पद्ममिवाभिपेदे।। २५।।

अन्वयदीपिका

निर्यायेति। अथानन्तरं विद्या पार्थाननम् अभिपेदे प्राप्तवती। [किं कृत्वा?] महर्षेः व्यासस्य मुखात् वदनात् निर्याय निर्गत्य निस्सृत्य। [किं लक्षणा विद्या?] वह्निकणावदाता। अग्निस्फुलिङ्गा इव अवदाता उज्ज्वला देवतासान्निध्यात्। विद्या तु रुद्रमन्त्ररूपा। [कामिव?] दीप्तिप्रभा पद्ममिव। यथा दीप्तिप्रभा पद्मं कमलं प्रविशति। [किं कृत्वा?] अर्कस्य सूर्यस्य बिम्बात् मण्डलात् निर्गत्य निस्सृत्य। [किं लक्षणात् बिम्बात्?] दिनादिरम्यात्। दिनादौ प्रभाते रम्यं दिनादिरम्यं तस्मात्। [किं लक्षणा दीप्तिः?] वह्निकणावदाता उज्ज्वला। [किं लक्षणं पद्मम्?] स्फुरत् विकसत्। उपमालङ्कारः।। २५।।

लघुटीका

स भगवान् तम् अर्जुनं विद्यामध्यापितवान्। अथानन्तरं विद्या तस्याध्यापयतो महर्षेर्मुखान्निर्याय निर्गता पार्थाननमर्जुनमुखमभिपेदे प्राविक्षत्। किं भूता विद्या? वह्निकणावदाता वह्निकणैः स्फुलिङ्गैरवदाता। तेजःस्फुलिङ्गोज्ज्वला। किं भूतं पार्थाननं? स्फुरत्। अक्षरोच्चारणवशाच्चलदोष्ठम्। कुतः केव किमिवेत्याह? अर्कस्य बिम्बादिव दीप्तिः पद्ममिव। यथा दिनादिरम्यात् दिनप्रारम्भरम्यात्। अर्कस्य बिम्बात् निर्याय निर्गत्य वह्निकणावदाता अग्निस्फुलिङ्गवदुज्ज्वला दीप्तिः स्फुरत्पद्ममभिपद्यते तथा इत्यर्थः। मुख्यः तावदयं कल्पो यद्यावन्त्युपमानोचितानि पदानि तावताम् इवादीनां प्रतिपदं प्रयोगः। यथा च-

आक्षिप्तो जयकुञ्जरेण तुरगान् निर्वर्णयन् वल्लभान्
सङ्गीतध्वनिनाहतः क्षितिभृतां गोष्ठीषु तिष्ठेत् क्षणम्।
सद्यो विस्मृतसिंहलेन्द्रविभवः कक्षाप्रदेशेष्वहो !
द्वाःस्थेनेव कुतूहलेन महता याम्यो यथाऽहं वृतः।।

जोनराजटीका

दिनादौ प्रभाते रम्यात्प्राप्तोदयादादित्यमण्डलान्निर्याय यथा दीप्तिर्विकसत्पद्ममभिपद्यते तथा महर्षेर्मुखान्निर्गत्य वह्निकणैस्तद्वद्वाऽवदाता दीप्ता विद्या पार्थमुखं प्राविशत्। अत एव स्फुरद्विकसत्।।२५।।

योगं च तं योग्यतमाय तस्मै तपः प्रभावाद्वितताार सद्यः।
येनास्य तत्त्वेषु कृतेऽवभासे समुन्मिमीलेव चिराय चक्षुः।। २६।।

अन्वयदीपिका

योगञ्च तमिति। सः मुनिः व्यासः विधिवत् वेदोक्तप्रकारेण सद्यः तत्क्षणं तत्कालमेव तं योगम् अरिहननसाधनोपायं तस्मै अर्जुनाय विततार ददौ। [कस्मात्?] तपः प्रभावात्। तपसः प्रभावः तपःप्रभावः। तस्मात्। [तं कम्?] येन योगेन कृत्वा तत्त्वेषु प्रकृतिमहदादिषु अवभासे सति साक्षात्कारे कृते सति अस्य अर्जुनस्य चक्षुः चिराय चिरकालाय समुन्मिमीलेव उन्मिषितमिव उद्घाटितमिव इत्युत्प्रेक्षा। [किं लक्षणाय तस्मै?] योग्यतमाय। अखिलाज्ञाननाशनः

लघुटीका

गीतेऽपलापिस्फुरिते शरीरवत् गजान्तकेनान्तमदान्तकर्मणा।
सञ्चेरुरात्मान इवापरं क्षणात् क्षमारुहं देहमिव प्लवङ्गमाः।।

यत्रापि बहुषु उपमानेषु सत्सु एकस्यैवोपमावाचिनः इवादेः प्रयोगस्तत्राऽपि सर्वैरेव सम्बन्धे कृते सत्युपमा परिपूर्णा भवति। यत्र तु बुहषूपमानेषु सत्सु द्वौ द्वौ बहवो वा इवादयो भवन्ति तत्र विशेषपरिपूर्णा उपमा भवति। गतार्थत्वात् बहूनां <न> प्रयोगः। यथा-

युवा प्रवासोपगतः प्रियामुखात् मुखासवं पश्य पिबन्न तृप्यति।
शिलीमुखस्तोयदकालविप्लवात् चिराय लब्धं मधु पङ्कजादिव।।

अत्र हि शिलीमुख इव तोयदकालविप्लवादिव मधुप इव इति व्याख्येयम्।२५।

न केवलं विद्यां ददौ यावत्तं तथाभूतं योगं पातञ्जलादिनिर्दिष्टं समाधिविशेषं तस्मै अर्जुनाय तपः प्रभावात् सद्यः तत्क्षणमेव विततार ददौ। येन योगेन दत्तेन सता तदैव तत्त्वेषु प्रकृत्यादिषु चतुर्विंशतौ अवभासे दर्शने कृते सति अस्यार्जुनस्य चक्षुश्चिराय समुन्मिमीलेव।

जोनराजटीका

अतियोग्यायार्जुनाय स व्यासस्तपःप्रभावबलाद्योगं तमदात्। येन योगेन तत्त्वेषु पञ्चविंशतिसङ्ख्येषु अवभाते प्रकाशने कृते चक्षुः समुन्मिमीलेव विकासमिव प्रापत्। अदृष्टपूर्वं तदेव दृष्ट्वा स्वनेत्रं तदैवोन्मीलितमज्ञासीत्।।२६।।

आकारमाशंसितभूरिलाभं दधानमन्तःकरणानुरूपम्।
नियोजयिष्यन्विजयोदये तं तपःसमाधौ मुनिरित्युवाच।। २७।।

अन्वयदीपिका

तत्त्वावभासः चिरादन्धस्य दृष्टिलाभ इवास्य जातः इति भावः। उत्प्रेक्षालङ्कारः।। २६।।

आकारेति। मुनिः व्यासः इति वक्ष्यमाणं वाक्यम् उवाच। [किं करिष्यन्तम् अर्जुनम्?] तपःसमाधौ तपोनियमे नियोजयिष्यन् नियोजयितुमिच्छन्। [किं लक्षणे तपः समाधौ?] विजयोदये विजयस्य फलके। [किं लक्षणं तम्?] आशंसितभूरिलाभम्। आशंसितः आख्यातः कथितः भूरिलाभः अनेकाश्रयप्राप्तिर्येन असौ। आशंसितभूरिलाभः। तम्।

लघुटीका

चतुर्विंशतितत्त्वानां दर्शनात् तदानीं चिरेण कालेन चक्षुष्मानिव सम्पन्नः। तत्त्वावभासकारिणो योगस्य जन्मसहस्रसाध्यस्य सद्यः प्रतिपादनं तपःप्रभावात् क्रियाफलाश्रयत्वेन घटते। विततार ददौ। प्रकृतिर्महान् अहङ्कारो मनश्च इत्यन्तःकरणचतुष्टयम्। पञ्चतन्मात्राणि शब्द-स्पर्श-रस-रूप-गन्धाः। पञ्च बुद्धीन्द्रियाणि त्वक्-चक्षुषी-नासिका-श्रोत्र-जिह्वाः। पञ्च कर्मेन्द्रियाणि हस्त-पाद-पायु-उपस्थ-वाक्। पञ्च तन्मात्राणि चलनादान-ग्रहण-विसर्जनाऽजल्पनानि। पञ्च भूतानि पृथ्वी-आपस्तेजो-वायुःआकाशम् इत्याख्यानि। चतुर्विंशतितत्त्वान्येतानि, पञ्चविंशतितमः पुरुषो निर्गुण इति तत्त्वदृष्टिनिपुणाः प्रचक्षते।२६।

मुनिस्तमर्जुनमित्येवं वक्ष्यमाणमुवाच। किं कुर्वन्? समाधिदीक्षा तपोऽर्थः। समाधिः तपः। तस्मिन् नियोजयिष्यन् नियोजयितुम् इच्छन्। किं भूतं तपः? समाधौ विजयोदये विजय उदयः फलं यस्य स तथा। तस्मिन् विजयफले इत्यर्थः। किं भूतं तम्? उन्नतिमतोऽन्तः करणस्य। मनसोऽनुरूपं सदृशम् उज्ज्वलं मुखरागादनुमीयमानम् आकारं रूपं दधानं

जोनराजटीका

अन्तःकरणानामनुगुणं तथा शंसितः संभावितः भूरिः लाभो येन तमाकारं दधानमर्जुनं मुनिरित्यकथयत्। किं करिष्यन्? विजयेनोदयो यस्मात्तस्मिंस्तपोऽर्थे समाधौ नियोजयिष्यन् प्रयोक्ष्यमाणः।।२७।।

अनेन योगेन समिद्धतेजा निजां परस्मै पदवीमयच्छन्।
समाचराचारमुपात्तशस्त्रो जपोपवासाभिषवैर्मुनीनाम्।। २८।।

अन्वयदीपिका

महाभाग्यसूचकम्। आकारं मूर्तिं दधानम्। [किं लक्षणम् आकारम्?] अन्तःकरणानुरूपम्। अन्तःकरणशब्देन तद्वृत्तिरुत्साहो लक्ष्यते। तदनुरूपम्। तदनुकूलमित्यर्थः। उत्साहानुगुणव्यापारक्षमम्। "समाधिर्नियमे ध्याने" इति **विश्वः**।।२७।।

किमुवाचेत्याह। **अनेने**ति। हे अर्जुन! त्वं जपोपवासाभिषवैः स्वाध्यायानशनस्नानैः मुनीनां तपस्विनाम् आचारम् अनुष्ठानम् आचर सम्यक् अनुतिष्ठ। अनुष्ठानं कुरु। जपश्च उपवासश्च अभिषवश्च ते जपोपवासाभिषवाः। तैः जपोपवासाभिषवैः। जपः स्वाध्यायः मन्त्रावृत्तिर्वा। उपवासः अनशनम्। अभिषवः स्नानं तैः। [किं लक्षणस्त्वम्?] अनेन योगेन विवृद्धतेजाः। विवृद्धं समृद्धं तेजो बलं यस्य सः विवृद्धतेजाः। अनेनेति स्वोपदिष्टेनेत्यर्थः।

लघुटीका

बिभ्राणम्। किं भूतमाकारम्? अत एव आशंसितभूरिलाभम्। अशंसितोऽनुमितो भूरिलाभो यत्र स तथा तम्। अन्तःकरणं मन एवात्र।२७।

जपस्स्वाध्यायः। उपवासोऽनशनम्।अभिषवः स्नानम्। जपोपवासाभिषवैः करणभूतैः मुनीनां सम्बन्धिनम् आचारं धर्मं समाचर अनुतिष्ठ। किं कुर्वन्? निजां पदवीमात्मीयं मार्गमन्यस्मै अयच्छन् अददन् सन् आचारं समाचर। किं भूतः त्वम्? अनेन मदुपदिष्टेन योगेन समाधिना समिद्धतेजा विवृद्धपौरुषः। पुनः कीदृक्? उपात्तशस्त्रः। गृहीतहेतिसमूहः सन् तपः कुर्याः। इत्यनेन योगेन एवं कथितमुपदिष्टं विधिं पालयन् सन्नाचारं समाचर। अत्र च प्रयोजनं पुरस्तात् प्रकटयिष्यते।।२८।

जोनराजटीका

अनेन योगेन दीप्ततेजास्तथा गृहीतशस्त्रः सन् स्वां पदवीं स्वसमीपागमनमन्यस्मै अददन् त्वं जपोपवासस्नानैः ऋषीणामाचारं सेवस्व ऋषिवत्तपः कुरुष्वेत्यर्थः। परस्परविरुद्धानां जपादि-शस्त्राणां ग्रहणस्य प्रयोजनमग्रे व्यक्तिमेष्यति। तपस्यतोऽपि शस्त्रधारणाज्ञायाः प्रयोजनमग्रे सुज्ञानम्।।२८।।

करिष्यसे यत्र सुदुष्कराणि प्रसत्तये गोत्रभिदस्तपांसि।
शिलोच्चयं चारुशिलोच्चयं तमेष क्षणान्नेष्यति गुह्यकस्त्वाम्।। २९।।

अन्वयदीपिका

[पुनः किं लक्षणस्त्वम्?] उपात्तशस्त्रः। उपात्तं गृहीतं शस्त्रम् आयुधं येन सः उपात्तशस्त्रः। गृहीतायुधः। [किं कुर्वन्?] निजां स्वां पदवीं परस्मै परस्य प्रवेशं मार्गम् अयच्छन्। असमर्पयन्। न ददन्।। २८।।

क्षेत्रविशेषे तपः सिद्धिरित्याशयेन तां निदर्शयन्नाह- **करिष्यसे** इति। पुनः किमुवाचेत्याह- हे अर्जुन! एषः गुह्यको यक्षः क्षणात् क्षणमात्रेण अनायासेन शिलोच्चयं त्वां नेष्यति। प्रापयिष्यति। एष इति अनन्तरमेवास्य पुरःप्रादुर्भावान्निर्देशः। गुह्यम् अन्तःकरणाभिप्रायं कायति कथयति इति गुह्यकः। धातूनामनेकार्थत्वात्। [तं कम्?] यत्र यस्मिन् शिलोच्चये वर्तमानः त्वं तपांसि करिष्यसे। चरिष्यसे। [किमर्थम्?] गोत्रभिदः इन्द्रस्य प्रसक्तये प्रसादाय। प्रसक्तिः प्रसाद उच्यते। [किं लक्षणानि तपांसि?] सुदुष्कराणि अतिकठिनानि। [किं लक्षणं शिलोच्चयम्?] चारु शिलोच्चयम्। चारवः रम्याणि शिलोच्चयाः शिखराणि यस्य सः चारुशिलोच्चयः। तम्। इन्द्रनीलगिरिम्। "अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः" **इत्यमरः**।। २९।।

लघुटीका

एष गुह्यकस्त्वां तं पर्वतं नेष्यति प्रापयिष्यति। तं कम्? यत्र शिलोच्चये त्वं सुतरां दुश्चराणि तपांसि करिष्यसि। किमर्थम्? गोत्रभिद इन्द्रस्य प्रसत्तये इन्द्रं प्रसादयितुम् इत्यनेन न तपः प्रयोजनम् अभिहितम्। क्षेत्रविशेषे हि तपोऽचिरात्फलातिशयं पुष्यतीति देशविशेषनिर्देशः। किं भूतम्? शिलोच्चयं चारुशिलोच्चयम्। चारवः शिलानाम् उच्चा राशयो यत्र स तथा तम्। शिलोच्चय इति एवं रूढिः। गुह्यको यक्षः।२९।

जोनराजटीका

इन्द्रस्य प्रसादनाय यत्र शैले तपांसि विधास्यसे मनोहारि सानुं शैलं त्वामेष यक्षः क्षणान्नेष्यति प्रापयिष्यति। स्वापेक्षया यक्षाणां नीचप्रायतामानित्वाद्यक्षं प्रति स्वयमाज्ञादानाभावः। स्थानविशेषेण गुणेन तपःसिद्धिदर्शनादन्यत्रार्जुनस्य गमनमाज्ञप्तम्।।२९।।

इति ब्रुवाणेन नरेन्द्रसूनुं महर्षिणा तेन तिरोबभूवे।
तं राजराजानुचरोऽस्य सद्यः प्रदेशमादेश इवाधितस्थौ।। ३०।।

अन्वयदीपिका

इति ब्रुवाणमिति। तेन महर्षिणा व्यासेन तिरोदधे बभूवे अन्तर्द्धानं प्रापे। भावे प्रयोगः। [किं लक्षणेन तेन?] इति पूर्वोक्तं महेन्द्रसूनुम् अर्जुनं ब्रुवाणेन उक्तवता। वर्तमानसामीप्ये वर्तमानवद्वेति भूतप्रयोगः निधानस्य अविलम्बनसूचनार्थः। राजराजानुचरः सेवको यक्षः पूर्वोक्तः अस्य मुनेः व्यासस्य। तं प्रदेशं स्थानम् अर्जुनाधिष्ठितं प्रदेशम् अधितस्थौ। प्राप्तः। राजराजस्य कुबेरस्य अनुचरः राजराजानुचरः। क इव? आदेश इव। आदेश इव मुनेः स्थानं प्राप्त [इव]। "राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियराजयोः" इति **विश्वः**। उपमालङ्कारः।। ३०।।

लघुटीका

नरेन्द्रसूनुम् अर्जुनम् इति ब्रुवाणेन इति पूर्वोक्तं वदता तेन महर्षिणा द्वैपायनेन तिरोबभूवे अन्तर्हितम्। अस्य च महर्षेः सम्बन्धिनं तं प्रदेशं राजराजानुचरो गुह्यकः सद्योऽधितष्ठौ(स्थौ?) अध्यारूढः। यत्र स्थाने महर्षिणा स्थितमभूत् तत् स्थानं स वैश्रवणानुचरः सद्यः तत्क्षणादेवाध्यासामास। यथा कः कमधितिष्ठति। आदेशः प्रदेशमिव। यथा स्थानिनोऽस्त्यादेः प्रदेशम् आदेशोऽन्वादिरधितिष्ठति। अस्तेर्भूरसार्वधातुके। असधातोः प्रदेशे भूरादेशो भवति तथेत्यर्थः।३०।

जोनराजटीका

एवं पार्थं वदता व्यासेनान्तर्दधे यथास्त्यादिकं स्थानं भ्वादिरादेशस्तथा तं प्रदेशं यक्ष आश्रितवानित्यर्थः।।३०।।

कृतानतिर्व्याहृतसान्त्ववादे जातस्पृहः पुण्यजनः सजिष्णौ।
इयाय सख्याविव सम्प्रसादं विश्वासयत्याशु सतां हि योगः।। ३१।।

अन्वयदीपिका

कृतानतिरिति। सः पुण्यजनो यक्षः तस्मिन् अर्जुने संप्रसादं विस्रम्भं विश्वासम् इयाय प्राप। [किं लक्षणः पुण्यजनः?] जातस्पृहः उत्पन्नाभिलाषः। [कस्मिन्निव?] सख्याविव। यथा मित्रे सुहृदि लोकः विश्वसिति। कृतानतिः। कृताऽऽनतिर्नमस्कारो येन असौ कृतानतिः। [किं लक्षणे तस्मिन्?] जिष्णौ जयनशीले। व्याहृतसान्त्ववादे। व्याहृतः उक्तः सान्त्ववादः प्रियवचनं येन असौ व्याहृतसान्त्ववादः, तस्मिन्। हि युक्तोऽयमर्थः। सतां साधूनां योगः सङ्गतिः आशु शीघ्रं विश्वासयति। विश्वासं कारयति।।। ३१।।

लघुटीका

स पुण्यजनो यक्षः तस्मिन्नर्जुने जिष्णौ जातस्पृहः सञ्जाताभिलाषः सन्सख्यौ इव सन्मित्रे इव सम्प्रसादमियाय विश्वासं जगाम। किं भूते जिष्णौ? व्याहृतः उद्गीर्णः। सान्त्ववादः प्रेमवचनं येन स तथा तस्मिन् व्याहृतसान्त्ववादे, अभिहितप्रीतिवचने। युक्तमेतत्। यद्व्याहृतसान्त्ववादे एव सजिष्णौ सम्प्रसादमियाय। हि यस्मात् कारणात् सतां साधूनां योगाः साधुभिः सह समागम आशु झटिति प्रागेव विश्वासयति विश्वासं जनयति। किं भूतः पुण्यजनः? कृतानतिः कृता विहिता आनतिः नमस्कारो येन स तथा। स्पृहा अत्र सिषेविषा।३१।

जोनराजटीका

कृतप्रणामो यक्षो मित्रे इवार्जुने उक्तसिद्धकथने प्रसादमाप। भिन्नजातीयो यक्षः जिष्णावपि सद्यः कथं स प्रासीददित्याह- सतां सङ्घट्टस्तूर्णं विश्वासयति। सतां दर्शनमात्रादेव विश्वासो जायत इत्यर्थः।।३१।।

अथोष्णभासेव सुमेरुकुञ्जान्विहीयमानानुदयाय तेन।
बृहद्द्युतीन्दुःखकृतात्मलाभं तमः शनैः पाण्डुसुतान्प्रपेदे।। ३२।।

अन्वयदीपिका

अथेति। तमो मोहः शोकः पाण्डुसुतान् युधिष्ठिरादीन् चतुरो भ्रातॄन् शनैः शनैः मन्दं मन्दं प्रपेदे प्राप। तेषां विवेकित्वात्। भीतभीतमिवेत्युत्प्रेक्षा। [किं लक्षणान् पाण्डुसुतान्?] तेन अर्जुनेन उदयाय यशसे विहीयमानान् त्यज्यमानान्। बृहद्द्युतीन् अनेकबुद्धिप्रकाशान्। [किं? कानिव?] तमः अन्धकारः सुमेरुकुञ्जानिव। यथा तमोऽन्धकारः सुमेरुकुञ्जान् प्राप्नोति। [किं लक्षणान् सुमेरुकुञ्जान्?] उष्णभासा सूर्येण उदयाय विहीयमानान् त्यज्यमानान्। बृहद्द्युतीन् सौवर्णत्वाद्दीप्यमानान्। तमसः सङ्कोचे कारणोक्तेः सुमेरुकुञ्जानीत्यत्र सुमेरुग्रहणं कुञ्जानां सौवर्ण्यद्योतनार्थम्। [किं लक्षणं तमः?] दुःखकृतात्मलाभम्। दुःखेन कृतः आत्मलाभः स्वोत्पत्तिर्यस्य तत्। तेषाम्। विवेकित्वात् कथञ्चित् लब्धोदयमित्यर्थः।। ३२।।

लघुटीका

अथ अनन्तरं तमो मोहः पाण्डुसुतान् युधिष्ठिरादीन्प्रपेदे प्राप। विशेषणद्वारेण दुःखनिमित्तमाह। किं भूतान्? तेन अर्जुनेन उदयाय उदेतुम् उदयार्थं विहीयमानान् वियुज्यमानान्। कथं प्रपेदे? शनैः मन्दं प्रपेदे न तु सहसैवेत्याह। यतः किं किं भूतान्? बृहद्द्युतीन् अतितेजस्विनः। किं भूतं तमः? दुःखकृतात्मलाभम्। दुःखेन कृतेन शोकेन कृतात्मलाभो येन तत्तथा। कानिव केनेव विहीयमानान् किमिव प्राप्नोति तमः सुमेरुकुञ्जानिव। यथा नैशं तमस्तिमिरं सुमेरुकुञ्जान् उष्णभासा, श्रीः सूर्येण विहीयमानान् सतः प्रपद्यते। किं भूतान्? बृहद्द्युतीन् सौवर्णत्वात् अतिदीप्तिमतः। अत एव किं भूतं तमः? दुःखकृतात्मलाभम्। दुःखेन कथं कथञ्चित् कृच्छ्रेण कृत आत्मलाभः आत्मस्वरूपं येन ततः। यथा नैशं तमः

जोनराजटीका

तमो मोहस्तान्पाण्डुसुताञ्छनैः प्रपेदे। विवेकं जित्वा प्रविवेशेत्यर्थः। दुःखेन शोकेन कृत आत्मलाभो यस्य शोकजातमित्यर्थः। कुतः शोक इत्याह- उदयप्राप्त्यर्थं तेन विहीयमानान्विशेष्यमाणान्। यथोदयार्थं सूर्येण उल्लङ्घ्यमानान्सुमेरोर्गह्वरप्रदेशांस्तमः प्राप्नोति। तच्च दुःखेन कृश्छ्रेण कृतात्मलाभं तेषां हिरणमयत्वात्।।३२।।

असंशयालोचितकार्यनुन्नः प्रेम्णा समानीय विभज्यमानः।
तुल्याद्विभागादिव[1] तन्मनोभिर्दुःखातिभारोऽपि लघुः स मेने।। ३३।

अन्वयदीपिका

असंशयेति। कर्तृभिः[भ्रातृभिः?] सः दुःखातिभारोऽपि दुःखातिभारभूतमपि लघुः अल्पः मेने ज्ञातः। दुःखमेव अतिभारः दुःखातिभारः। अतिशयदुःखम्। यथा एको भारः अनेकधा बहुभिर्विभज्य उह्यमानो लघुर्मन्यते तद्वत्। तन्मनोभिः। तेषां युधिष्ठिरादीनां चतुर्णां **मनोभिरन्तःकरणैरित्यर्थः।** [किं लक्षणः दुःखातिभारः?] असंशयालोचितकार्यनुन्नः। असंशयम् असन्दिग्धं यथा स्यात्तथा आलोचितं विवेचितं यत् कार्यं तेन नुन्नः। कार्यगौरवं विचिन्त्य विचार्य निरस्तः त्यक्तः। [किं लक्षणः दुःखातिभारः?] पुनः प्रोम्णा स्नेहेन भ्रातृणां वात्सल्येन कर्त्रा समानीय विभज्यमानः। समशो भागीक्रियमाणः तुल्यस्नेहानां तुल्यदुःखमपि भवतीति

लघुटीका

शनैः सुमेरुकुञ्जानाक्रामति तथा। उदयः स्वपदप्राप्तिः। सूर्यपक्षे उदयः आविर्भावः। कुञ्जो वृक्षादिखण्डः।३२।

अर्जुनप्रवासजन्मना दुःखातिभारेण सर्वे विपूर्वं निर्विकल्पमाक्रान्ताः अनन्तरं तदीयैर्मनोभिः स दुःखातिभारोऽपि लघुः मेने। किं भूतः? असंशयालोचितकार्यनुन्नः। असंशयं निश्चितमालोचितेन कार्येण परिगणितेन कार्येण फलप्राप्तिलक्षणेन नुन्नः प्रेरितः। अपासित इति यावत्। भगवदादेशो नान्यथा भवतीति कृत्वा कार्यपर्यालोचनया नुन्नोऽपि

जोनराजटीका

अर्जुने स्नेहवशात्प्रथममानीय ततोऽसंशयं कृत्वाऽऽलोचितं कर्तव्यरूपतया निश्चितं यत्कार्यं तेन नुन्नोऽल्पीकृतः स पार्थप्रवासजन्मा दुःखातिभारोऽपि लघुर्मेने सम्भावितः। अत्रोत्प्रेक्ष्यते- तुल्याद्विभागात्समांशकल्पनया विभज्यमान इव। अत्र विवेकेन कृते शोकाल्पीकारे विभजनं हेत्वन्तरमुत्प्रेक्षितम्। यच्च विभज्यते तच्च लघूभवति। अथवा पतितः शोकातिभारो निश्चितेन कार्येण नुन्नः। पुनरपि प्रेम्णाऽऽनीय तुल्याद्विभागाद्विभज्यमानः शोकातिभारोऽपि तैर्लघुरिव मेने इति योज्यम्। वक्ष्यमाणहेतुभिः शोकमुक्ताः कथमपि बभूवुरित्यर्थः।।३३।।

१. वियोगादिवेति प्रकाशवर्षपाठः।

धैर्येण विश्वास्यतया महर्षेस्तीव्रादरातिप्रभवाच्च मन्योः।
वीर्यं च विद्वत्सु सुते मघोनः स तेषु न स्थानमवाप शोकः।। ३४।

अन्वयदीपिका

भावः। उत्प्रेक्षते-तुल्याद्विभागादिव। पूर्वोक्तात् प्रेमकृतात् समभागादेव। वस्तुपरिमाणादेव पुनर्विभागग्रहणम्। तस्य हेतुत्वोत्प्रेक्षा। उपमालङ्कारः।। ३३।।

अथैवं प्रेम्णा आकृष्यमाणमपि शोकं विवेको निर्जिगायेत्याह- **धैर्येणेति**। सः शोकः दुःखं तेषु चतुर्षु पार्थेषु पदं स्थानं न अवाप। नाकरोदित्यर्थः। [तत्र हेतूनाह] - तेषां पार्थानां धैर्येण निर्विकारचित्तत्वेन। महर्षेः व्यासस्य प्रवर्तकस्येति विशेषः। विश्वास्यतया धैर्यवचनत्वेन श्रद्धेयवचनत्वेन। तीव्रात् दुःसहात् अरातिप्रभवात् अरातिंहेतुकात् मन्योः क्रोधाद्धेतोः अर्जुनस्य प्रभावपरिज्ञानाच्च। [हेत्वन्तरं विशेषणद्वारेणाह। किं लक्षणेषु पार्थेषु?] मघोनः सुते अर्जुने वीर्यं पराक्रमं **विद्वत्सु**। ज्ञातवत्सु।। ३४।।

लघुटीका

प्रेरितोऽपि पुनः प्रेम्णा समानीय आकृष्य सर्वेषामपि विभज्यमानः। स्नेहवशात् सर्वेषामेव पुनरागत इत्यर्थः। एतेन स्नेहात् पुनरागतोऽपि यथा प्रथमं दुःसह आसीन्न तथा पुनरित्युक्तं भवति। उत्प्रेक्षते-तुल्यात् वियोगादिव इति। पञ्चधा विभज्य समभागादागतैकभागभारतया इव लघुर्मतः। सुमहानपि भारः समभागेन बहूनां भागीकृतः सन् लघीयान् भवति सुबहुत्वात्।३३।

स्नेहादुत्पन्नोऽपि स शोकः तेषु युधिष्ठिरादिषु स्थानं विश्रान्तिं नावाप न लेभे। क्षणेनैव विररामेत्यर्थः। केन हेतुना स्थानं न लेभे? धैर्येण धीराकृतितया तथा महर्षेः विश्वास्यतया। विश्वासे साधुः विश्वास्यः। तद्भावो विश्वास्यता तया, महर्षेः विश्वसनीयत्वात्। हेतौ तृतीया। तथा च तीव्रात् दुःसहादरातिप्रभवान्मन्योः परिभवात्। प्रभवन्त्यस्मादिति प्रभवः। अरातिः प्रभवो यस्य स तथा, तस्मात्। तीव्रात् दुःसहात् परिभावाच्च।

जोनराजटीका

निजेन धैर्येण तथा व्यासस्य विश्वासभावेन तथा तीव्राच्छत्रुजाताच्च रोषात् तथेन्द्रस्य पुत्रे पौरुषं जानत्सु तेषु स शोको न स्थितिं प्रापत्। धैर्यादिहेतुचतुष्टयेन शोकस्तेभ्योऽपससारेत्यर्थः।।३४।।

तान्भूरिधाम्नश्चतुरोऽपि दूरं विहाय यामानिव वासरस्य।
एकौघभूतं तदशर्म कृष्णां विभावरीं ध्वान्तमिवाभिपेदे।। ३५।।

अन्वयदीपिका

तानिति। अशर्म पूर्वोक्तम् असुखम् एकौघभूतं सत् कृष्णां द्रौपदीम् अभिपेदे प्राप। [किं कृत्वा?] चतुरः तान् पार्थान् दूरं यथा भवति तथा विहाय। निरस्य। [किं लक्षणान् तान्?] भूरिधाम्नः। तेजस्विनः। [किं? कामिव?] ध्वान्तम् अन्धकारं विभावरीं रात्रिमिव। यथा ध्वान्तम् अन्धकारं भूरिधाम्नः वासरस्य दिवसस्य चतुरः यामान् प्रहरान् दूरं यथा भवति तथा विहाय। निरस्य। एकौघभूतं सत् कृष्णां कृष्णपक्षगतां विभावरीं प्राप्नोति तद्वत्। 'शर्म शातसुखानि चे'**त्यमरः**। अशर्मेति नञ्-समासः।। ३५।।

लघुटीका

परिभवप्रतिकारचिकीर्षया इत्यर्थः। 'विभाषा गुणे'स्स्त्रियामि'ति योगविभागाद्धेतौ पञ्चमी। यथा 'लुब्योगे पञ्चम्युपसङ्ख्यानम्' इति पञ्चमी। तथा च मघोन इन्द्रस्य सुते अर्जुने च पौरुषातिशयं वीर्यं विद्वत्सु जानत्सु तेषु इत्येतत्समानाधिकरणमपि विशेषणमपि शोकनिवृत्तौ हेत्वन्तरं युक्तम्। ३४।

अर्जुनं बाधितुं न कश्चिदपि समर्थ इति मन्यमानेषु- य एवं तेषु युधिष्ठिरादिषु स शोकः पूर्वोक्तात् हेतुचतुष्टयाच्चिरं न अतिष्ठत्। अतः तान् परित्यज्य तत् अशर्म अर्जुनप्रवासजं दुःखं कृष्णां द्रौपदीमभिपेदे व्यानशे आततान। किं भूतम् अशर्म? एकौघभूतम् एकप्रवाहसदृशम् एकैघरूपतां प्राप्तम्। यद्वा यद्विभक्तम् आसीत् तदैक्यं प्राप्तम् इत्यर्थः। किं भूतान् तान्? भूरिधाम्नः तेजस्विनः महाप्रतापयुक्तान्। यथा वासरस्य सम्बन्धिनः चतुःसंख्यान् भूरिधाम्नो यामान् प्रहरान् परित्यज्य ध्वान्तमन्धकारं कृष्णां विभावरीम् अभिपद्यते आतनुते। तेषां

जोनराजटीका

शोकव्यपगमे हेतूनाह- भूरितेजसः पाण्डवांश्चतुरोऽपि त्यक्त्वा तदशर्म दुःखमेकौघीभूतं भीमादिभिस्तत्त्यागात् कृष्णां प्रापत्। यथा दीप्तान् दिनप्रहरांश्चतुरस्त्यक्त्वा राशिभूतं तमः कृष्णां रात्रिं प्राप्नोति। स्त्रीत्वादतिस्नेहत्वाच्च द्रौपद्यामेव शोकः स्थितिमकार्षीदीत्यर्थः।।३५।।

तुषारलेशाकुलितोत्पलाभे पर्यश्रुणी मङ्गलभङ्गभीरुः।
अगूढभावाऽपि विलोकने सा न लोचने मीलयितुं विषेहे।। ३६।।

अन्वयदीपिका

तुषारेति। सा द्रौपदी विलोकने अर्जुनदर्शने लोचने मीलयितुं निमेषं कर्तुं न सेहे न शशाक। [किं लक्षणा सा?] अगूढभावापि। अगूढाभिप्रायापि। स्फुटाभिलाषिणी<अपि>। मङ्गलभङ्गभीरुः। मङ्गलहानेः भीता। [किं भूते लोचने?] पर्यश्रुणी। परिगतानि अश्रूणि बाष्पाः ययोस्ते पर्यश्रुणी। अश्रुणो दृष्ट्यावरकत्वेऽपि तन्निपातस्यामङ्गलत्वात्तस्मिन्निवर्तकं निमीलनं सा न चकार। अत एव तुषारलेशाकुलितोत्पलाभे। तुषारस्य हिमस्य लेशाः बिन्दवः तैः आकुलिते व्याप्ते च ते उत्पले कमले च। तुषारलेशाकुलितोत्पले। तुषार-लेशाकुलितोत्पलयोः आभा इव आभा ययोस्ते। तुषारलेशाकुलितोत्पलाभे।। "भावो लीला क्रिया चेष्टा भूत्यभिप्रायजन्तुषु" **इति वैजयन्ती**। उपमालङ्कारः।। ३६।।

लघुटीका

यामा उपमानम्। अशर्मणो ध्वान्तम् उपमानम्। कृष्णाया विभावरी उपमानम्।३५।

सा कृष्णा लोचने मीलयितुं न विषेहे। कीदृगसौ? प्रवसतोऽर्जुनस्य दर्शने अगूढभावाऽपि अप्रच्छादिताशयापि दिदृक्षुरपि सती चक्षुषी निमीलयितुं न शशाकेत्यर्थः। यदि विलोकनेन गूढभावा नासौ यदि च निमीलनेन द्रष्टुं न शक्यते तत्कथं मीलयितुं न विषेहे इत्याह- कीदृक् सा मङ्गलभङ्गभीरुः। यतो निमीलनात् अश्रुनिपातो भवति ततो मङ्गलभङ्गो जायतेऽतो भीरुः। मे पत्युरमङ्गलं मा भूत् इत्यश्रुपातं न करोतीत्याह-

जोनराजटीका

एतदेव प्रपञ्चयति- सा लोचने मीलयितुं सङ्कोचयितुं न विषेहे नाशकत्। शीलने कारणमाह- पर्यश्रुणी सबाष्पेऽपि। अपिशब्दो भिन्नक्रमः पर्यश्रुशब्देन योज्यः। यदि मां द्रष्टुकामा नाभूत् किमिति सबाष्पां दृष्टिं मीलयेदित्याह- विलोकने पार्थदर्शने गूढोऽव्यक्तो भाव आशयो यस्याः। द्रष्टुकामोऽहि सबाष्पां दृष्टिं मीलयति। पुटद्वयसंश्लेषणरूपेण मीलनेनावश्यं बाष्पव्यपगमात्। तर्हि किमिति नामीलयदित्याह- मङ्गलस्य भङ्गाद् भीरुः। प्रस्थानकाले बाष्पपातस्य शाकुनिकैर्निषिद्धत्वात्। अथवा दर्शने व्यक्तभावापीति योज्यम्।

अकृत्रिमप्रेमरसाभिरामं[१] रामार्पितं दृष्टिविलोभि दृष्टम्।
मनः प्रसादाञ्जलिना निकामं जग्राह पाथेयमिवेन्द्रसूनुः।। ३७।।

अन्वयदीपिका

अकृत्रिमेति। इन्द्रसूनुः अर्जुनः मनःप्रसादाञ्जलिना निकामम् अत्यर्थम् दृष्टं दर्शनं जग्राह। गृहीतवान्। <मनसः>प्रसादः, प्रसन्नं मन इत्यर्थः। मनःप्रसाद [ए]व अञ्जलिः मनःप्रसादाञ्जलिः। तेन मनःप्रसादाञ्जलिना। [किं लक्षणं दृष्टम्?] रामार्पितम्। <रामा> द्रौपदी तया अर्पितं दत्तम्। [किमिव?] पाथेयमिव। यथा ग्रामगामी कश्चित् पुमान् पथि मार्गे साधु पाथेयं शम्बलं करेण कृत्वा गृह्णाति तद्वत्। [किं लक्षणं दृष्टम्?] अकृत्रिमप्रेमरसानुविद्धम् अभिरामम्। क्रियया निवृत्तः कृत्रिमः। न कृत्रिमः अकृत्रिमः। प्रेमैव रसः प्रेमरसः। अकृत्रिमश्चासौ प्रेमरसश्च अकृत्रिमप्रेमरसः। अकृत्रिमप्रेमरसेन अनुविद्धम् अकृत्रिमप्रेमरसानुविद्धम्। मनोज्ञम्। दृष्टिविलोभि। दृष्टिप्रियमित्यर्थः। [यत्]दृष्टिं विलोभयति तत् दृष्टिविलोभि। पाथेयपक्षेऽपि स्वाभाविकमधुरादि रसगृह्यं रामार्पितं कान्तासमर्पितं दृष्टिप्रियञ्च। तदप्यञ्जलिना गृह्यते।। ३७।।

लघुटीका

किं भूते लोचने? पर्यश्रुणी अश्रुभिः परिगते व्याप्ते। अत एव किं भूते लोचने? तुषारलेशाकुलितोत्पलाभे। तुहिनजललवपूरितकुवलयसदृशे। मङ्गलभङ्गाद् भीरुः मङ्गलभीरुः इति पञ्चमीसमासः।।३६।

ततोऽनन्तरमिन्द्रसूनुः अर्जुनो रामार्पितं रामया प्रियया अर्पितं दृष्टम् अवलोकितं मनः प्रसादाञ्जलिना मनसः प्रसादो हर्षः स एवाञ्जलिः तेन निकामम् अतिशयेन जग्राह।

जोनराजटीका

सा तुषारकणनीलोत्पलकान्ती अमङ्गलभीत्या प्रियदर्शनसुखमपि नागणयदिति भावः।।३६।।

बाष्पाकुला तद्दृष्टिः कदाचित्पार्थस्येष्टा नासीदिति शङ्कां निराकर्तुमाह- नेत्रयोः सबाष्पत्वमनिवार्यवीक्षणेनानुमितः। अकृत्रिमः स्वाभाविको यः स्नेहरसस्तेन मनोहरम्। अकृत्रिमं प्रेम कृत्वा रामयाऽर्पितमिति वा योज्यम्। तथा दृष्टिविलोभनशीलं प्रेक्षणम्। पार्थे

१. अनुविद्धम् इति अन्वयदीपिका।

धैर्यावसादेन हतप्रसादा वन्यद्विपेनेव निदाघसिन्धुः।
निरुद्धबाष्पोदयसन्नकण्ठमुवाच कृच्छ्रादिति राजपुत्री।। ३८।।

अन्वयदीपिका

धैर्यावसादेति। राजपुत्री द्रौपदी कृच्छ्रात् महता कष्टेन इति वक्षमाणं वाक्यम् उवाच। निरुद्धबाष्पोदयेन सन्नः हीनः क्षीणः। [बाष्पो]दयसन्नकण्ठं यथा स्यात्तथा। निरुद्धश्चासौ बाष्पोदयश्च निरुद्धबाष्पोदयः। <अश्रूद्गमनिरुद्धकण्ठः> कण्ठस्वरो यस्मिन् तत्। [किंलक्षणा राजपुत्री?] धैर्यावसादेन धैर्यनाशेन हतप्रसादा हतनैर्मल्या क्षोभं गमिता। [केन? का

लघुटीका

कीदृक् दृष्टम्? अकृत्रिमस्य स्वाभाविकस्य प्रेम्णः स्नेहस्य रसेन शृङ्गारेण अभिरामं रमणीयम्। पुनः कीदृक् दृष्टम्? दृष्टिविलोभि लोचनवल्लभं प्रसन्नेन मनसा जग्राह इत्यर्थः। पाथेयमिव जग्राह। तद्दृष्टं हि प्रवसतस्तस्य प्रीतिकारित्वात् पाथेयतुल्यम्, यथा कश्चित्प्रवासी रामार्पितं पाथेयम् अञ्जलिना निकामम् अत्यर्थं बहु गृह्णाति। कीदृक् पाथेयम्? रसाभिरामं रसेन माधुर्यादिना अभिरामं रम्यं दर्शनीयत्वात्, दृष्टिविलोभि लोचनहारि। कथमर्पितम्? अकृत्रिमप्रेम यथा भवति। एवं रामार्पितं पाथेयं प्रवासी गृह्णाति। अकृत्रिमं प्रेम यत्र तदकृत्रिमप्रेम अर्पणक्रियाया विशेषणम्। अञ्जलिना हस्तद्वयेन चादरात् गृह्यते। निकामं बहु। पथि साधु यत् 'पथ्यतिथ्यादिना'[४.४.१०४] ढञि पाथेयम् इति। ३७।

अनन्तरं राजपुत्री द्रौपदी इत्येवं वक्ष्यमाणम् उवाच जगाद। कथं कृच्छ्रात् महतः कष्टात्। कुत इत्याह। कथं भवति? निरुद्धबाष्पोदयसन्नकण्ठं यथा भवति। निरुद्धेन

जोनराजटीका

मनः प्रसाद एवाञ्जलिस्तेन जग्राह। यद्वाऽकृत्रिमप्रेमेति ग्रहिक्रियाविशेषणम् अद्राक्षीदित्यर्थः। एतेन पार्थस्य प्रस्थानावसरे मनःप्रसादः सूचितम्। यथा पाथेयं कर्पूरनालिकादिरसं रामादत्तं कश्चिदञ्जलिना गृह्णाति। रसोऽत्र मधुरादिः। इन्द्रसूनुरिति साकूतम्।।३७।।

धैर्यस्यावसादेन हीनत्वेन हतः प्रसादो मनःप्रसन्नता यस्याः सा राजपुत्री। निरुद्धः अमङ्गलभयादमुक्तो यो बाष्पोदयस्तेन सन्नः सगद्गदः कण्ठो यत्रैवं कृच्छ्रादुवाच। या

मग्नां द्विषच्छद्मनि पङ्कभूते सम्भावनां भूतिमिवोद्धरिष्यन्।
आधिद्विषामातपसां प्रसिद्धेरस्मद्विना मा भृशमुन्मनीभूः।। ३९।।

अन्वयदीपिका

इव?] वन्यद्विपेन वनगजेन निदाघसिन्धुरिव। ग्रीष्मनदीव। यथा वनगजेन ग्रीष्मसिन्धुः हतप्रसादा क्रियते। उपमालङ्कारः।। ३८।।

किमुवाचेत्याह। **मग्ना**मिति। आतपसां प्रवृत्तेः प्रसिद्धेः तपसां सम्यक् प्रसिद्धिपर्यन्तम्। अस्मद्विना। अस्माभिः विना भृशम् अत्यर्थम् उन्मनी मा भूः उत्सुको मा भूः। अस्मद्विरहे त्वया दुःखं न कर्तव्यमित्यर्थः। उद्विग्नस्य तपः परिपन्थित्वादिति भावः। अनुन्मनाः उन्मनाः सम्पद्यत इति उन्मनी<भवति> उन्मनी मा भूः। [किं कुर्वन्?] सम्भावनां योग्यतां गोरवम् उद्धरिष्यन् उद्धारं करिष्यन्। उद्धारकस्त्वमिति शेषः। [किं लक्षणां सम्भावनाम्] द्विषच्छद्मनि शत्रुकपटे मग्राम् दुरुद्धरामित्यर्थः। [किं लक्षणे द्विषच्छद्मनि?] पङ्कभूते।

लघुटीका

प्रतिहतप्रसारेण बाष्पोदयेन अश्रूद्गमेन सन्नोऽपहतः कण्ठो यत्र वचने तत्। कथं भूता धैर्यस्य धृतेरवसादेन दुःखवशात् धृतेः भ्रंशेन हतो मनसः प्रसादो यस्याः सा तथा। केन का इव। वन्यद्विपेन निदाघसिन्धुरिव। यथा वन्यद्विपेन वनोद्भवेन गजेन हतप्रसादा कलुषीकृता निदाघसिन्धुः ग्रीष्मकालनदी शोभते तथा साऽपि स्थिता सती उवाच। निदाघसिन्धुरित्यनेन सन्तापं कार्श्यं च दर्शयति। राजपुत्री इति अभिमानिताम् आह। राज्ञो दुहिता राजपुत्री द्रौपदी। 'सुताग्रभोजनान्येव दुहितृपुत्रता'।३८।

आतपसां प्रसिद्धेः तपसां प्रकृष्टसिद्धेरा यावदिति। अस्मद्विना मां विना भृशं मा उन्मनीभूः। अनासादिततपःफलोऽस्माकमुपरि मा उत्कण्ठिष्टाः। प्रसिद्धिः फलनिष्पत्तिः।

जोनराजटीका

ग्रीष्मनदी वनकरिणा हतप्रसादा। ग्रीष्मे हि दन्तिनो मेदुरत्वात्सन्तापमसहमानाः प्रविश्य नदीः कलुषयन्ति।।३८।।

तपस्यतामवश्यंभाविन्या बन्धविषयाया उत्कण्ठाया विधेयत्वंनिषेद्धुमाह- अस्मद्विनाऽस्मद्वियोगेन त्वं मा उन्मनीभूः उत्कण्ठितमनास्त्वं मा गम इत्यर्थः। आधिद्विषां शत्रुकृतमनःपीडानिवारकाणां तपसां निष्पत्तिं यावत्। त्वं किं करिष्यन्? पङ्कभूते कर्दमसमे

यशोऽधिगन्तुं सुखलिप्सया वा मनुष्यसङ्ख्यामतिवर्तितुं वा।
निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति सिद्धिः।। ४०।।

अन्वयदीपिका

पङ्कसदृशे। कर्दमोपमिते। [कामिव?] भूतिमिव। सम्पदमिव। यथा कश्चित्पुमान् भूतिं सम्पदं शत्रुपङ्के निमग्नाम् उद्धरति। [किं लक्षणानां तपसाम्?] आधिद्विषाम्। आधीन i मानसीपीडानां दुःखानां द्विषां छिदाम्। दुःखहारिणाम्। विभूतिमिवेत्युपमालङ्कारः। विशेषणसाधर्म्यात्। 'भूतं क्ष्मादौ पिशाचादौ योग्ये सत्योपमानयो'रिति **विश्वः**। 'भूतिर्भस्मनि संपदी'**त्यमरः**।। ३९।।

अथ अनौत्सुक्यदार्ढ्यार्थं तत् सर्वार्थसिद्धिकारणमित्याह- **यश** इति। पुनः किमुवाचेत्याह- हे अर्जुन! लक्ष्मीः श्रीः सम्पत् सिद्धिर्वा पुरुषाणाम् अङ्कं समीपं समुपैति

लघुटीका

किं कुर्वन्? सम्भावनाम् उद्धरिष्यन्। गुणानामस्तित्वाध्यवसायः सम्भावना ताम् उद्धरिष्यन्। क्व ब्रुडिता यदुद्ध्रियते। पङ्कभूते कर्दमतुल्ये द्विषच्छद्मनि शत्रुभिः प्रयुक्ते छले मग्नां ब्रुडिताम्। यथाहि पङ्कमग्नं किञ्चिदुद्ध्रियते तथा उद्धरिष्यन्। कथं भूतानां तपसामाधिद्विषामाधयो मनोदुःखानि तेषां द्विषः शत्रुभूतानि। तेषामाधिद्विषाम्। इदं हि दुःखं भवता तपोभिरपोहिष्यते। अतो भाविना उद्धारेण अनुन्मनीभावो लक्ष्यते। अनुन्मना उन्मना भवति। अरुर्मनश्चक्षुरादिना(५.४.५१)च्विः सलोपश्च। च्विलोपः ततो लुङ्। ततो न माङ्योगे इत्यटः अभावः। कामिव उद्धरिष्यन्। भूतिमिव श्रियमिव। श्रीरपि पङ्कतुल्ये द्विषच्छद्मनि मग्ना भवतैव उद्धरिष्यते। ३९।

अथ कस्मादौत्सुक्यं निषिध्यते इत्याह- ये निरुत्सुकाः सन्तो यत्नम् आचरन्ति तेषां निरुत्सुकानाम् अराभसिकानाम् अभियोगभाजाम्। उद्यमवतां पुंसां सिद्धिः अर्थसिद्धिः

जोनराजटीका

द्विषच्छद्मनि शत्रुकृते छले मग्नां ब्रुडितां भूतिलक्ष्मीमिव। संभावना गुणेष्वस्तित्वाध्यवसायः। कीर्तिमुद्धरिष्यन् शत्रुभिश्छलेनास्माकं कीर्तिर्लक्ष्मीश्च ग्लपिता तत्प्रत्यासत्तये करिष्यमाणानां तपसां निष्पत्तिं यावत्त्वमस्मच्चिन्तां मा कार्षीरित्यर्थः।।३९।।

उत्कण्ठाविजयस्य फलमाह - सुखस्य लिप्सया लुब्धुमिच्छया मनुष्येषु संख्यासु उल्लङ्घययितुं वा सधैर्यत्वात् निरुत्सुकानामभियोगभाजां निरुत्कण्ठमुद्योगभाजां धीरुत्सङ्गं

अन्वयदीपिका

वश्या भवति। [केव?] समुत्सुका कान्ता इव। यथा समुत्सुका सोत्कण्ठिता कान्ता स्त्री एवंभूतानां मानिनाम् उत्सङ्गम् एति तद्वत्। [किं लक्षणानां पुरुषाणाम्?] अभियोगभाजाम्। अभिनिवेशवताम्। उद्यमवताम्। [किं कर्तुम्?] यशोऽधिगन्तुम्। कीर्तिं लब्धुम्। वा अथवा सुखमीहितुम्। सुखलिप्सया सुखलब्धुमिच्छया। वा अथवा मनुष्यसङ्ख्यामतिवर्तितुं वा। मनुष्येषु गणनाम् अतिक्रमितुम् अमानुषं कर्म कर्तुम्। अत एव [किं लक्षणानां पुरुषाणाम्?] निरुत्सुकानाम्। निर्गतः उत्सुकधर्मविशेषो येभ्यः ते निरुत्सुकाः। तेषां निरुत्सुकानाम्। अदुर्मनायमानानाम्। सिद्धिर्नाम पूर्वोक्तं यशो दुःखाभावसिद्धिः। तस्मादस्मद्विरहदुःखम् आतपःसिद्धेः सोढव्यमिति भावः।। ४०।।

लघुटीका

उत्कण्ठिता इव समुत्सुका इव प्रत्युत स्वयमेवाङ्कम् उपैति। किमर्थम्? अभियोगभाजः यशोऽधिगन्तुम् उत्कृष्टशत्रुविजयलक्षणं यशः प्राप्तुं वा अथवा सुखलिप्सया वा शत्रुच्छेदेन राज्यसुखं प्राप्तुमिच्छया वा। अथवा मनुष्यसंख्याम् अतिवर्त्तितुं वा। उत्कृष्टपुरुषगणनाप्रस्तावे अहमेवैकोऽत्र गुणी इति मनुष्यसंख्यां निवर्तयितुं वा। यशोऽधिगन्तुमित्यत्र वाशब्दलोपो बोद्धव्यः। यथा

प्रत्यादित्यं प्रत्यनिलं प्रतिगां च प्रतिद्विजम्।

ये मे हन्ति च पन्थानं ते भवन्ति गतायुषः।। इति प्रतिशब्दलोपः। 'एक एककमित्याहुर्द्वावित्यन्ये त्रयोऽपरे' इत्यत्र इतिशब्दलोपः।

देवः किं बान्धवः स्यात् प्रियसुहृदथवाचार्य आहोस्विदार्यो

रक्षाचक्षुर्न दीपो गुरुरथ जनको जीवितं बीजमोजः।।

इत्यादौ वितर्कवाच्यथशब्दलोपः। संशय्यमानता वा न स्यात्।४०।

जोनराजटीका

प्रत्युपैति। उभयत्रापि वाशब्दस्तुल्यकक्ष्यतयौत्सुक्यप्रतिपादनार्थः। विकल्पस्यैकेनैव लब्धेः। अत्रोत्प्रेक्ष्यते- यशोऽधिगन्तुं समुत्सुका लुब्धेव निरुत्कण्ठमुद्योगिनोऽङ्कमाश्रयति यथा समयशो भवतीति चिन्तयन्तीव लक्ष्मीरुद्योगिनो भजतीत्यर्थः। अतस्त्वयोत्कण्ठा न कार्येति

लोकं विधात्रा विहितस्य गोप्तुं क्षत्रस्य मुष्णन्वसु जैत्रमोजः।
तेजस्विताया विजयैकवृत्तेर्निघ्नन्प्रियं प्राणमिवाभिमानम्। ४१।।

अन्वयदीपिका

अर्जुनस्य कोपोद्दीपनद्वारेण तपःप्रवृत्तिं निश्चलीकर्तुम् अरिपराभवं तावत् चतुर्भिः श्लोकैः उद्घाटयति। **लोकमिति। व्रीडानतैरिति। वीर्यावदानेष्विति। प्रसह्येति चतुर्भिः कलापकम्**। हे अर्जुन! सः निकारः अपकारः परिभवः त्वद्विना त्वया विना मे हृदयं नवीकरिष्यति। दुःखसहितं करिष्यति। [किं लक्षणं हृदयम्?] उपशुष्यत्। शुष्कीभवत्। [किं लक्षणः अरिनिकारः?] कुतश्चित् त्वद्विरहदुःखे पुनः आर्द्रः भविष्यन् नवीभविष्यन्। न त्वद्यापि शुष्कमिति भावः। [कमिव?] व्रणमिव। यथा व्रणः पुराणप्रहारः कदाचित् नवीभवति। तद्वत्। तथा आर्द्रः। दुःखितस्य पुनर्दुःखोपचयः प्रशान्तप्रायमपि दुःखहेतुं पुनः उद्घाटयतीत्यर्थः। [सः कः?] यः निकारः परैः शत्रुभिः अस्मासु प्रसह्य बलात्प्रयुक्तः।

लघुटीका

मम सम्प्रति त्वया विना उत्कण्ठा न भविष्यतीत्याशङ्क्याह- स निकारः स पराभवः त्वद्विना मे हृदयं त्वद्विना त्वां विना नवीकरिष्यति तत्कालसञ्जातदुःखमिव विधास्यतीति। अभिनवदुस्सहरिपुकृतपरिभवपूर्णमानसानस्मान् त्वद्विरहदुःखं खेदयिष्यतीत्यर्थः। किं भूतो निकारः? आर्द्रः प्रत्यग्रः तत्क्षणसञ्जात इव। त्वद्विरहदुःखात्। किं भूतं हृदयम्? उपशुष्यत्। चिरकालगतत्वसंयोगाच्च निकारः दुःखार्द्रतां मुञ्चन्। विस्मरत् दुःखम्। स कः? यो निकारः परैः शत्रुभिः अस्मासु विषये प्रसह्य हठात् प्रपन्नः प्रयुक्तः। यश्च निकारो वक्तुं न शक्यः। वचनेनापि वक्तुं न शक्यते रौद्रत्वात् बीभत्सत्वात् क्रूरत्वाच्च। किमुत

जोनराजटीका

तात्पर्यम्। अथवा यशोऽधिगमोऽपि सुखलिप्सावदुद्योगधारणे हेतुर्योज्यः। अस्यां व्याख्यायामभियोगभाजां समुत्सुकेवेति व्याख्येयम्।।४०।।

प्रसह्येत्यन्तं कुलकम्। त्वद्विना तद्विरहोष्मणोपशुष्यन्मम हृदयं स निकारोऽवमानो नवीकरिष्यति स्थिरीकरिष्यति। निकारप्रतिकारेच्छया प्रणान्धारयामीत्यर्थः। निकारः कीदृक्? त्वद्विनाऽर्द्रः प्रत्यग्र इव सम्पन्नः। शत्रुनिकारप्रतिकारार्थमर्जुनो दूरे गत इति चिन्तनात्। अत्र

व्रीडानतैराप्तजनोपनीतः संशय्य कृच्छ्रेण नृपैः प्रपन्नः।
वितानभूतं विततं पृथिव्या यशः समूहन्निव दिग्विकीर्णम्।। ४२।।

अन्वयदीपिका

आचरितः कृतः। केशाम्बराकर्षणरूपः निकारः स्मर्तुमपि वक्तुञ्च न शक्यः। तर्हि अधिकर्तुम् अनुभवितुं किमुत? यस्य स्मरणमपि दुःसहम्। तस्यानुभवस्तु सुतरां दुःसहः।। ४१।।

लोकमिति। किं कुर्वन् क्षत्रस्य क्षत्रियस्य जातेः भुजं बलं दीप्तिर्वा एवं वसु धनं मुष्णन्। अपहरन्। त्यजन्नित्यर्थः। किं लक्षणं भुजम्? जैत्रं जयनशीलम्। किं लक्षणस्य क्षत्रस्य? विधात्रा ब्रह्मणा लोकं जनं गोप्तुं रक्षितुं विहितस्य निर्मितस्य। पुनः किं कुर्वन् ? मनस्वितायाः अभिमानम् अहङ्कारं निघ्नन्। खण्डयन्। तेजः विद्यते येषां ते तेजस्विनः।

लघुटीका

किमिव कथमिव अधिकर्तुं सोढुं शक्यते। करोतेरधिपूर्वस्य प्रसहनवृत्तित्वात्। प्रकर्षेण सहनक्षमः निकारः परिभवः। 'लोकं विधात्रा' इत्यादिना निकारमेव विशिनष्टि। निकारः किं कुर्वन्? क्षत्रस्य क्षत्रियाणां वसु सर्वस्वभूतं जैत्रम् अप्रतिहतं ओजः तेजो मुष्णन् अपहरन्। किं भूतस्य क्षत्रस्य? विधात्रा ब्रह्मणा लोकं मनुष्यलोकं विश्वं गोप्तुं रक्षितुं विहितस्य विसृष्टस्य तथा तेजस्वितायाः तेजस्विनां प्राणमिव प्रियं जीवितवद्वल्लभम्

जोनराजटीका

शोषणनवीकरणयोरन्योन्यविरुद्धयोर्धर्मयोरर्जुनवियोग एवोपायः। तद्वियोगेनैवार्द्रभूतस्य निकारस्य च नवीकरणकर्तृकत्वात्। आर्द्रञ्च शुष्कं नवीकरोति। लोकं गोप्तुं क्षतात्त्रातुम्। विधिना निर्मितस्य क्षत्रस्य वसु सर्वस्वभूतं जैत्रमोजो मुष्णन्। ओजसो धनारोपान्मुष्णन्निति सङ्गतम्। तथा विजये एका वृत्तिर्यस्या ओजस्वितायाः। प्राणमिव प्रियमभिमानं निघ्नम्। निकारे सत्योजोहानेरवश्यं भावित्वादोजः सहचरस्याभिमानस्यापि क्षय इत्यर्थः।।४१।।

आप्तजनेन यथाश्रुतवादिना जनेनोपनीतः कथितोऽपि पाण्डवानामवमानस्य मनसाऽप्यसंभाव्यत्वात्संशय्य सन्देहं प्राप्य लज्जया आनतै राजभिः कष्टेन प्रपन्नोऽनुमतः तैः ओजस्विनामवमानसम्भवादिति भावः। भुवि विस्तारमतो वितानसदृशं यशः सङ्क्षिपन्निव।।४२।।

वीर्यावदानेषु कृताभिमर्शस्तन्वन्नभूतामिव संप्रतीतिम्।
कुर्वन्प्रयामक्षयमायतीनामर्कत्विषामह्न इवावशेषः।। ४३।।

अन्वयदीपिका

तेजस्विनां भावः तेजस्विता। तस्याः। किं लक्षणायाः तेजस्वितायाः? विजयैकवृत्तेः। विजय एव एका मुख्या वृत्तिर्वर्तनं यस्याः सा विजयैकवृत्तिः। तस्याः। किं लक्षणम् अभिमानम्? प्राणमिव। प्रियम् इष्टम्। वृत्तिर्वर्तनं 'जीवनमि**त्यमरः**'।। 'ओजो बले दृढांशे दीप्तौ चेति' **विश्वः**।। तेजस्विनां मानहानिः प्राणहानिरित्यर्थः।। उपमालङ्कारः।।४२।।

व्रीडानतैरिति। [पुनः किं लक्षणः परिभवः?] निकारः आप्तजनोपनीतः। पूज्यजनेन उपनीतः प्रापितः। [किं लक्षणः अरिनिकारः?] संशय्य संशयं विस्मयं प्राप्य देशान्तरस्थैः नृपैः प्रपन्नः सम्भावितः। आप्तवचनात् कथञ्चिद्विश्वास्यः। [किं लक्षणैः नृपैः?] व्रीडानतैः व्रीडया लज्जया आनतैः अधोमुखैः। जुगुप्सितवृत्तान्तश्रवणादिति भावः इत्येषा पूर्वेषां चिरन्तनानां

लघुटीका

अभिमानमहङ्कारं मुष्णन्नपहरन्। किं भूतायाः? विजयैकवृत्तेर्विजये एव <एका> वृत्तिः अवस्थितिर्यस्याः सा तथा तस्याः। अस्माकमभिमानमहङ्कारं मुष्णन्नपहरन्। किं भूतमभिमानम्? विजयैकवृत्तेः तेजस्वितायाः प्राणमिव प्रियं विजिगीषूणां तेजस्विनां जीवितवद्वल्लभ एव निकारो यः प्रयुक्त इत्यर्थः। यश्च निकार आप्तैर्जनैः अवितथावादिभिः उपनीतः उपवर्णितः कथितः सन् नृपैः संशय्य कथमेतद्दुष्करमेवं वृत्तमित्येवं संशय्य। व्रीडानतैः लज्जावनतशिरोभिः अन्यैः नृपैः कृच्छ्रेण। कथं कथमपि प्रतिपन्नः प्राप्तः। किं कुर्वन्? विततं विस्तीर्णं दिग्विकीर्णं दिक्षु प्रसृतम्। अस्माकं यशः समूहयन्निव संहरन्निव प्रयुक्तो यः पराभवः। परैः

जोनराजटीका

तथा वीर्यं शौर्यम् अपदानान्यद्भुतकर्माणि तेषु च कृतोऽभिमर्शोऽपह्नवो येन सः। निकारे सम्पन्ने सति लोकैर्वीर्यादीनामगणीयत्वात्। अनुष्ठितानामपि वीर्यादीनां दैववशेन सिद्ध्यसम्भवात्। अत एव प्रतीतिं सम्भावनामभूतामिव कुर्वन् अथवा वीर्यादिविषये सम्प्रतीतिमभूतामिव कुर्वन्निति योज्यम्। कृतोऽभिमर्षः स्पर्शो येन सः। तथाऽयतीनां प्रयासक्षतिं सङ्कोचं कुर्वन्। यथा दिनशेषः सूर्यांशूनाम्।।४३।।

प्रसह्य योऽस्मासु परैः प्रपन्नो वक्तुं न शक्यः किमुताधिकर्तुम्?।
नवीकरिष्यत्युपशुष्यदार्द्रः स त्वद्विना मे हृदयं निकारः।। ४४।।

(चतुर्भिः कलापकम्)

अन्वयदीपिका

व्याख्या। इदं तु नास्तु। अन्यथा व्याख्यायते। [किं लक्षणो निकारः?] आप्तजनोपनीतः। आप्तजनाः ज्ञातिजनाः। तैः उपनीतः समानीतः। अत एव संशय्य कथमिदमन्याय्यमुपेक्षणीयमिति विचार्य व्रीडानतैः नृपैः उदासीनैः स्त्रियः द्रौपद्याः केशाकर्षणदिदुःसहकर्मदर्शनात् कृच्छ्रेण प्रपन्नोऽङ्गीकृतः, गोत्रकलहेषु मध्यस्थैः उदासितव्यमिति बुद्ध्या उपेक्षितव्यमिति भावः। उत्प्रेक्षते। यशः समूहन्निव सङ्कोचयन्निव। शत्रुपरिभूतस्य कुतः कीर्तिरिति भावः। [किं लक्षणं यशः?] प्रथितं प्रसिद्धम्। पृथिव्याः 'भूमेः वितानभूतम्' उल्लोचजातम्। भूतशब्दः समपर्यायः। दिग्विकीर्णम्। दिक्षु प्रसरितम्। वितानमपि दिगन्तलग्नं भवति। वितानमित्युपमा। 'अस्त्री वितानमुल्लोच' **इत्यमरः**।। ४३।।

वीर्येति। [पुनः किं लक्षणः अरिनिकारः।] वीर्याव<प>दानेषु अद्भुतकर्मसु कृतावमर्शः। कृतास्कन्दनः। वीर्याण्येव अवदानानि अद्भुतकर्माणि वीर्यावदानानि। तेषु

लघुटीका

किं भूतं यशः? पृथिव्या वितानभूतं चन्द्रोदयतुल्यम्। पुनः किं भूतः? वीर्यं च अवदानानि च वीर्यावदानानि तेषु तथा। वीर्यावदानेषु च अद्भुतेषु कर्मसु कृतोऽभिमर्शो विध्वंसो येन स तथा। सम्प्रतीतिम् अर्जुन एव शूरः इत्येवमादिकां जगत्प्रथितां ख्यातिमभूतामिव कुर्वन्न सञ्जातामिव कुर्वन् यः प्रयुक्तः। तथा च किं कुर्वन्? आयतीनां प्रतापानां प्रयामक्षयं कुर्वन्। प्रयामो विस्तारः। तस्य क्षयं कुर्वन्। कः कासामिव क्षयं करोति? अह्नः अवशेषोऽर्कत्विषामिव। यथा आह्नोऽवशेषोऽत्ययोऽर्कत्विषां भानुभासां प्रयामक्षयं सङ्कोचं करोति। तथा कुर्वन् यः प्रयुक्तः। ४१-४४।

जोनराजटीका

तथा योऽस्मासु विषये प्रसह्य बलात्परैः शत्रुभिः प्रयुक्तो वक्तुमपि न शक्यः किमुतानुभवितुम्। परे च कर्तुमिति पाठे भवादृशैः परेऽन्यस्मिन्नपि कर्तुं न शक्यः किमुत स्वात्मनानुभवितुमिति व्याख्येयम्। तथाविधस्यावमानरय प्रतिकारदर्शनेच्छया प्राणानहं रक्षामीत्यतस्त्वया मच्चिन्ता न कार्येत्यर्थः।।४४।।

प्राप्तोऽभिमानव्यसनादसह्याद्दन्तीव दन्तव्यसनाद्विकारम्।
द्विषत्प्रतापान्तरितोरुतेजाः शरद्घनाकीर्ण इवादिरह्नः।। ४५।।

अन्वयदीपिका

पुराकृतपराक्रमात् अद्भुतान्यपि कर्माणि प्रसृजन्नित्यर्थः। [किं कुर्वन्?] सम्प्रतीतिं ख्यातिम् अभूतामिव अविद्यमानामिव तन्वन् कुर्वन्। आयतीनाम् उत्तरकालानां प्रयामक्षयं दैर्घ्यनाशं कुर्वन्। प्रयामस्य दैर्घ्यस्य नाशः। तम्। [कस्य? कः कामिव?] अह्नः अवशेष इव। अर्कत्विषामिव। यथा अह्नः दिवसस्य अवशेषः दिनान्तः अन्त्यभागः अर्कत्विषां दिनकरकान्तिम् अभूतामिव अविद्यमानामिव करोति। 'अव<प>दानं कर्मवृत्त'मित्यमरः।। ४४।।

प्रकारान्तरेण मन्युं दीपयति श्लोकत्रयेण। **प्राप्तेति**। **व्रीडेति**। **दुःशासनेति त्रिभिः कुलकम्**। तत्र वक्षमाणैः प्रत्यभिज्ञाहेतुभिः धनञ्जयं विशिनष्टि। उपलम्भयति। हे अर्जुन! सः त्वं धनञ्जयः किमु ? [कथंभूतस्त्वम्?] विकारं वैरूप्यं प्राप्तः। पूर्वाकारादन्यथाकारं गतः। [कस्मात्?] अभिमानव्यसनात्। अभिमानभ्रंशात्। अभिमानस्य व्यसनं भ्रंशः। अतोऽन्य

लघुटीका

बन्धुवियोगकातरतया नास्खलीरिति कोपमुद्दीपयितुं परिभवमेव उदाहरति। क्वचिदिति कोमलप्रश्ने। हे स्वामिन् ! य एव त्वं पूर्वं सकलभुवनख्यातमहिमा त्वं स एव धनञ्जयोऽसि भवसि? कुतोऽयं प्रश्न इत्याह- किं भूतः त्वम्? प्रसह्य सोढुमशक्यात् अभिमानव्यसनात्। अहङ्कारक्षयात् विकारं प्राप्तः अन्यत्वं प्राप्तः। कस्मात् क इव? दन्तव्यसनाद्दन्तीव। यथा दन्ती गजो दन्तव्यसनाद्दन्तभङ्गादसह्याद्विकारं प्राप्तोऽन्यरूपताम् इव प्राप्तो न सम्यक् प्रत्यभिज्ञायते। तथा त्वमपि अभिमानव्यसनान्न प्रत्यभिज्ञायसे। तथा त्वं च द्विषत्प्रतापान्तरितोरुतेजाः स्थितः सन् विकारप्राप्तेरन्यरूपतां प्रपन्नो न प्रत्यभिज्ञायसे। द्विषतां शत्रूणां प्रतापेनान्तरितम् अपह्नुतम् उरु गरीयः तेजो यस्य स द्विषत्प्रतापान्तरितोरुतेजाः।

जोनराजटीका

कुलकम्। दुःशासनेत्यन्तं वाक्यम्। त्वं कर्ता स एव धनञ्जयः कच्चिदसि। कच्चिच्छब्दः प्रश्नार्थः। स इति सर्वनामानुभूतत्वार्थम्। अनुभूतत्वं च तैस्तैर्गुणैर्ज्ञेयम्। त एव तव गुणाः कच्चित्सन्तीत्यर्थः। त्वं कीदृक्? असह्यादभिमानस्य व्यसनाद्विनाशाद्विकारं प्राप्तः। यथा दन्ती दन्तुभङ्गात्। यथा दन्तिनो दन्तेषु सत्सु दन्तित्वमन्यथा तदभावः एवमभिमानिनामप्यभिमानैकप्राणत्वमित्युपमानद्वारा तत्सूचयति। तथा द्विषत्प्रतापेनान्तरितं

सव्रीडमन्दैरिव निष्क्रियत्वान्नात्यर्थमस्त्रैरवभासमानः।
यशःक्षयात् क्षीणजलार्णवाम्भस्त्वमन्यमाकारमिवाभिपन्नः।। ४६।।

अन्वयदीपिका

इत्यभिज्ञायते। [किं लक्षणात्?] अभिमानव्यसनात्। असह्याद्दुःसहात्। [क इव?] दन्तीव। यथा दन्ती हस्ती दन्तव्यसनात् भग्नदन्तत्वात् विकारं वैरूप्यं प्राप्तस्सन् असौ दन्ती उत न वेति प्रत्यभिज्ञागोचरो भवति तद्वत्। [पुनः किं लक्षणस्त्वम्?] द्विषत्प्रतापान्तरितोरुतेजाः। द्विषतां प्रतापः द्विषत्प्रतापः। द्विषत्प्रतापेन अन्तरितं तिरस्कृतम् उरु महत् तेजः प्रतापो यस्यासौ द्विषत्प्रतापान्तरितोरुतेजाः। अह्नः दिवसस्य आदिरिव स्थितः। प्रत्यूषकाल इव स्थितः। [किं लक्षणः अह्नः आदिः?] शरद्घनाकीर्णः। शरन्मेघच्छन्नः आच्छादितः। तद्वदेव प्रत्यभिज्ञायमानस्त्वम् इत्यर्थः। मध्याह्नस्तु मेघाच्छन्नोऽपि कथञ्चित्प्रत्यभिज्ञायत इत्याशयेनोक्तम् आदिरिति।। ४५।।

सव्रीडेति। [पुनः किं लक्षणस्त्वम्?] अस्त्रैः आयुधैः कृत्वा अत्यर्थेन न अवतंसमानः। न शोभमानः। उत्प्रेक्षते- सव्रीडमन्दैरिव। आपदुगपतैरिव स्थितैः। सव्रीडानि अत एव

लघुटीका

क इव अह्न आदिरिव। यथा अह्न आदिः दिनमुखं शरद्घनाकीर्णः सन् शरदह्नम्बुधरच्छन्नः सन् दिवसोऽयमिति न ज्ञायते तथा भवानपीत्यर्थः। प्रतापस्य प्रकाशात्मकत्वात् शरद्घनग्रहणम्। मध्यं दिनं घनाकीर्णमपि दिनरूपतया ज्ञायते इत्यत्र आदिग्रहणम्। तथा च यथापूर्वम् अस्त्रैरवाभासिष्ट तथा अस्त्रैरत्यर्थं नावभासमानः। कथं भूतैरस्त्रैः? निष्क्रियत्वात्क्रिया निष्पादयितुमशक्तत्वात् सव्रीडमन्दैरिव। सव्रीडत्वात् सलज्जत्वात् मन्दैरिव अपटुभिरिव। अर्थस्वरूपमतिगतो यत्र तदत्यर्थं सातिशयम्। अवभासनक्रियाविशेषणं प्राप्तादनवभासनात्

जोनराजटीका

व्यवहितं तेजो यस्य सः। यथा शरदभ्रच्छन्नः प्रातः कालः प्राभातिकमेघादम्बरवद्भवच्छत्रूणां क्षणिकत्वमिति भावः। द्विषतामसारत्वद्योतनार्थं शरद्ग्रहणम्।।४५।।

तथा त्वं कीदृक् निर्व्यापारत्वाद्धेतोरस्त्रैराग्नेयादिभिर्नात्यर्थं प्रकाशमानः। आयुधानां विनियोगाभावे मर्यादापालनं हेतुः। अत एवात्यर्थग्रहणम्। अत उत्प्रेक्षते- सव्रीडैरत एव

दुःशासनामर्षरजोविकीर्णैरेभिर्विनाथैरिव भाग्यनाथैः।
केशैः कदर्थीकृतवीर्यसारः कच्चित्स एवासि धनञ्जयस्त्वम्।। ४७।।

(त्रिभिर्विशेषकम्)

अन्वयदीपिका

मन्दानि तैः सव्रीडमन्दैः। [कस्मात्?] निष्क्रियत्वात्। निर्गता क्रिया येषां तानि निष्क्रियाणि। तेषां भावः। तस्मात्। अर्थक्रियाशून्यत्वात्। अचेतनेषु अस्त्रेषु व्रीडयेव स चेतनधर्मः उपचर्यते। [पुनः कथम्भूतस्त्वम्?] उत्प्रेक्षते। अन्यम् आकारम् अभिपन्नः स्वरूपान्तरं प्राप्त इव। [कस्मात्?] यशःक्षयात् यशःभ्रंशात्। [किमिव?] क्षीणजलार्णवाम्भ इव? यथा क्षीणजलार्णवाम्भः पानीयम् अन्यमाकारं प्राप्नोति। क्षीणं जलं यस्य सः क्षीणजलः। क्षीणजलश्चासौ अर्णवश्च क्षीणजलार्णवः। क्षीणजलार्णवस्य अम्भः क्षीणजलार्णवाम्भः। पानीयम्।। ४६।।

दुःशासने। 'क्वचिदिति कामप्रवेदने' **इत्यमरः**। एभिः परिदृश्यमानैः असंयमितैः केशैः शिरोरुहैः कदर्थीकृतवीर्यसारः। कुत्सितोऽर्थः कदर्थः। कदर्थीकृतौ गर्ह्यार्थौ कृतौ

लघुटीका

अधिकमनवभासमान इत्यर्थः। भासनं द्योतनं तथा। यशःक्षयात्कीर्तिक्षयात्। क्षीणजलार्णवाम्भः। क्षीणं जलं यस्य अर्णवस्य क्षीणजलार्णवः तस्येवाभा यस्य स तथा। अत एव अन्यमिव विकारमभिपन्नः। पूर्वरूपात् रूपान्तरं प्राप्तः। तथा एभिः केशैः कदर्थीकृतवीर्यसारः। कदर्थीकृतौ नाशितौ वीर्यसारो यस्य स तथा। कुत्सितोऽर्थः कदर्थः। अकदर्थौ कदर्थीकृतौ वीर्यं पौरुषं बलं यस्य सः। विशेषणद्वारेण निमित्तमाह- कथं भूतैः केशैः? दुःशासनामर्षरजोविकीर्णैः। दुःशासनस्य अमर्शः परामर्शः। आकर्षणात् स्पर्शः। स एव रजः पांशुः तेन अ(वि)कीर्णैः गुम्फितैः। अमर्शो रजः इव विच्छायीकरणत्वात्। पुनः कथं

जोनराजटीका

मन्दैरिव। निर्व्यापारो हि भृत्यादिर्लज्जमानो मन्दो भवति। तथा यशसः क्षयाद्धानेः विनाशात्तदन्यं पूर्वाकारविभिन्नमाकारं प्राप्त इव। हेमन्तादौ सूर्यस्येव पुरुषस्य प्रतापहान्याऽन्यादृशरूपत्वाभासात्। अत एव क्षीणसमुद्रसमः।।४६।।

यशःक्षये हेतुमाह- मलिनीकरणाद्रोष एव धूलिः। दुःशासनस्य रोषधूल्या मलिनैरत एवानाथैरिव देवैकशरणैरेभिः केशैः कदर्थीकृते ग्लपिते वीर्यसारे शौर्यबले यस्य सः। वीरे

अन्वयदीपिका

वीर्यसारौ यशोबले यस्य सः। कदर्थीकृतवीर्यसारः। पूर्वस्मात् धनञ्जयाद्विलक्षणः त्वं सः पूर्व एव धनञ्जयोऽसि। स एव त्वञ्चेत् तर्हि नैवमस्मानुपेक्षस इति भावः। [किं लक्षणैः केशैः?] दुःशासनामर्षरजोविकीर्णैः दुःशासनस्य अमर्षः कोपः दुःशासनामर्षः। दुःशासनामर्ष एव रजः धूलिः दुःशासनामर्षरजः। दुःशासनामर्षरजसा विकीर्णाः। दुःशासनामर्षरजोविकीर्णाः। तैः दुःशासनामर्षरजसो विकीर्णैः विनिक्षिप्तैः। उत्प्रेक्षते- अन्यथेव स्थितैः। अन्यथा कथमियं दशेति भावः। भाग्यनाथैः। भाग्यं दैवमात्रं नाथो शरणं येषां ते भाग्यनाथाः। तैः। दैवशरणैः। अन्यथा स्वरूपमपि नश्येदिति भावः।। ४७।।

लघुटीका

भूतैः? युष्मासु नाथेषु सत्सु अपि विनाथैरिव। भाग्यनाथैः विनैव नाथेन हि ये विद्यन्ते ते भाग्यनाथा इत्युच्यन्ते। भाग्यान्येव नाथा येषां ते भाग्यनाथाः तैः। न यूयं नाथा येषाम् अकिञ्चित्करत्वात्। ते विनाथाः तैः तथा। इदानीं भाग्यैकशरणैः इत्यर्थः। भाग्यानि प्राक्तनकर्माणि। भाग्य एव भाग्यम्। कुत्सितोऽर्थः कदर्थः। सा च कुत्सा अभिधानशक्त्या क्लिष्टरूपतया। तथा च कदर्थितः श्लेषित उच्यते। यथा

नेच्छाविरतिं क्षणमपि तव शक्तिः वसुशून्यं रतियन्त्रैः।
केवलमलमथाहं कदर्थिता वृद्धपुरुषेण।।

मदीयं केशपाशम् एवम् आकृष्टमवलोक्य सर्वजनो निर्वीर्यम् अशक्तं त्वां मन्यते। एभिरिति प्रत्यक्षेणैव दर्शयति। ४५-४७।

जोनराजटीका

बलिनि च भर्तरि सति वधूनां पुरुषान्तरेण स्पर्शमपि कर्तुमशक्यत्वात्। अतस्त्वं स एव धनञ्जयोऽसि कच्चित्। कुलकम्।।४७।।

स क्षत्रियस्त्राणसहः सतां यस्तत्कार्मुकं कर्मसु यस्य शक्तिः।
वहन् द्वयीमप्यफलेऽर्थजाते करोत्यसत्कारहतामिवोक्तिम्।। ४८।।

अन्वयदीपिका

अथाप्युपेक्षणे दोषमाह- स क्षत्रियेति। सः क्षत्रियः। क्षतात् त्रायत इति क्षत्त्रम्। क्षत्रियकुलं तत्। कार्मुकम्। कर्मणे प्रभवति इति कार्मुकम्। हे अर्जुन! स एव क्षत्रियः क्षत्रियशब्दवाच्यः यः सतां साधूनां त्राणसहः रक्षणसमर्थः। सहते इति सहः। त्राणस्य सहः त्राणसहः। तदेव कार्मुकम्। कार्मुकशब्दवाच्यम्। [तत् किम्?] यस्य कार्मुकस्य कर्मसु रणक्रियासु शक्तिः वर्तते। हे अर्जुन! पुमान् पुरुषः द्वयीमप्युक्तिं क्षत्रियकार्मुकौ शब्दौ असत्कारहतामिव। असत्कारेणानङ्गीकारेण हतां नष्टां व्युत्पत्तिं दूषितामिव करोति। [किं कुर्वन्?] क्षत्रियशब्दः कार्मुकशब्दश्च अर्थजाते स्वाभिधेयसामान्ये जातिमात्रे वहन् वर्तयन्। [किं लक्षणे अर्थजाते?] अफले। तस्मात् त्वमपि अस्मद्रक्षणेनोक्तदोषादात्मानं मोचयस्वेति वाक्यार्थः।।४८।।

लघुटीका

अथ मन्यसे स एवास्मि क्षत्रियः तदेव च इदं कार्मुकमित्याह- यः सतां साधूनां त्राणसहः रक्षणसमर्थः स क्षत्रियः। क्षतात् त्रायते इति क्षत्रियः। तथा यस्य कर्मसु क्रियासु शक्तिः सामर्थ्यं तत्कार्मुकम्। कर्मणे प्रभवतीति कार्मुकम्। कर्मण उकञ्। त्वं पुनरात्मन एव न त्राणसमर्थः। किं पुनः सतां कार्मुकस्य वा। यस्य कर्म सामर्थ्यमेतदीदृशम्। अकिञ्चित्करत्वम्। तदेवं न त्वं क्षत्रियो न चैतत् कार्मुकम्। एवमेतां द्वयीम् उभयरूपाम्

जोनराजटीका

जन्मिनोऽन्यत्वं कथं सम्भवतीति पूर्ववाक्योक्तेराक्षेपमाशङ्क्य गुणानामन्यत्वद्वारेणान्यत्वारोपं प्रतिपादयितुमाह- यः सतां त्राणं रक्षां सहते स क्षत्रियः क्षतात् त्रायत इति क्षत्रियशब्दस्य निर्वचनात्। यस्य कर्मसु शरव्यपातनादिषु शक्तिस्तत्कार्मुकम्। पुरुषः कर्ता द्वयीं क्षत्रियकार्मुकशब्दरूपां द्विप्रकारामुक्तिं वदन्नसत्कारेण सत्कारविपर्ययेणाऽवमानेन हतामिव करोति। कस्मिन्सति अफले फलाभावे सति? कीदृशे अर्थजाते? अर्थे क्षत्रियकार्मुकयोरभिधेये

वीतौजसः सन्निधिमात्रशेषा भवत्कृतां भूतिमवेक्षमाणाः।
सामान्यदुःखा इव नस्त्वदीयाः सरूपतां पार्थ ! गुणा भजन्ते।। ४९।।

अन्वयदीपिका

अथ त्वद्गुणा अपि ते नोज्जीवयेयुरित्याह- **वीतौजसे**ति। हे पार्थ! त्वदीयाः गुणाः शौर्यादयः नः अस्माकं सरूपतां सादृश्यं भजन्ते। उत्प्रेक्षते- सामान्यदुःखा इव। समदुःखभागिन इव। [किं लक्षणाः गुणाः?] वीतौजसः वीतं गतम् ओजो यैस्ते वीतौजसः। निष्प्रभाः। भूतिम्

लघुटीका

उक्तिं क्षत्रिय इति कार्मुकमिति च। अफले निरर्थके प्रवृत्तिनिमत्तशून्येऽर्थजाते। प्रशस्येऽर्थे वदन् सन् जनो लोकोऽसत्कारहतामिव करोति। तिरस्कारे क्षिप्तामिव तनुते। सतां त्राणस्य असमर्थे क्षत्रियादौ क्षत्रियोऽयमित्युक्तिरन्यैः धिग्वादेन हन्यते। कर्म साधयितुम् असमर्थे कार्मुकादौ कार्मुकमिदमित्युक्तिरन्यैः धिग्वादेन हन्यते। यतोऽस्थाने ईदृग्गुणवानयमित्युक्तिः सर्वैरपि धिग्वादेन हन्यते। यतोऽस्थाने वाचः प्रयोगो हि असत्कारः। तिरस्कारो गालिः। तेन हतामिव अधिक्षिप्तामिव। अर्थ एव अर्थजातम्। इति 'प्रशंसावचनैश्चेति'<२.१.६६> समासः। ४८।

यदीदृशाऽहं तत्किं प्रयोजनम् ,मया तत्र विसर्जितेन इत्येवमाद्याशङ्क्य प्रोत्साहनापूर्वं प्रकृते योजयितुमाह– हे पार्थ ! त्वदीयाः गुणाः शौर्यौदार्यादयो नोऽस्माकं सरूपतां भजन्ते। भवद्गुणानाम् अस्माकं च सादृश्यात्। कथं भूता गुणाः ? वयं च वीतौजसः। वीतं व्यपगतं

जोनराजटीका

क्षत्रियकार्मुकरूपे विषये जाते उत्पन्ने। अयमर्थः- स्वस्वकर्मण्यसमर्थयो राजधनुषोर्विषये क्षत्रियकार्मुकशब्दव्यपदेशं कुर्वन् क्षत्रियकार्मुकशब्दयोरवमानं करोतीत्यर्थः। अर्थजाते प्रशस्तेऽर्थे अफलेषु प्रवृत्तिनिमित्तशून्ये इति वा योज्यम्।।४८।।

हे पार्थेत्यामन्त्रणमर्हितत्वद्योतनार्थम्। त्वदीया गुणाः शौर्यादयो नोऽस्माकं सरूपतां साम्यमिव भजन्ते। यतो वीतमोजोगुणस्तेजश्च येषां तथा सन्निधिमात्रं शेषो येषामकर्मकारकत्वात्।

अन्वयदीपिका

अभ्युदयम् अवेक्षमाणाः अपेक्षमाणाः। [किं लक्षणां भूतिम्?] भवत्कृताम्। भवता करिष्यमाणाम्। [पुनः किं लक्षणाः गुणाः?] सन्निधिमात्रशेषाः। सत्तामात्रावशिष्टाः। [किं लक्षणानां नः?] भवत्कृतमभ्युदयम् अवेक्ष्यमाणानाम् आकाङ्क्षमाणानाम्। वीतौजसः। अत्र विपरिणामः कर्तव्यः। अत एव समानदुःखत्वं साधर्म्यं भजत इत्यर्थः।। ४९।।

लघुटीका

तेजः ओजो येषां ते तथा। निस्तेजसः बलरहिताः। पुनश्च कीदृशाः संनिधिमात्रशेषाः। संनिधिमात्रः शेषः येषां ते तथा। सत्तामात्रनिष्ठाः। तथा भवत्कृतां भूतिम् अवेक्षमाणाः भवता कृतां भूतिम् उन्नतिम् अवेक्षमाणाः। अभिवाञ्छन्तो वयमपि एवंविधाः एव। एवं वीतौजसः इत्येवमादिगुणसमानाधिकरणाः। तदपि अस्माकमित्यस्य पदस्य विशेषणतया बोद्धव्यम्। तथा वीतौजस्त्वादेर्धर्मस्य समानत्वादस्माकं सादृश्यं त्वद्गुणा भजन्ते। उत्प्रेक्ष्यन्ते सामान्यदुःखा इव। अस्माकमेव दुःखावस्थां दृष्ट्वा भवद्गुणैरपि शौर्यादिभिः स्नेहवशादस्माकं सारूप्यमनुकृतम्। यो हि बान्धवप्रीतिमान् स विपत्सु सरूपो भवति। गुणानाम् इति प्रथमान्तपदविशेषणात् अस्माकमिति षष्ठ्यन्तपदस्यापि गुणसामानाधिकरण्येन विशेषणताऽस्य बोद्धव्याः। न ह्यन्यथा सारूप्यं भवति। यथा

हस्तस्थिताखण्डितचक्रशालिनं द्विपेन्द्रकान्तं श्रितवक्षसं श्रिया।
सत्यानुरक्तं नरकस्य जिष्णवो गुणैर्नृपाः शार्ङ्गिणमन्वयासिषुः।। ४९।

जोनराजटीका

तथा भवता कृतां भूतिं सत्तां लक्ष्मीं चावेक्षमाणाः स्फारहेतवोऽपि गुणा भवत्स्फारमेव वयमिव प्रतीक्षन्त इत्यर्थः। सामान्यं साधारणं दुःखं येषां ते दुःखितानस्मान्दृष्ट्वा त्वद्गुणा इव दुःखिता जाता इत्यर्थः। बन्धवश्च बन्धौ दुःखिते दुःखिता भवन्ति।।४९।।

आक्षिप्यमाणं रिपुभिः प्रमादान्नागैरिवालुप्तसटं[१] मृगेन्द्रम्।
त्वां धूरियं योग्यतयाऽधिरूढा दीप्त्या दिनश्रीरिव घर्मरश्मिम्।। ५०।।

अन्वयदीपिका

तथापि ममैव कोऽयं भार इत्यत आह- **आक्षिप्येति**। हे पार्थ! इयं शत्रुहननलक्षणा प्रजाप्रतिपालनलक्षणा। योग्यतया निर्वाहकतया त्वाम् आरूढा आरूढवती। आश्रिता। इदं कार्यं त्वयैव निर्वोढव्यम्। ते त्वदधीनमिति भावः। [किं लक्षणं त्वाम्?] रिपुभिः शत्रुभिः आक्षिप्यमाणम्। तिरस्क्रियमाणम्। [कस्मात्प्रमादात्?] अनवधानतः प्रज्ञाहान्या, न तु दौर्बल्यादिति भावः। उत्प्रेक्षते- मृगेन्द्रमिव स्थितम्। विद्यमानम्। [किं लक्षणं मृगेन्द्रम्?] नागैः गजश्रेष्ठैः आलूनसटम्। आक्षिप्तकेसरम्। छिन्नग्रीवाकमित्यर्थः। आलूनाः आक्षिप्ताः

लघुटीका

अथ मन्यसे सत्सु वृकोदरादिषु कथमित्यहमेव वियुक्त इत्याह– इयं धूर्योग्यतया त्वाम् अधिरूढा। योग्योऽत्र कर्मणि भवानिति। अतो भार एष त्वयि आसक्त इत्यर्थः। काऽसौ मे योग्यता तावदीदृशीं दशां गमितो(ऽस्ये)त्याशङ्क्याह - अमित्रैः रिपुभिः प्रमादात् छलात् आक्षिप्यमाणं तिरस्कृताहङ्कारं, न बलात्कारेण इत्युक्तं भवति। नागैः मृगेन्द्रमिव, यथा नागैः गजैः प्रमादात् छलात् मृगेन्द्रः सिंहोऽनवहितः सुप्तः सन् कदाचिदालुप्तसटः क्रियते। ईषदुन्मूलितक(स्क?)न्धरोमा विधीयते। एतेन भवानखण्डितपौरुष इव मृगेन्द्र इव। अत इयं धूः अयं भारो योग्यतया भवन्तम् अधिरूढा भवानेव योग्योऽत्र कर्मणि नान्य इति। यथा दिनश्रीर्दिनलक्ष्मीर्दीप्त्या हेतुभूतया घर्मरश्मिं सूर्यम् इवाधिरोहति, नान्यमधिरोहति ज्योतिरिति। तथा त्वमेव योग्यतया धूरियमधिरूढा। कार्यातिभारो धूः। आक्षिप्तमपहृतं पीडितमिति। आलुप्ता उत्खाताः सटाः केसराणि यस्य। यदि नाम भवद्भिः स्वार्थहेतोः

जोनराजटीका

न च भीमादयस्तव समा येषु धुरं न्यस्यसीति प्रतिपादयितुमाह- छलान्न तु बलाच्छत्रुभिर्हन्यमानम् यथेभैः प्रमादान्निद्रावशित्वादुन्मथितकेशं सिंहम्। त्वामियं धू राजदेवताऽऽराधनरूपो भारो योग्यतया हेतुभूतयाऽधिरूढा। यथा दीप्त्या दिनश्रीः सूर्यं तेजस्विषु बहुषु सत्स्वपि अधिरूढा। दीप्त्या हेतुभूतया या योग्यता तयाऽधिरूढेति वा योज्यम्।।५०।।

१. आलूनसटम् इति अन्वयदीपिका

करोति यः शेषजनातिरिक्तां सम्भावनामर्थवतीं क्रियाभिः।
संसत्सु जाते पुरुषाधिकारे न पूरणी तं समुपैति संख्या।। ५१।।

अन्वयदीपिका

सटाः केसराः यस्य सः आलूनसटः। तम्। 'स राजकेसरयो'रित्य**मरः**। [कस्मात्?] प्रमादात् अनवधानतः। [कया?] योग्यतया सामर्थ्येन। [का? कया? कमिव?] दिनश्रीः दीप्त्या कृत्वा उष्णरश्मिमिव। यथा दिनश्रीः दिनशोभा दीप्त्या कान्त्या कृत्वा उष्णरश्मिं सूर्यम् आरूढा आरोहति।।।५०।।

पूर्वं निर्व्यवसायस्य सक्षत्रिय इत्यादिना दोषः उक्तः। इदानीं व्यवसायिनो गुणमाह- **करोती**ति। हे अर्जुन! यः पुरुषः क्रियाभिः चरितैः कर्मभिः। सम्भावनां योग्यताम् अर्थवतीं सफलां करोति। [किं लक्षणां सम्भावनाम्?] शेषजनातिरिक्ताम्। शेषजनेभ्यः इतरलोकेभ्यः अतिरिक्ता शेषजनातिरिक्ता ताम्। शेषजनातिरिक्ताम्। अधिकाम्। सर्वातिशायिनीम्। हे अर्जुन! पूरणीसंख्या द्वित्वादिसंख्या संसत्सु सभासु पुरुषाधिकारे योग्यपुरुषगणनावसरे जाते

लघुटीका

मयि महानयमद्य स्वभार आरोप्यते तर्हि निष्प्रयोजनम्। ५०।

किमिति तां धुरम् अहमुद्वहेयमित्याशङ्क्याह- यः पुरुषः क्रियाभिः कर्मभिः कृत्वा सम्भावनामर्थवतीं करोति। गुणानामस्तित्वाध्यवसायः सम्भावना। तां सम्भावनां क्रियाभिः कर्तव्यैः कृत्वा अर्थवतीं सत्यार्थां सफलां करोति। तं मनुष्यं संसत्सु सभासु पुरुषाधिकारे जाते पुरुषप्रस्तावे जाते पूरणीसङ्ख्या न उपैति। कथं भूतां सम्भावनां शेषजनातिरिक्तां तदितरजनातिशायिनीम्। य एवं सम्भावनां कर्मभिः सफलां करोति तं तादृशं सभासु मनुष्यगणना संख्या पूरणीं न भजते। स एव प्रथममेक एव मनुष्य इति गण्यते। तत्समो द्वितीयोऽयं तृतीयोऽयमिति संख्या द्वितीया-तृतीयादिका संख्या पूरणप्रत्ययान्ता न भजते। तत्समः कोऽपि द्वितीयो न खलु सम्भवतीत्यर्थः। एतेन तवाधिकतरः स्वार्थ एष सिध्यति इत्युक्तं भवति।

जोनराजटीका

न च तपसा क्लेश एव शङ्क्यो यावत्प्रकर्षोऽपीति विवक्षुराह - द्वित्रिप्रभृतिः सङ्ख्या पूरणी न त्वेकत्वलक्षणा। शेषनिष्पादनं हि पूरणम्। न च तदेकत्वसंख्यायाः सम्भवति तस्या एव प्रथमत्वात्। द्रव्यादिसंख्या तन्नैति। यद्वा पूरणी पूरणप्रत्ययान्ता संख्या द्वितीया तृतीयादिका तन्न समुपैति स एव प्रथम इत्यर्थः। कस्मिन्सति संसत्सु सभासु

प्रियेषु यैः पार्थ ! विनोपपत्तेर्विचिन्त्यमानैः क्लममेति चेतः।
तव प्रयातस्य जयाय तेषां क्रियादघानां मघवा विघातम्।। ५२।।

अन्वयदीपिका

सति तं पुरुषं न समुपैति। न अभ्युपेति। न गच्छति। अद्वितीयो भवति। पूर्यते अनयेति पूरणी। तस्मात् त्वया असाधारण्यलाभाय महान् उद्यमः आश्रेय इति भावः।।५१।।

अथ द्वाभ्यां श्लोकाभ्यां सुलभोद्वेगस्य प्रोषितस्य कर्तव्यमुपदिशति- **प्रियेष्वि**ति। हे पार्थ! मघवा इन्द्रः तेषाम् अघानां व्यसनानां पापानां वा विघातं निवारणं क्रियात् करोतु। [तेषां केषाम्?] यैः अघैः व्यसनैः पापैर्वा प्रियेषु अस्मासु विषये तव चेतः अन्तःकरणं क्लमं खेदम् एति। प्राप्नोति। [किं लक्षणैः?] यैः उपपन्नैः विना उपपत्त्या विना। कारणेन विना। विचिन्त्यमानैः अस्माकमेवाशङ्कमानैः। [किं लक्षणस्य तव?] जयाय विजयाय प्रयातस्य गच्छतः। तस्मात् जयार्थिना त्वया अस्मच्चिन्तया चेतः न खेदितव्यमिति भावः। अस्माभिः यः उपास्यते सः इति शेषः।। ५२।।

लघुटीका

५१।

आस्माकीनेन दुःखेन न च त्वया दुःखितेन भवितव्यमिति एतदाऽऽशीर्द्वारेण निवेदयति- हे पार्थ ! यैरघैः व्यसनैः दुःखैः कष्टैः प्रियेषु प्रियविषये विचिन्त्यमानैः सम्भाव्यमानैः चेतः क्लाम्यति चेतः खिद्यते तव तेषामघानां कष्टानां मघवा इन्द्रो विघातं

जोनराजटीका

पुरुषगणनाधिकारे जाते पुरुषगणनायां प्रवृत्तायां यदा पुरुषान् गणयितुमारभ्यते तदा स एव प्रथमो गण्यत इत्यर्थः। स एव पुरुषाणामग्रणीरित्यर्थः। संसत्स्विति बहुवचनमेकत्र सभायां प्रमादादिजाता कदाचिद्विपर्ययदृष्टिः स्यादतस्तन्निवारणार्थम्। यः संभावनां गुणास्तित्वाध्यवसायमर्थवतीं सार्थिकां करोति, क्रियाभिः शेषजनान्मनुष्यान्तरेभ्योऽतिरिक्तामधिकाम् अन्यैः पुरुषैर्यत्कर्तुं न शक्यते तद्यः करोति स एव पुरुष इत्यर्थः।।५१।।

शुभकर्मप्रवृत्तानामवश्यं विघ्नाभासा भवन्ति, तन्निवारणीमाशिषमाह- अघानामुपपत्तेरुत्पद्यमानतया विनापि विघ्नेष्वसत्स्वपीत्यर्थः। यैर्विघ्नैः प्रियेषु राजादिषु विचिन्त्यमानैः

मा गाश्चिरायैकचरः प्रमादं वसन्नसम्बाधशिवेऽपि देशे।
मात्सर्यरागोपहतात्मनां हि स्खलन्ति साधुष्वपि मानसानि।। ५३।।

अन्वयदीपिका

मा गेति। हे पार्थ! एकचरः सन्नपि एकाकी चरन्नपि त्वं प्रमादं दौर्बल्यम् अनवधानतां मा गाः, मा कार्षीः। [किं कुर्वन्?] असम्बाधशिवेऽपि देशे [वसन्] न विद्यते सम्बाधा यस्मिन् सः असम्बाधः। विविक्तः। अत एव शिवः कल्याणकारी। वियोगे इति क्रोऽर्थः। चिरं कालं वसन् सन्। असम्बाधः सङ्कटः विजनः। 'असम्बाधस्तु निर्बाधः'। ननु निस्पृहस्य मम कुतो भयमिति वाच्यम्? [हीति निश्चितम्] मात्सर्यरागोपहतात्मनां पुरुषाणां मानसानि मनांसि साधुष्वपि सज्जनेषु विषये स्खलन्ति। विवर्तन्ते। अन्यथा

लघुटीका

क्रियात्। अपायदर्शीनि बन्धुहृदयानि भवन्ति। कथं? विचिन्त्यमानैरुपपन्नैर्विना युक्त्या विनैव सम्भाव्यमानैर्यत उपपत्त्या विना अनुपपद्यमानान्यपि प्रयुक्तान्यपि प्रियविषये व्यसनानि सम्भाव्यन्ते। अस्मद्विषया दुश्चिन्तैव च तव मघवत्प्रसादात्माऽभूत् इत्यर्थः। तव किं विशिष्टस्य? जयाय प्रयातस्य विजेतुं गतस्य।५२।

तव चेतः क्लाम्यत् अर्थसिद्धेः अन्तरायः तन्निषेधयति। हे पार्थ ! त्वम् असम्बाधशिवेऽपि देशे सन् प्रमादं मा गा विश्वासमयासीः। असम्बाधो विविक्तः। शिवो निरीतिः। एवंविधेऽपि

जोनराजटीका

शङ्कमानैस्तव जयार्थमितो गतस्य सतश्चेतः क्लाम्यति। तेषां विघ्नानामिन्द्रो विघातं क्रियात्। तपो विघ्नभूतमस्मच्चिन्तां मा कार्षीरित्यर्थः। यद्वा तेषामघानामिन्द्रो विघातं क्रियात्। अस्माकं प्रियेषु त्वत्क्षेमेषु सत्स्वपि त्वयि शङ्क्यमानैर्यैश्चेतोऽस्माकं क्लाम्यति। अयमर्थः - त्वां पराभवितुं यद्यपि कश्चिन्न समर्थः तथापि स्नेहात्स्वल्पत्वाद्वाऽस्मच्चेतो यान्यघानि त्वयि शङ्कते तानीन्द्रो हन्यात्। अथवा जयार्थमघानामिन्द्रो विघातं क्रियादिति योज्यम्।।५२।।

असम्बाधो जनविरहितः। अतः शिवो मङ्गलावहः। तथाविधेऽपि देशे चिरायैकचरः सहचररहितो वसन्न प्रसादम्। मम मुनेः को वैरीसंभवतीति संभावनां त्वं मा गाः। मात्सर्येण

तदाशु कुर्वन् वचनं महर्षेर्मनोरथान्नः सफलीकुरुष्व।
प्रत्यागतं त्वाऽस्मि कृतार्थमेव स्तनोपपीडं परिरब्धुकामा।। ५४।।

अन्वयदीपिका

भवन्तीत्यर्थः। मात्सर्यञ्च रागश्च मात्सर्यरागौ। मात्सर्यरागाभ्याम् उपहतः दू<षितः> आत्मा येषां ते मात्सर्यरागोपहतात्मानः। तेषां मात्सर्यरागोपहतात्मनाम्। स्वभावदुरात्मनामिति भावः। मात्सर्यं द्वेषः परोत्कर्षासहनं वा। रागः इच्छा स्नोहो वा ताभ्याम्।।। ५३।।

निगमयति। **तदिति।** हे पार्थ! नः अस्माकं मनोरथान् मनोभिलाषान् सफलीकुरुष्व। शत्रुनिर्यातनेन अस्मान् प्रतिख्यापय। [किं कुर्वन्?] महर्षेः व्यासस्य तत् वचनम् आशु शीघ्रं कुर्वन्, तपश्चरन्। तपसा शत्रुनिर्यातनकार्यं सिद्ध्यतीत्यर्थः। किञ्च हे अर्जुन! [अस्मी]त्यहं त्वां परिरब्धुकामा वर्त्ते आलिङ्गितुमिच्छामीत्यर्थः। [किं कृत्वा?] स्तनोपपीडं स्तनयोरुपपीड्य

लघुटीका

देशे चिराय चिरकालं यावत् एकचरः। एक एव चरतीति एकचरः एकाकी। कस्मिंश्चिदपि अद्रुह्यतो मम किं करोतीति इत्याशङ्क्याह- हि यस्मात्। मात्सर्यरागोपहतात्मनां रागद्वेषदूषितचेतसां जनानां साधुष्वपि गुणवत्स्वपि मानसानि चेतांसि स्खलन्ति। अशुभानि विधातुमिच्छन्ति। यतो दुर्जनानां मनः साधुष्वपि द्रोहपरं भवति।५३।

प्रकृतमुपसंहरन्नाह- यत एवं तत् तस्मात्कारणात्। अथवा तदिति वाक्योपसंहारे। किं बहुनोक्तेन ! महर्षेः सम्बन्धि वचनम् आशु झटिति इदानीमेव कुर्वन्सन्नोऽस्माकं मनोरथान् सफलीकुरुष्व। महर्षिवचनात् महेन्द्रम् आराध्य रिपुपक्षमुन्मील्य निजकुललक्ष्मीमुद्धृत्याद्यास्माकं मनोरथान् सफलीकुरुष्व। ततः त्वां कृतार्थं कृतकार्यं

जोनराजटीका

मोहो निर्विवेकत्वम्। मात्सर्यमोहाभ्यां वोपहत आत्मा येषां तेषां चेतांसि साधुषु विषयेऽपि विपर्यस्यन्ति। मत्सरिणः साधूनपि घ्नन्तीत्यर्थः। राजाऽभिमतस्यावधिपालनस्यानुमतत्वान्नियमिततेजसं त्वामरयो वनेऽपि बाधितुं प्रयतन्तेऽतः कुत्रापि मा विश्वसीरिति तात्पर्यम्।।५३।।

मूढाः साधूनपि यद्घ्नन्ति तस्माद्धेतोर्महर्षेर्वचनं कुर्वन्परस्य प्रवेशमददन्त्वमस्माकं मनोरथान् वाञ्छां सफलीक्रियाः जयं लभस्वेत्यर्थः। प्रवासगमनात्प्रेमह्रासमाशङ्क्याह- एवं

उदीरितां तामिति याज्ञसेन्या नवीकृतोद्ग्राहितविप्रकाराम्।
आसाद्य वाचं स भृशं दिदीपे काष्ठामुदीचीमिव घर्मरश्मिः।। ५५।।

अन्वयदीपिका

इति स्तनोपपीडम्। [किं लक्षणं त्वाम्?] तपःसिद्धेः अनन्तरं प्रत्यागतं पश्चादागतम्। गृहागतमित्यर्थः। कृतार्थमेव। कृतः सम्पादितः अर्थः तपोलक्षणो येन असौ कृतार्थः। तं कृतार्थम्। परिरब्धुं कामो यस्याः सा परिरब्धुकामा। 'तुं काममनसोरपीति' मकारलोपः।। ५४।।

उदीरितामिति। सः अर्जुनः भूरि अत्यर्थं दिदीपे। जज्वाल चुक्रोध। [किं कृत्वा?] इच्छन्। याज्ञसेन्या द्रौपद्या इति [पूर्वोक्तां] ताम् उदीरिताम् उक्तां वाचम् आसाद्य आकर्ण्य। यज्ञसेनस्य राज्ञः अपत्यं स्त्री याज्ञसेनी। द्रौपदी। [किं लक्षणां वाचम्?] नवीकृतोद्ग्राहितविप्रकाराम्। नवीकृतः पुनः उद्घाटनेन उद्ग्राहितः प्रत्यायितः निधापितः

लघुटीका

प्रत्यागतमेव प्रत्यागतमात्रमेव स्तनोपपीडं स्तनाभ्याम् उपपीड्य परिरब्धुकामास्मि। एवमेव शब्दार्थे कृतकृत्यं प्रतीपमागतं त्वामहमालिङ्गितुमिच्छामि। न तु इहैव स्थितं कुसीदं निःसत्त्वम्। अथवा प्रवासागतः सन् आलिङ्ग्यते। अपि तु प्रत्यागतमात्रमेव स्तनाभ्यामुपपीड्य भुजाभ्यामुपपीड्य आलिङ्गयिष्यामि। भुजाभ्यामुपपीड्य भुजोपपीडम्। 'सप्तम्याम् उपपीडरुधकर्षश्च पा.३.४.४९'। चकारात् तृतीयायामपि भवति। मनसि रथो मनोरथः। यथा मनोगती मनोराज्यम्। अन्यदपि यन्मनसा भ्यर्थ्यते तन्मनोरथः इति। मनसि रथ इव मनोरथः। ५४।

जोनराजटीका

पूर्वोक्तयुक्त्या कृतार्थं प्रत्यागतं त्वां भुजाभ्यामुपपीड्याहमालिङ्गितुमिच्छामि। प्रवासात्प्रत्यागतानामालिङ्गनं युक्तमित्यदूषितयाऽऽलिङ्गनोक्त्याऽनुरागातिशयः सूचितः।।५४।।

एवं द्रौपद्युक्ताम् उद्ग्राहित उत्क्षिप्तो विस्मृतो विप्रकारः शत्रुकृतस्तिरस्कारो नवीकृतो यया तां वाचमासाद्य विमृष्य भृशं दिदीपे। तपश्चरणार्थं तेजोऽग्रहीदित्यर्थः। यथोत्तरां दिशं प्राप्य दीप्यते सूर्यः।।५५।।

अथाभिपश्यन्निव विद्विषः पुरः पुरोधसाऽऽरोपितहेतिसंहतिः।
बभार सौम्योऽपि वपुः स भीषणं गतः क्रियां मन्त्र इवाभिचारिकीम्।। ५६।।

अन्वयदीपिका

प्रकारः परिभवो यस्याः सा, नवीकृतोद्ग्राहितविप्रकारा। ताम्। [क इव?] तिग्मरश्मिरिव। यथा तिग्मरश्मिः सूर्यः उदीचीं काष्ठां दिशम् आसाद्य प्राप्य दीप्तो भवति। "दिशस्तु ककुभः काष्ठा" **इत्यमरः।**। ५५।।

अथेति। सः अर्जुनः भीषणं भयङ्करं वपुः शरीरं बभार। भीषयत इति भीषणम्। [किं लक्षणः?] रम्योऽपि मनोहरोऽपि। उत्प्रेक्षते- पुरः अग्रे विद्विषः शत्रून् अभिपश्यन्निव स्थितः। अभिमुखं पश्यतीत्यर्थः। पुरोधसाऽऽरोपितहेतिसंहतिः। पुरोधसा धौम्येन आरोपिता आहिता दत्ता हेतीनाम् आयुधानां संहतिः समूहो यस्य सः आरोपितहेतिसंहतिः। [क इव?] मन्त्र इव। यथा रम्योऽपि मन्त्रः भीषणो भवति। [किं लक्षणः मन्त्रः?] आभिचारिकीं क्रियां

लघुटीका

इत्येवं याज्ञसेन्या द्रौपद्या उदीरितामुक्तां तां वाचमासाद्य सोऽर्जुनो हृदयेनावधार्य भृशं दिदीपे। क्रोधेन जाज्वल्यामास। कथं भूतां वाचम्? नवीकृतोद्ग्राहितविप्रकाराम्। नवीकृत आविष्कृतोऽन्तश्चिरकालविस्मृतोऽपि तदानीमिव वृत्तोऽनवीकृतो नवीकृतं यथा भवति तथा। उद्ग्राहितः प्रत्येकं क्रमेण उदीरितो विप्रकारः परिभवो यस्याः सा। नवीकृतोद्ग्राहितविप्रकारता। कः कां प्राप्य भृशं दीप्यते? तिग्मरश्मिरिव। यथा तिग्मरश्मिः सूर्य उदीचीं काष्ठाम् उत्तरां दिशम् आसाद्य भृशं दीप्यते।५५।

सोऽर्जुनो द्रुपदतनयावाक्यं श्रुत्वा यतोऽधिकं दिदीपे ततः सोऽर्जुनः सौम्योऽपि सौम्याकृतिरपि भीषणं वपुः बभार। क्रोधाद्भयावहं रूपम् उवाह। किं कुर्वन्? विद्विषो

लघुटीका

अथ तपश्चरणोद्योगारम्भादनन्तरं पुरोहितेन प्रतिपादितास्त्रमालः स रूपं भीषणमधारयत्। यथाऽभिचारिकीमभिचारोक्तां क्रियां गतो मन्त्रो रूपं भीषणं धत्ते। अत उत्प्रेक्षते- पुरोऽग्रे शत्रूनिव पश्यन् शत्रुदर्शने ह्युग्रत्वमुचितम्। एतेनार्जुनेन प्रियावचनं गृहीतमिति प्रतिपादितम्।।५६।।

अविलङ्घ्य विकर्षणं परैः प्रथितज्यारवकर्म कार्मुकम्।
अगतावरिदृष्टिगोचरं शितनिस्त्रिंशयुजौ महेषुधी।। ५७।।

अन्वयदीपिका

गतः प्राप्तः। अभिचारः परहिंसा प्रयोजनं यस्याः सा आभिचारिकी। ताम्। अभिचारकर्मणि प्रयुक्तो मन्त्रः प्रकृत्या रमणीयोऽपि भीषयतीत्यर्थः।। ५६।।

त्रिभिः श्लोकैः उक्तमायुधारोपणं विवृण्वन् अस्य अर्जुनस्य प्रस्थानमाह- **अविलङ्घ्येति**। सः अर्जुनः तपोभृतां द्वैतवननिवासिनां तपस्विनां हृदयानि मनांसि समाविवेश। खेदयामास। मुनिभिः हृदि धृत इत्यर्थः। [किं कुर्वन्?] कार्मुकं वहन्। [किं लक्षणं कार्मुकम्?] परैः अर्जुनादन्यैः अविलङ्घ्यविकर्षणम्। अविलङ्घ्यम् अनतिक्रमणीयं विकर्षणम् आकर्षणं यस्य तत् अविलङ्घ्यविकर्षणम्। अमोघाकर्षणम्। अरिवधकारकमित्यर्थः। प्रथितज्यारवकर्म। प्रथितं प्रसिद्धं ज्यारवस्य कर्म चापमोक्षणादिः यस्य तत्। ज्यायाः प्रत्यञ्चायाः रवः ज्यारवः शब्दः। ज्यारवश्च कर्म च ज्यारवकर्मणी। प्रथिते विस्तीर्णे ज्यारवकर्मणी यस्य तत्

लघुटीका

दूरस्थानपि पुरोऽग्रतोऽभिपश्यन्निव। शत्रून् पुरः स्थितानिव विलोकयन्। द्रुपदतनयया नवीकृतोद्ग्राहितविप्रकारत्वात्। क्रुद्धः शत्रून् पुरःस्थितानिव पश्यन् रौद्रं वपुर्दधौ। किं भूताः? पुरोधसा धौम्येनारोपिता बद्धा हेतिसंहतिः यस्य, आयुधकलापो यस्य स आरोपितहेतिसंहतिः। एतदप्यपरं भीषणत्वे कारणम्। क इव मन्त्र इव। सदा सौम्योऽपि मन्त्रो वेदवाक्यम् आभिचारिकीं क्रियां गतः सन् भीषणत्वं बिभर्त्ति। अभिचारो हिंसात्मकं कर्म। स प्रयोजनं यस्याः सा आभिचारिकी। सोम इव सौम्यः। 'माषादित्वाद्यः'।५६।

सोऽर्जुनः शिवं निरीति उर्वीधरवर्त्म शिलोच्चयमार्गम् अगच्छत्। क्षणं तपोभूतां

जोनराजटीका

हर्षाच्छोकाद्वा क्षणमुद्बाष्पा साश्रुः दृग्येषां तेषां तपस्विनां मनांसि सोऽविशत्। परैरर्जुनादन्यैरविलङ्घ्य विकर्षणमाक्रष्टुमशक्यं तथापि प्रथितज्यारवः कर्म च यस्य तत्कार्मुकं गाण्डीवं दधत्। यद्वा विकर्षणमनुल्लङ्घ्याकृत्वा परैः ख्यापितज्याशब्दादिकं गाण्डीवं धनुर्बिभ्रत्। केचिद्धि परधनुराकृष्य स्वबलप्रसिद्ध्यर्थं तद्गुणान्प्रशंसन्ति। तथारीणां दृष्टेर्गोचरं

यशसेव तिरोदधन्मुहुर्महसा गोत्रभिदायुधक्षतीः।
कवचं च सरत्नमुद्वहञ्ज्वलितज्योतिरिवान्तरं दिवः।। ५८।।

अन्वयदीपिका

प्रथितज्यारवकर्म। [किं कुर्वन्?] महेषुधी वहन्। महान्तश्च ते इषवश्च महेषवः। महेषवः धीयन्ते ययोस्तौ महेषुधी। [किं लक्षणौ महेषुधी?] अरिदृष्टिगोचरम् अगतौ अप्राप्तौ। आहवेषु अनिवृत्तित्वात् अस्येति भावः। शितनिस्त्रिंशयुजौ। शितेन तीक्ष्णेन निस्त्रिंशेन खड्गेन युक्तम् इति शितनिस्त्रिंशयुजौ। निर्गतः त्रिंशद्भ्योऽङ्गुलिभ्य इति निस्त्रिंशः खड्गः।।५७।।

यशसेवेति। [पुनः किं कुर्वन्?] कवचं तनुत्रं वहन्। [किं लक्षणं कवचम्] सरत्नं रत्नयुक्तम्। महसा स्वकान्त्या गोत्रभिदायुधक्षतीः। वज्रप्रहाररन्ध्राणि मुहुः वारं वारं तिरोदधत् आच्छादयत्। गोत्रभिदः इन्द्रस्य आयुधं वज्रम्, तस्य क्षतीः प्रहारानित्यर्थः। [किं लक्षणेन महसा?] उत्प्रेक्षते। यशसा इव। मूर्तिमत्तया कीर्त्या इव। [किं लक्षणं कवचम्?] उत्प्रेक्षते-

---

लघुटीका

तपोधनानां हृदयानि समाविवेश प्राविशत्। कथं भूतानां तपोभृताम्? उद्बाष्पदृशामुदश्रु चक्षुषाम्। किं कुर्वन्? कार्मुकमुद्वहन्। किं भूतं कार्मुकम्? परैः शत्रुभिः अविलङ्घ्यं विकर्षणं यस्य तदविलङ्घ्य विकर्षणम्। विलङ्घयितुं शक्यं विलङ्घ्यम्। न विलङ्घ्यम् अनतिक्रमाकर्षणम्। पुनः कीदृक्? प्रथितज्यारवकर्म ज्यारवो मौर्वीधनुष्कर्म। दृढप्रहारादिप्रथिते जगत्प्रसिद्धे ज्यारवकर्मणी यस्य। तत्तथा। पुनः किं भूतम्? महेषुधी उद्वहन्। महास्त्रपूरिते निषङ्गौ धारयन्। किं भूते महेषुधी? अरिदृष्टिगोचरमागतौ। युद्धे अपराङ्मुखतया शत्रुभिः कदाचिदपि अदृष्टौ। पुनः कथंभूतौ महेषुधी? शितनिस्त्रिंशयुजौ। शितं तीक्ष्णं, निस्त्रिंशं खड्गं युञ्जाते शितनिस्त्रिंशयुजौ तीक्ष्णधारकृपाणसहितौ महेषुधी दधन्। इषवो निधीयन्ते

जोनराजटीका

विषयमगतौ रणे पार्थस्य पलायनासंभवात्। तथा शितं तीक्ष्णं निस्त्रिंशं खड्गं युञ्जते धारयन्तो महेषुधी श्रेष्ठौ निषङ्गौ च दधत् तथा। यतः सरत्नमत एव यशसेव सहसा प्रभया वज्राघातांस्तिरोदधत् छादयत्कवचं परिदधत्। किमिव? ज्वलितानि ज्योतींषि तारा

अलकाधिपभृत्यदर्शितं शिवमुर्वीधरवर्त्म सम्प्रयान्।
हृदयानि समाविवेश स क्षणमुद्बाष्पदृशां तपोभृताम्। ५९।।

(त्रिभिर्विशेषकम्)

अन्वयदीपिका

दिवः गगनस्य अन्तरमिव स्थितम्। आकाशस्य मध्यभागमिव स्थितम्। [किं लक्षणम् अन्तरम्?] ज्वलितज्योति। ज्वलन्ति प्रदीप्तानि ज्योतींषि नक्षत्राणि ताराः यस्मिन् तत् ज्वलितज्योति।। ५८।।

अलकाधिपेति। [पुनः किं लक्षणः सः?] पृथ्वीधरवर्त्म सम्प्रयान्। पृथ्वीधरः पर्वतः हिमालयः। तस्य वर्त्म मार्गं सम्प्रयान् प्रतिष्ठमानः। [किं लक्षणं पृथ्वीधरवर्म?] अलकाधिपभृत्यदर्शितम्। अलकाधिपः धनदः। तस्य भृत्यो यक्षः। तेन दर्शितम्। [पुनः किं लक्षणं वर्त्म?] अत एव शिवम्। निर्बाधं भयरहितम्। [किं लक्षणानां तपोभृताम्?] उद्बाष्पदृशाम्। उद्गताः बाष्पाः यासु ताः उद्बाष्पाः। उद्बाष्पा दृशो येषां ते उद्बाष्पदृशः। तेषाम् उद्बाष्पदृशाम्। पथि मार्गे गच्छन् अर्जुनः वियोगदुःखात् साश्रुनेत्राणां तपोभृतां मुनीनां हृदयानि समाविवेश। खेदयामास इति वाक्यार्थः।। ५९।।

लघुटीका

यस्मिन्निति स इषुधिः। इषुधिः स्त्री नरलिङ्गश्च। तथा कवचम् उद्वहन्। किं भूतं कवचम्? सरत्नं रत्नैः सहितम्। अत एव किं भूतं कवचम्? महसा तेजसा गोत्रभिदायुधक्षतीः इन्द्रस्यायुधप्रहारान् सुदुर्भृशं तिरोदधदपह्नुवानम्। केनेव? यशसा इव। हरिहेतिप्रहारान् अपह्नुवानम्। खाण्डववनप्रकुपितमहेन्द्रहेतिप्रहारकृतालघुव्रणतया यत् यशस्तेन मूर्तिमतेव। यशसा अपह्नुवानम्। कुपितेन्द्रमहास्त्रप्रहारैरपि यः कवचो न चूर्णितो न तु तथा विदारितश्च इति यशोऽर्जितम्। कीर्णायस्त्वात् सरत्नत्वाच्च। किमिव? कवचं शोभमानं दिवोऽन्तरमिव नभसोऽन्तरालमिव। कीदृगन्तरम्? ज्वलितज्योति देदीप्यमानं उडुनभसोऽन्तरालतुल्यम्।

जोनराजटीका

यत्र तद्दिवो मध्यमिव अथवा तिरोदधदिति पार्थस्यैव विशेषणं योज्यम्। यथा यशसा तथा सहसा चेन्द्रायुधव्रणांश्छादयन्। वीराणां रणे हतानामपि यशःसमुत्पत्तेः। उत्प्रेक्षैवेयम्। तथा यक्षनिर्देशितं निर्विघ्नं गिरिं मार्गं गच्छन्।।५७-५८-५९।।

अनुजगुरथ दिव्यं दुन्दुभिध्वानमाशाः
सुरकुसुमनिपातैर्व्योम्नि लक्ष्मीर्वितेने।

अन्वयदीपिका

अनुजगुरिति। अथानन्तरम् आशाः दिशः दुन्दुभिध्वानं शब्दम् अनुजगुः अनुदध्वनुः।। दुन्दुभीनां भेरीणां ध्वानः शब्दः। तम्। [किं लक्षणं दुन्दुभिध्वानम्?] दिव्यम्। दिवि भवं दिव्यम्। सुरकुसुमनिपातैः व्योम्नि आकाशे लक्ष्मीः शोभा वितने। विस्तृता। सुराणां देवानां कुसुमानि सुरकुसुमानि। सुरकुसुमानां निपाताः वृष्टयः। कल्पवृक्षपुष्पवृष्टिश्चाजनिष्टेत्यर्थः। पयोधिः समुद्रः भुवं पृथ्वीम् आलिलिङ्ग। आलिङ्गनं चकार। [किं करिष्यन्निव?] प्रियं कथयिष्यन्निव। यथा कश्चिन्नायकः स्वां नायिकां प्रियं कथयिष्यन् इव आलिङ्गति।

लघुटीका

तथा किं कुर्वन्? अलकाधिपभृत्यदर्शितम्। कुबेरानुचरदर्शितम्। उर्वीधरवर्त्म इन्द्रकीलाचलपथं गच्छन् सन्। स्नेहात् रणरणकवशात् उदश्रु चक्षुषां क्षणं मुनीनां हृदयं विवेश।५७-५९।

अथ अनन्तरमाशा दिशः दिव्यं दुन्दुभिध्वानमनुजगुः। पार्थस्य प्रयाणसमये मङ्गलार्थं वा संपदां वा प्राप्त्यर्थं दिवि समाहितानां दुन्दुभीनां सम्बन्धिनं ध्वानं दिशोऽनुजगुः अनुदध्वनुः। प्रतिशब्देनानुदध्वनुः। तथा सुरकुसुमनिपातैः कल्पवृक्षादिसुरद्रुमकुसुमैर्व्योम्नि गगने लक्ष्मीर्वितेने शोभा विस्तारिता। तथा च तस्मिन्नेव समये जलधिर्भुवमालिलिङ्ग। किं करिष्यन्? तव भारावरोपणार्थं पार्थ उद्यच्छते इति प्रियं कथयितुमिच्छन्निव। कथं भूताम्? स्फुरन्तीं कम्पमानाम्। कथं भूतः पयोधिः? अनिभृतवेलावीचिबाहुः। अनिभृताः चपलाः वेला वीचय एव बाहवो यस्य स तथा। अन्योऽपि यः कोऽपि कामपि प्रियामालिङ्गति स

जोनराजटीका

अथार्जुनप्रस्थानादनन्तरं दिशो दिव्यपटहशब्दमनुजगुः। दिक्षु प्रतिशब्दोऽभूदित्यर्थः। अथवा लोकपालनगरेष्वपि पटहानवादयन्निति व्याख्येयम्। व्योम्नि या लक्ष्मीः सा सुरपुष्पपतनैरर्थाद्भुवःकृता अथवा व्योम्नि कृतेति योज्यम्। स्फुरन्तीं सकम्पां भुवमब्धिरालिलिङ्ग भूश्चकम्पे। समुद्रश्चोल्ललासेत्यर्थः। भूकम्पसमुद्रक्षोभयोः शुभस्यापि सूचकत्वं संहितासु निर्दिष्टम्। अनिभृता लोलाः वेलायां वीचय एव बाहवो यस्य सः।

प्रियमिव कथयिष्यन्नालिलिङ्ग स्फुरन्तीं
भुवमनिभृतवेलावीचिबाहुः पयोधिः।। ६०।।

अन्वयदीपिका

[किं लक्षणः पयोधिः?] अनिभृतवेलावीचिबाहुः। न भृताः अनिभृताः। अनिभृताः चञ्चलाः। वेलायां तटे वीचयः। ता एव बाहवो यस्य सः अनिभृतवेलावीचिबाहुः। [किं लक्षणां भुवम्?] स्फुरन्तीम्। हर्षात् स्पन्दमानाम्। <नायिकापक्षे> सात्त्विकभावात् प्रादुर्भूतरोमोद्गमाम् <सरोमाञ्चाम्>।। ६०।।

।। इति श्रीकिरातार्जुनीये महाकाव्ये
श्रीनृसिंहविरचितायाम् अन्वयदीपिकायां तृतीयः सर्गः।।

लघुटीका

लोलभुजो भवति। स्त्री अपि सात्त्विकभावात्कम्पते। आलिङ्ग्य प्रियं कथ्यते। हर्षातिशयवशादेतेन तदानीं समुद्रश्चुक्षोभ भूश्चचाल। दिवि दुन्दुभिध्वनिरुदभूत्। व्योम्नि पुष्पवृष्टिश्च बभूव। दिवि भवं दिव्यम्। 'द्युप्रागादिभ्यो यत्' ४.२.१०१। वेलायां वीचयो वेलावीचयः। वेलास्याद्वृद्धिरम्भसः अम्भसां वृद्धिः। तदुपलक्षिततटोपदेशोपिवेला उच्यते। ६०।

।। इति किरातार्जुनीये महाकाव्ये
प्रकाशवर्षकृतौ लघुटीकायां तृतीयः सर्गः समाप्तः।।

जोनराजटीका

अत्रोत्प्रेक्षते- प्रियं हितमिव वर्णयिष्यन्। वक्तुकामश्चपलबाहुः। समुल्लसति समुद्रभूम्योर्विशेषणबलान्नायकाशयकत्वावच्छेदनालिङ्गनोक्तिः कृतेति भद्रम्।।६०।।

।। इति श्रीजोनराजकृतायां किरातार्जुनीयटीकायां
तृतीयः सर्गः।।

श्लोकानुक्रमणिका

***

पादानुक्रमणिका

द

स

***

टीकायाम् अलङ्कारोदाहरणम्

अस्मिन् किरातार्जुनीये महाकाव्ये कविर्भारविः अनेकान् अलङ्कारान् संयोजयामास। ते अलङ्कारा अत्र पट्टिकायां प्रदर्श्यन्ते।

क्र.सं	अलङ्काराः	श्लोकाः	श्लोकसङ्ख्या
१	वृत्त्यानुप्रासः	श्रियः कुरूणामधिपस्य पालनीं	१.१
२	अर्थान्तरन्यासः	स किंसखा साधु न शास्ति योऽधिपं	१.५
३	काव्यलिङ्गम्	विशङ्कमानो भवतः पराभवं	१.७
४	अर्थान्तरन्यासः	तथापि जिह्मः स भवज्जिगीषया	१.८
५	एकावलिः	निरत्ययं साम न दान वर्जित	१.१२
६	उदात्तम्	अनेकराजन्यरथाश्वसंकुलं	१.१६
७	समासोक्तिः	उदारकीर्तेरुदयं दयावतः	१.१८
८	परिकरः	महौजसो मानधना धनार्चिता	१.१९
९	उपमा	न तेन सज्यं क्वचिदुद्यतं धनुः	१.२१
१०	अर्थान्तरन्यासः	प्रलीनभूपालमपि स्थिरायति	१.२३
११	अर्थान्तरन्यासः	तदाशु कर्तुं त्वयि जिह्ममुद्यते	१.२५
१२	संहोक्तिः	परोपनीतं नृप रामणीयकं	१.३९
१३	अर्थान्तरन्यासः	द्विषन्निमित्ता यदियं दशा ततः	१.४२
१४	अर्थान्तरन्यासः	न समयपरिरक्षणं क्षमं	१.४५
१५	हेतूत्प्रेक्षा	अनुपालयतामुदेष्यतीं	२.१०
१६	कारणमाला	विपदोऽभिभवन्त्यविक्रमं	२.१४
१७	अर्थान्तरन्यासः	तदलं प्रतिपक्षमुन्नतेः	२.१५
१८	अर्थान्तरन्यासः	मदसिक्तमुखैर्मृगाधिपः	२.१८
१९	परिवृत्तिः	अभिमानधनस्य गत्वरैः	२.१९
२०	अर्थान्तरन्यासः	ज्वलितं न हिरण्यरेतसं	२.२०
२१	अर्थान्तरन्यासः	किमपेक्ष्य फलं पयोधारन्	२.२१
२२	काव्यलिङ्गम्	अवितृप्ततया तथापि मे	२.२९
२३	अर्थान्तरन्यासः	सहसा विदधीत न क्रियाम्	२.३०
२४	काव्यालङ्कारः	शुचि भूषयति श्रुतं वपुः	२.३२

२५	काव्यलिङ्गम्	क्व चिराय परिग्रहः श्रियां	२.३९
२६	काव्यलिङ्गम्	किमसामयिकं वितन्वता	२.४०
२७	व्यतिरेकः	उपकारकमायतौ भृशं	२.४३
२८	काव्यलिङ्गम्	प्रणतिप्रवणान्विहाय नः	२.४४
२९	कारणमाला	मदमानसमुद्धतं नृपं	२.४९
३०	उपमा	अपरागसमीरंणेरितः	२.५०
३१	दृष्टान्तः	अणुरप्यपहन्ति विग्रहो	२.५२
३२	उत्प्रेक्षा	अनुशासित मित्यनाकुलं	२.५४
३३	उत्प्रेक्षा	मधुरैरवशान्निलम्भयन्	२.५५
३४	उत्प्रेक्षा	सहसोपगतः सविस्मयं	२.५६
३५	उत्प्रेक्षा	ततः शरच्चन्द्रकराभिरामैः	३.१
३६	उत्प्रेक्षा	अनुद्धताकारतया विविक्तां	३.३
३७	उपमा	धर्मात्मजो धर्मनिबन्धिनीनां	३.४
३८	उत्प्रेक्षा	श्च्योतन्मयूखेऽपि हिमद्युतौ	३.८
३९	अर्थान्तरन्यासः	सुता न यूयं किमु तस्य राज्ञः	३.१३
४०	अतिशयोक्तिः	निरीक्ष्य संरम्भनिरस्तधैर्यं	३.२१
४१	उत्प्रेक्षा	योगं च तं योग्यतमाय तस्मै	३.२६
४२	अर्थान्तरन्यासः	कृताननतिर्व्याहृतसान्त्ववादे	३.३१
४३	उपमा	अथोष्णभासेव सुमेरुकुञ्चान्	३.३२
४४	उपमा	तुषारलेशाकुलितोत्पलाभे	३.३६
४५	उत्प्रेक्षा	व्रीडानतैराप्तजनोपनीतः	३.४२
४६	श्रौती पूर्णोपमा	वीर्यावदानेषुकृताभिमर्शः	३.४३
४७	समासोक्तिः	प्रसह्य योऽस्मासु परैः प्रपन्नो	३.४४
४८	उत्प्रेक्षा	स व्रीडमन्दैरिव निष्क्रियत्वान्	३.४६
४९	उत्प्रेक्षा	स क्षत्रियस्त्राणसहः सतां	३.४८
५०	उत्प्रेक्षा,उपमा	वीतौजसः सन्निधिमात्रशेषा	३.४९
५१	अर्थान्तरन्यासः	मा गाश्चिरायैकचरः प्रमादं	३.५३
५२	समासोक्तिः	अनुजगुरथ दिव्यं दुन्दुभिर्ध्वानमाशाः	३.६०

***

क्रियापदानुक्रमणिका

अधिकुर्वते - अधि- डुकृञ्-करणे. कृ + लट् प्र. बहु. आत्मनेपदी, तनादिगणीयः, सकर्मकः।

अधितिष्ठति - अधि- ष्ठा + लट्. प्र. एक. परस्मैपदी, भ्वादिगणीयः (शप् प्रत्ययः) अकर्मकः।

अनुरुध्यते - अनु. रुधिर -आवरणे,रुध् + लट्, प्र. एक. आत्मनेपदी, दिवादिगणीयः, सकर्मकः।

अपहारयेत् - अप. हृञ्- हरणे. णिच्. हृच् + लिङ् प्र. एक परस्मैपदी, भ्वादिगणीयः, सकर्मकः।

अभिदधे - डु धाञ् - धारणपोषणयोः, लिटि. प्र. पु. ए. उभयपदी।

अभिदृश्यते - अभि - दृशिर्- प्रेक्षणे. दृशिर् + लट्. प्र. एक. भ्वादिगणीयः, सकर्मकः।

अभिपेदे - पद गतौ लिटि प्र. पु. ए. आत्मनेपदी।

अभिभवन्ति - अभि- भू- सत्तायां, भू+ लट्. प्र. बहु. परस्मैपदी, भ्वादिगणीयः, सकर्मकः।

अभिवर्षति - अभि - वृतु- वर्षानरणयोः , लट्. प्र. एक. सकर्मकः, भ्वादीगणीयः।

अरञ्जयत् - रञ्ज् - रागे, णिच् , रञ्ज + लङ् . प्र. एक. परस्मैपदी, भ्वादिगणीयः।

अर्हसि - अर्ह - पूजायाम्। अर्ह + लट् म. एक. परस्मैपदी. चुरादिगणीयः, सकर्मकः।

अवसीदति - अव्- सीद् (नश्यति) सीद् + लट्. प्र. एक. परस्मैपदी, तदादिगणीयः।

अवाप - आप्लृ व्याप्तौ लिटि. प्र. पु. ए. परस्मैपदी।

अवेदि - विद ज्ञाने विद् + लुङ. प्र. एक, आत्मनेपदी(कर्मणि), अदादिगणीयः, सकर्मकः।

अवोचत् - वच् - परिभाषणे- वच् + लङ् - म. बहु. आत्मनेपदी, अदादिगणीयः।

असि - अस भुवि- अकर्मक सेट् परस्मैपदी म. पु. ए.।

अस्ति - अस, भुवि अकर्मक, सेट्, परस्मैपदी, लटि. प्र. पु. ए।

अस्मि - असु भुवि - अस् + लटि. उ. ए. अकर्मकः।

अस्मि - अस भुवि अकर्मक, सेट, परस्मैपदी, लटि. उ.पु. ए.।

आचचक्षे - आ - चक्षिङ् - व्यक्तायां वाची, चिक्षिङ् + लट् आत्मनेपदी, अदादिगणीयः, सकर्मकः।

आजहार - हृञ् हरणे, लिट् आह + हृञ् + लिट् परस्मैपदी।

आददे - आ. डु दाञ्. दाने, दा + लिट् प्र. एक. आत्मनेपदी, जुहादिगणीयः, सकर्मकः।

आबभाषे - भाष व्यक्तायां वाची लिटि प्रथम.पु.ए. आत्मनेपदी. भ्वादिगणीयः।

आससाद - षद्लृ- विशरणगत्यवसादनेषु लिटि. प्र. पु. ए. आ. पदी।

इच्छति - इष् - इच्छायाम्, इष् + लट्. प्र. एक. परस्मैपदी, तुदादिगणीयः, सकर्मकः।

इच्छन्ति - इष् - इच्छायाम् धातुः, सकर्मकं, सेट् परस्मैपदी, इष् + लट् प्र.।

इयाय - इण्- गतौ + लिट्. प्र. एक. आत्मनेपदी, भ्वादिगणीयः।
इयाय - इण् गतौ सकर्मक, अनिट् परस्मैपदी लिटि. प्र. पु. ए।
ईक्षते - ईक्ष -दर्शनाङ्कनयोः ईक्ष + लट्. प्र. एक. आत्मनेपदी, भ्वादिगणीयः, अकर्मकः।
उच्छ्वसति - श्वस प्राणने, लटि, प्र. पु. ए. परस्मैपदी।
उज्झन्ति - उज्झ्- उत्सर्गे, उज्झ्, लट्. प्र. बुह परस्मैपदी, तदादिगणीयः।
उत्सहसे - सह + मर्षणे , सह + लट्. म. एक. आत्मनेपदी, भ्वादिगणीयः, अकर्मकः।
उन्मूलयति - उत्- मूल - प्रतिष्ठायाम्. णिच्, मूल + लट्.प्र. एक. परस्मैपदी, भ्वादिगणीयः, अकर्मकः।
उपचक्रमे - उप - डुकृञ् - करणे- कृञ् + लिट्. प्र. एक. आत्मनेपदी, तनादिगणीयः, सकर्मकः।
उपयान्ति - उप- या- प्रापणे, प्रापणमिह गतिः या + लट्. प्र. बहु- परस्मैपदी. अदादिगणीयः।
उपहन्ति - उप, हन् + लट्. प्र. बहु. परस्मैपदी।
उपैति - उप् - इण् - गतौ, इण् + लट्. प्र. एक. परस्मैपदी, अदादिगणीयः, सकर्मकः।
उवाच - ब्रूञ् - व्यक्तायां वाची द्विकर्मक. सेट्. लटि प्र. पु. एक परस्मै।
ऊह्यते - वह- प्रापणे, वह + लट्. प्र. एक. आत्मनेपदी, भ्वादिगणीयः, सकर्मकः।
ऊचे - वच् - परिभाषणे कर्मणि वच् + लङ् प्र. एक. आत्मनेपदी, अदादिगणीयः।
एति - इण् गतौ सकर्मक. अनिट्. लटि.प्र.पु. ए. आत्मनेपदी।
करोति - डुकृञ्-करणे कृ+ लट्. प्र. एक. परस्मैपदी, तनादिगणीयः, सकर्मकः।
कुरुते - डु कृञ् - करणे- कृ +लट्. प्र. एक. आत्मनेपदी, तनादिगणीयः।
कुर्वते - डु. कृञ्, करणे. कृ+ लट्. प्र. बहु. आत्मनेपदी, तनादिगणीयः, सकर्मकः।
क्रियते - कृ + लट्. प्र. एक. कर्मणि,भ्वादिगणीयः, सकर्मकः।
चकासति - चकासृ- दीप्तौ, चकस् + लट्. प्र. बहु. परस्मैपदी, अदादयः, अकर्मकः।
चिचीषिता - चीञ् चयने, लुटि. प्र. पु.ए. उभयपदी।
चिन्तयति - चिती - स्मृत्याम् - चित् + लट्. प्र. एक. परस्मैपदी, चुरादिगणीयः, सकर्मकः।
जग्राह - ग्रह उपादाने लिटि. प्र. पु. ए. आत्नेपदी।
जनयन्ति - जनी - प्रादुर्भावे, जनी + लट्. प्र. बहु. परस्मैपदी, णिजन्तरूपं, सकर्मकः।
जहातु - ओ-हाक् - त्यागे. सकर्मक, अनिट्. परस्मैपदी लोटि, प्र.पु. ए.।
जायेत - जनी-प्रादुर्भावे विधिलिङ्ग. प्र. पु. ए.।
ज्वलयति - ज्वल - दीप्तौ, णिच्. ज्वल + लट्. प्र. एक. परस्मैपदी, भ्वादिगणीयः, अकर्मकः।
तनोति - तनु- विस्तारे, तनु + लट्. प्र. एक परस्मैपदी, तनादिगणीयः, सकर्मकः।
ददृशे - दृशिर् - प्रेक्षणे. दृशिर् + लिट् . प्र. एक. सकर्मकः।
दर्शयते - दृशिर् - प्रेक्षणे दृश् + लट्. प्र. एक, आत्मनेपदी(णिच्), भ्वादिगणीयः, सकर्मकः।

दिदीपे -	दीपी - दीप्तौ अकर्म सेट. लिटि. प्र. ए. आत्मनेपदी।
दुनोति -	दुह- उपतापे, दुहू + लट्. प्र. एक. परस्मैपदी, स्वादिगणीयः, सकर्मकः।
दृश्यते -	दृशिर्- प्रेक्षणे कर्मणि - दृश् + लट्. प्र. एक. आत्मनेपदी, भ्वादिगणीयः, सकर्मकः।
धत्ते -	डु धाञ्. धारणपोषणयोः दान इत्यके लटि. आत्मनेपदी. सकर्म, अनिट्, आत्मनेपदी।
धावति -	धावु- गतिशुद्धयोः, धा + लट्. प्र. एक. अकर्मकः, भ्वादिगणीयः, शप् प्रत्ययः।
धिनोति -	धिवि - प्रीणने - धिवि + सट्, प्र. एक. परस्मैपदी, भ्वादिगणीयः, सकर्मकः।
नयति -	णीञ्. प्रापणे, नी + लट्. प्र. एक. उभयपदी, स्वादिगणीयः, सकर्मकः।
नयन्ति -	णीञ्- प्रापणे - नी + लट्. प्र. बहु. परस्मैपदी, भ्वादिगणीयः, सकर्मकः।
निवसन्ति -	नि. वस्. निवसे, वस् + लट्. प्र. बहु. परस्मैपदी, भ्वादिगणीयः, अकर्मकः।
निहन्ति -	नि. हन- हिंसागत्यो-, हन् + लट्. प्र. एक. परस्मैपदी, अदादिगणीयः, सकर्मकः।
नेष्यति -	णीञ् प्रापणे भ्वादिगण लृटि. प्र. पु. ए. परस्मैपदी।
न्यघ्नन् -	हन् हिंसागत्योः लङ्. प्र. पु. ब. परस्मैपदी।
परैति -	पर- इण्, गतौ, इण् + लट्. प्र. एक परस्मैपदी, अदादिगणीयः, सकर्मकः।
प्रणमन्ति -	प्र- प्रह्वम्- प त्वे, नम् + लट्. प्र. बहु. परस्मैपदी, भ्वादिगणीयः, सकर्मकः।
प्रतीयते -	इण् - गतौ कर्मणि, इण् + लट्. प्र एक. आत्मनेपदी, अदादिगणीयः, सकर्मकः।
प्रदुग्धे -	प्र. दुह् - प्रपूरणे, दृह् + लट्. प्र. एक. आत्मनैपदी, अदादिगणीयः, अकर्मकः।
प्रपेदे -	प्र. पद गतौ लिटि. प्र. पु. ए. आत्मनेपदी, सकर्मक।
प्रभवन्ति -	प्र. भू- सत्तायां भू+ लट्. प्र. बहु. परस्मैपदी, शप् प्रत्ययः भ्वादिगणीयः, सकर्मकः।
प्रवर्तते -	प्र. वृतू- वर्तने, वृत् + लट्, प्र. एक. आत्मनेपदी, भ्वादिगणीयः, सकर्मकः।
प्रसहते -	प्र. षह- मर्षणे- सह + लट्. प्र. एक. आत्मनेपदी, भ्वादिगणीयः।
फलन्ति -	फल - निष्पत्तौ, फल् + लट्, प्र. बहु. परस्मैपदी, भ्वादिगणीयः, अकर्मकः।
बभार -	भृञ् भरणे सकर्म लिटि प्र. पु. ए परस्मैपदी।
बाधते -	बाधृ- विलोडने. बाध् + लट्. प्र. एक. आत्मनेपदी, भ्वादिगणीयः, सकर्मकः।
भजन्ते -	भज सेवायां लटि. प्र. पु. ए. आत्मनेपदी।
भवति -	भू- सत्तायाम्, भू + लट्. प्र. एक. परस्मैपदी, भ्वादिगणीयः, अकर्मकः।
भवन्ति -	भू- सत्तायाम्, भू + लट् प्र. बहु. परस्मैपदी, भ्वादिगणीयः, अकर्मकः।
मेने -	मन ज्ञाने(मनु अवबोधने) अभि सकर्मक अनिट् आत्मनेपदी, लिटि, प्र.पु. ए।
रराज -	राजृ- दीप्तौ - रजु + लिट्. प्र. एक. आत्मनेपदी. भ्वादिगणीयः।
रहयति -	रह- त्यागे रह + लट्. प्र. एक. परस्मैपदी, चुरादिगणीयः, सकर्मकः।
रुजन्ति -	रुजो - भङ्गे रुजु + लट्. प्र, बहु. परस्मैपदी, तुदादिगणीयः, सकर्मकः।

रोचते - रुच्- दीप्तौ- अभिप्रीतौ च . रच् + लोटे. प्र. एक. आत्मनेपदी, भ्वादयः, अकर्मकः।
वदन्ति - वद- व्यक्तायां वाचि वद + लट् प्र. बहु, परस्मैपदी, भ्वादिगणीयः, सकर्मकः।
वाच्छन्ति - वाञ्छि (वाच्छ)- इच्छायाम्, वाछि + लट् प्र. बहु. परस्मैपदी, भ्वादिगणीयः, सकर्मकः।
विततार- तॄ - प्लवनतरणयोः, लिट् वि + तॄ + लिट्, प्र.पु.ए.परस्मैपदी, भ्वदिः।
वितन्यते - वि. तनु- विस्तारे, तनु + लट्. प्र. एक. आत्मनेपदी(कर्मणि), तक्षादिगणीयः, सकर्मकः।
विदधातु - वि+दध- धारणे, धा + लोट्. प्र. एक. परस्मैपदी, जुहोत्यादिगणीयः, सकर्मकः।
विधत्ते - "डु धाञ् धारणपोषणयोः, लटि. प्र. पु. ए. आत्मनेपदी।
विबोध्यसे - वि. बुधिर् - बोधने. बुध् + लट्. म. एक, आत्मनेपदी, भ्वादिगणीयः, सकर्मकः।
विवेद - विद्लृ लाभे सकर्मकः. उभयपदी. लिटि. उ.पु. ए।
विषहे - षह-मर्षणे लिटि. प्र. पु. ए. आत्मनेपदी।
वृणुते - वृण् + लट्. प्र. एक आत्मनेपदी. क्र्यादिगणीया, श्न प्रत्ययः।
व्यथते - व्यथ - भयसञ्चलनयोः व्यथ + लटा. प्र. एक. आत्मनेपदी, भ्वादिगणीयः, अकर्मकः।
व्यवसायन्ति - नामधातुः, व्यवसायं प्राप्नुवन्ति, इत्यर्थे।
व्रजन्ति - व्रज - गतौ व्रज + लट् प्र. बहु. परस्मैपदी, भ्वादिगणीयः, सकर्मकः।
शास्ति - शासु - अनुशिष्टौ, शासु + लट् प्र. एक. परस्मैपदी. अदादिगणीयः, सकर्मकः।
संशृणुते - सम्- श्रु, श्रवणे, श्रु + लट्. प्र. एक आत्मनेपदी, भ्वादिगणीयः, सकर्मकः।
सञ्जुहुधि- सम्- हु- दानादयोः हु + लोट्. म. एक. परस्मैपदी, जुहोत्यादिगणीयः, सकर्मकः।
समभ्येतु - सम्- अभि- इण्- गतौ इण् + लोट्. प्र. एक. परस्मैपदी, अदादिगणीयः, सकर्मकः।
समाययौ - आङ् - या प्रापणे या + लिट. प्र. एक. परस्मैपदी, सकर्मकाः, अदादिगणीयः।
समीहते - सम्- ईह - चेष्टायां ईह+ लट्. प्र. एक. आत्मनेपदी, भ्वादिगणीयः, अकर्मकः।
सहते - सह + लट्. प्र. एक. आत्मनेपदी, भ्वादिगणीयः, सकर्मकः।
सहेत - षह मर्षणे सकर्मक. सेट्. आत्मनेपदी, विधिलिङ्. प्र. पु. ए।
स्खलन्ति - स्खल् धानौ लटि. प्र. पु. ब. परस्मैपदी।
हन्ति - हन् + लट्- प्र. एक. परस्मैदी अदादिगणीयः, सकर्मकः।
हरति - हृञ् -हरणे. हृ+ लट् प्र. एक परस्मैपदी, भ्वादिगणीयः, सकर्मकः।
हनन्ति - हन्. हिंसागत्योः, हन् + लट् प्र. बहु. परस्मैपदी, अदादिगणीयः, सकर्मकः।

***